ORISSAN ORIENTAL TEXT SERIES (SANSKRIT) - 21 A

VASANTOTSAVAMAHĀKĀVYAM

By

HALADHARA MISRA

Directorate of Culture,
Orissa, Bhubaneswar

ORISSAN ORIENTAL TEXT SERIES (SANSKRIT) - 21

VASANTOTSAVAMAHĀKĀVYAM

By

HALADHARA MIŚRA

Edited by

Dr. Bhagaban Panda
Editor,
Directorate of Culture, Orissa, Bhubaneswar

Published by :

Directorate of Culture, Orissa
Bhubaneswar-751014

*

First Edition — 1000

1992

*

Printed at :

Galpajhara Prakashani, Bhadrak, Balasore

*

Price — Rs.

उत्कलीयप्राच्यग्रन्थमाला (संस्कृतम्)-२१

कविहलधरमिश्रविरचितं

वसन्तोत्सवमहाकाव्यम्

सम्पादकः

डक्टर भगवान् पण्डा

ओड़िशाराज्य-संस्कृति-निर्देशालयः, भुवनेश्वरम्

प्रकाशकः
ओड़िशाराज्य-संस्कृति-निर्देशालयः
भुवनेश्वरम्-७५१०१४

*

प्रथम मुद्रणम् — १०००
१९९२

*

भद्रकस्थ-गलपञ्जर-प्रकाशनी
मुद्रणालये मुद्रितम् ।

*

मूल्यम् -- रू.

Introduction

The editing of Vasantotsavamahākāvya (V. M.) by Haladhara Miśra is based on a single manuscript preserved in the manuscript section of the Orissa State Museum, Bhubaneswar. This is a unique work and like other Sanskrit Kāvyas of eminent writers, it deserves a place in the history of Sanskrit literature. But unfortunately the name of this Kāvya has not found place in the history of Sanskrit literature due to its strigent circulation for a pretty long time. Now it is being presented to the scholars in print for their study and appreciation.

Description of the manuscript :

The work under discussion has been catalogued vide No. L/60. It is a palm leaf manuscript containing 137 folia in all. The size of the manuscript is 41.1X4 cm. There are 2-5 lines in each folio and the lines contain 15-82 alphabets in Oriya characters. This contains also 10 (ten) Kāvya Bandha citras in folio from 134 to 136. The condition of the manuscript is not good and some folia are worm eaten and broken. The date of copy of the manuscript may be assigned to the 18th Century A.D.[1] This has been collected from Narasiṁha Miśra, Raṇapur, Puri on 22.11.1956.

The author of the work :

It is known from the last canto as well as from the colophon lines, mentioned at the end of each canto that Haladhara is the author of this work (V.M.).[2] He was born in the family of Vājapeyi Śambhukar Miśra, a famous Dharmaśāstra writer of Orissa and well known to the Dharmaśāstra writers of India.[3]

The names of the father and mother of Haladhara were Dinakara and Padmāvatī respectively. His son Kapileśvara was too a great Sanskrit scholar. His family surname was Miśra.[4]

---

1. A Descriptive cat. of Sanskrit manuscript of Orissa, Vol. II, Sri K. N. Mohapatra, Orissa Sahitya Akademi, Bhubaneswar, 1960, p-112.
2. (a) VM, 22-58.
   (b) VM, p-203.
3. History of Dharmasaśtra, Vol. I, Dr. P.V. Kane, Bhandarkar Oriental Research Institute, Poona, 1930, p. 374.
4. VM. 22-54.

Haladhara Miśra is the name of the author of another Sanskrit work Sangīta Kalpalatikā (S K) a treatise on the music acquired by the Orissa State Museum, Bhubaneswar.[5] It is seen, the S.K. though a separate work has been incorporated in the third canto of the V.M. under the name of Sangītanirūpaṇa. This canto has been devoted entirely on the science of Gīta, vādya and nṛtya. The S.K. and the third canto of the V.M. were agreed almost word for word except that the former contains prabandhas and the latter goes without the Gītas.[6]

It is known that Haladhara was also famous smṛti-writer of Orissa. His smṛti work compiled after his name as 'Haladhara Saṁhitā, begins with the same benedictory verse as in other two works noted above.[7] Another of his work 'Hariharaprakāśa' is a prabandha Kāvya which has not yet been noticed so far. There is a Sanskrit grammar entitled, 'Haladhara Kārīkā' which was most probably written by our poet. On the evidence of the obove it is definitely known that Haladhara Miśra was a great poet, scholar, musecologist and a writer of Dharmaśāstra in Orissa. Out of his five works three works are now available to the scholars.

Time of the author :

In the first canto of the V.M. the poet has given a brief history of his patron beginning from the reign of Gajapati Rāmacandra Deva (1568-1607) the founder of the Khurda kingdom and ending with that of Narasiṁha Deva (1628-1647 A.D.) who have been eulogised in the work.[8] It is known from the S.K. that the patron of the poet was Gajapati Narasiṁha Deva whom he has praised in the above mentioned Mahākāvya.[9] He wrote the work on music in a spirit of competition with Kṛṣṇadāsa, a contemporary of Gajapati Mukunda Deva (1559-1568 A.D.) who had become very famous during his time. He has quoted names of authors such as Bāṇanagara Harichandana, Gangādhara Dāsa, Anangabhīma, Madhupura Narendra, Ananga Bhramaravara, Gajapati Mukunda, Gajapati Rāmacandra, Gajapati Rudrarāya, Menakādeī and Kamalāpātadevi in his work.[10] All these names are famous in their respective fields such as poets, musicians and their patrons in Orissa.

---

5. A Descriptive Cat. of Skt. Mss. of Orissa, Vol. II, Sl. No. 254, Cat. No. Mus-3 (b), P-167.
6. Sangītakalpalatikā, Ed. Nilamadhava Panigrahi, Orissa Sangita Nataka Akademi, Bhubaneswar, 1984, P. 2.
7. (a) Utkalīya Dharmaśāstra, Dr. Bhagaban Panda, Grantha Mandir, Cuttack, 1985, P.87-88.
   (b) A Descriptive Cat of Skt. Orissa, Vol. VI, P. 206.
8. V.M., Canto I, Verses 3-10.
9. S.K., Stāvaka I, Page-6.
10. A Des. Cat. of Skt. Mss, Vol. II, Page XXXIV.

Bāṇanagara Haricandana was Raghunāth Haricandana (1600-1621 A.D.), Rājā of Bāṇapur in the district of Puri. He was a reputed poet in Sanskrit and Oriya literature. But unfortunately none of his work in Sanskrit has been discovered as yet. From a stanza of Gaṅgādhara Dāsa quoted in the S.K.[11], it is clear that he was the court poet of Narasiṁha Deva identical with the patron of Haladhara according to the mention of V.M.[12]

About the other names it may be said that Anaṅgabhīma was a synonym of the famous Gaṅga kings of the Khemundi kingdom in the Ganjam district whose real name remains to be discovered. Similarly the real name of the king of Madhupur in the district of Cuttack whose title was Narendra is now lost into oblivion.

Nothing is known about the author Anaṅga Bhramaravara. Gajapati Mukunda is Mukunda Deva, the patron of Kṛṣṇa Dāsa as stated earlier. Rāmacandra (1568-1600 A.D.) is identical with the grandfather of the patron of the poet. The Gajapati Pratāpa Rāya and Rudra Rāya are two other names of Gajapati Pratāpārudra Deva (1497-1534 A.D.), Menakā Deī and Kamalāpāta Mahādevī are two Oriya female writers about whom no information is available.[13]

From the above discussion it is evident that the poet Haladhara was the court poet of Gajapati Narasiṁha Deva who had introduced a new Car festival of Lord Jagannātha observed during the spring season, sometime about 1632 A.D.[14] and the poet composed his Mahākāvya to commemorate that occasion after the actual performance of the festival by or around 1635 A.D. Hence the time of the poet Haladhara Miśra may with some certainty be fixed at 1611-1647 A.D.

Works of the author :

The poet Haladhara Miśra, besides Vasantotsavamahākāvya had written at least two other works namely Saṅgītakalpalatikā and Haladhara Saṁhitā out of which the first work is a treatise on the science of music and the second is a combined work of Smṛti and Jyotiṣa. They are briefed here for information of the scholars.

(a) Saṅgītakalpalatikā :

Saṅgītakalpalatikā or Kalpalatikā as discussed earlier is a part of the V.M., the third canto of which contains major portion of this work and is named as Saṅgīta-nirūpaṇa. It is divided into 18 Stavakas or chapters seven of which are devoted to Gīta, ten to Nṛtya and one to Vādya. The subjects discussed therein are — Śuddha gīta,

11. Saṅgītakalpalatikā, P.87.
12. V.M., 1.2.12.
13. A Descriptive Cat. of Sanskrit Mss, Vol. II, P. CXXXIII.
14. Saṅgītakalpalatikā, Intr. Page 6.

Chāyālaga, Kṣudragīta, guṇa, Doṣa, Rāga, Svara, Vādya, Nṛtya, Nṛtya hasta, Nṛtya Śira, Nṛtya-dṛṣṭi, Nṛtya bhrūkarma, Sthānaka, Aṅgasañcāra, Karaṇa, Sthāpaka and Vādya. According to the scholars this treatise is a notable contribution of Orissa to the Indian musicology. While Gītaprakāśa of Kṛṣṇa Dāsa throws light on the different facts and various aspects of Gīta only, the S.K. does so in respect of the entire field of Saṅgīta, viz. Gīta, Vādya and Nṛtya, the acknowledged components of Indian music.[15]

The author has quoted the following authorities in the S.K. to make it more authentic. The authorities are Kṛṣṇa Dāsa, Narasiṁha Deva, Harihara Prakāśa, Rāmānanda Rāya, Jayadeva, Śankaragīta, Gajapati Mukunda Deva, Bāṇanagara Haricandana, Anaṅgabhramaravara, Rāmacandra Deva, Bhanumati Devī, Anaṅgabhīma, Gaṅgādhar Dāsa, Viśvambhara Nṛpa, Rudrarāya, Madhupura Narendra and Kamalāpāta Mahādevī.

(b) Haladhara Saṁhita :

Haladhara Saṁhitā a combined work on Smṛti and Jyotiṣa is divided into 12 chapters. This work also begins with the same benedictory verse as in other two works. The work deals on Rāśīnāma, meṣādinirṇaya, nakṣatra-vārādiśuddhi, Puspavatyādi-nirūpaṇa, Vivāha-śubhāśubha Yoga, Jātakarmādi Saṁskāra, Gṛhārambha, Yātrārambha, Riṣta, ravyādi śúbhā śubha yoga, ṣadaṅga, sadvarga etc. The author after benedictory verse speaks in the following manner —

अमू वसुगतदुःखे संप्रवृत्तोऽपि सन्त:
परकृतमपराधः सर्वदा यत्क्षमन्ते ।
स्वपररचितपद्यैः संहितां कर्त्तुमिच्छोः
मम तदखिलमन्तुं क्षन्तुकामा भवन्तु ॥[16]

The work still remains in manuscript form awaiting to see the light.

C) **Vasantotsava Mahākāvya**

The work V.M. has been divided into 22 cantos. The topics and names of the Cantos are –

1) Puruṣottama praveśa 2) Rājanīti varṇana 3) Saṅgita-nirūpaṇa 4) Svapna darśana 5) Yātrānirṇaya 6) Haragourī Puri praveśa 7) Puri varṇana 8) Devālaya praveśa 9) Śastralakṣaṇa 10) Antapuraḥ praveśa 11) Rathaghaṭana 12) Yātrika Prasthāna 13) Sadṛtu varṇana 14) Vanavihāra 15) Jalavihāra 16) Candra varṇana 17) Dūti prasthāna 18) Surata varnana 19) Prabhāta varṇana 20) Guṇḍicā Maṇḍapa praveśa 21) Horā-varṇana and 22) Parivartana Guṇḍica-varṇana respectively.

---

15. Sangītakalpalatikā, Ed. Sri N. Panigrahi, Orissa Sangita Nataka Akademis, Bhubaneswar, 1984.

16. OSM-MSS, No. Db/293.

The work contains 1970 verses composed in 121 different metres (as per the index). No doubt in form and nature it is a mahākāvya, but the poet deals with the topic of each canto more as a scientist than as a poet. In the second canto the poet describes the state craft (administration), daily duties of a king towards his subject and examination of royal food according to the scripture of Śukranīti. The third canto is the biggest one of the work and describes the science of gīta, vādya and Nṛtya (saṅgīta) with their various techniques in detail. In the fourth canto the way of retirement to bed in the night and the wood in which the bed of a king to be prepared have been discussed along with the science of dream. The sixth canto deals with the good and bad omen of a royal procession and different kinds of elephants and horses to be utilised for the purpose in detail.

The poetical description of Nīlācala Purī and the technique of preparation of images of gods and goddesses have been described in the seventh and eighth canto respectively. In the ninth canto various kinds of weapons and in the tenth canto 'Sāmudrikavidyā' have been discussed. The Car festival in subsequent two cantos have been elaborately described. Then the beauty of the six seasons and the forest, the water sports, the moonlit night and the condition of love-striken women have been vividly described from the thirteenth to seventeenth cantos. The eighteenth canto deals on the features and characters of men and women and their love-plays with related matters according to the erotic science. The nineteenth canto entirely devoted to describe the beautiful picture of the morning.

The twentieth canto deals on prosody in which the verses have been composed as examples of 27 samavṛtta, 7 arddhasama vṛttas (Puṣpitagrā, Mālabhāriṇī, Sundarī, vegavatī, Hariṇaplutā, Aparavaktrā and Upacitrā), 5 viṣamavṛttas (Udgatā (2), Lalitā, Saurabhaka and Vaktra), 9 mātra vṛttas (pathyā, gīti, vipulā, upagīti, udgīti, āryā, vaitālīya, aupachandasika and pajjhatīkā) and 3 gadya vṛttas (cūrṇaka, utkalikā and vṛttagandhī). In Daṇḍaka five verses (V-121-125) have been composed.

After description of ritual observation and function of Herā or Horā on the fifth day of the car festival and the quarrel between Lakṣmī and Nārāyaṇa in the twenty first canto, the poet concludes the mahākāvya in twentysecond canto in which the return journey of Lord Jagannātha and union between Lakṣmī Nārāyaṇa in the Nīlācala temple has been described.

The poet has referred some of the renowned works of Orissa composed prior to him in this V.M. which are noted below with the number of the canto and the verse in the bracket noted against each for information of the scholars.

The Gītagovinda (3/103) is a famous gītakāvya (Prabandha) by Kavirāja Jayadeva (1147-1170 A.D.) who took his birth in the village of Kenduli (Kinduvilva) situated on the bank of the river Prāchī in the district of Puri. He was the son of Bhojadeva and Vāmā Devī who were the devotees of Mādhava Viṣṇu. The saint poet Jayadeva was an ardent devotee of Lord Jagadīśa i.e. Jagannātha. He composed his immortal work Gītagovinda in praise of Lord Jagannātha of Purī. He was singing the melodious songs of his Gītagovinda and his wife Padmāvatī danced to its tune before Lord Jagannātha till the end of his life at Puri. This is a small work divided into 12 cantos, 24 songs and 72 or 77 verses. This being a unique work in the history of Sanskrit literature has influenced the art and literature of India since the beginning of the 13th Century A.D. It has been profusely quoted in the works like Dharmaśāstras, Sangīta śāstras and Alaṅkāra śāstras of Orissa.

The Gopagovinda (3/103) is also a Gītakāvya by Kaviratna Puruṣottama Miśra, a court poet of Jagannātha Nārāyaṇa Deva (1648-1664 A.D.) the ruler of Pāralākhemuṇḍi, in the district of Ganjam. Kaviratna was a great poet, a musecologist and a commentator like Mallīnātha.[17] He was the first commentator of Haṃsadūta by Rūpagosvāmī a famous Vaiṣṇava poet of Bengal. His work Gopagovinda which was composed in imitation of the Gītagovinda has been referred to as an example in his work 'Sangītanārāyaṇa'.[18] This was a treatise on music composed during 1650 A.D. and was attributed to the name of his patron. The other two works named Gītakṛṣṇa (3/107) and Jaya (3/107) mentioned in the V.M. have not been traced so far.

The poet has also noted the names of various persons and places some of which are arranged below with the number of canto/verse in the bracket shown against each —

Abhinava Indradyumna (1/5), Ambarīṣa (4/30), Āyuṣputra (4/37), Āaila (4/31), Balagandi (20/148), Bali (4/29), Bhadrasena (2/25), Bharata (3/124), Bhārgava (3/16), Caidya (4/28), Dayitā (non-Brahmin worshippers of Jagannātha) (20/153), Daṇḍakya (4/30), Dinakara (22/54), Duratha or Viduratha (2/42), Guṇḍicā (1/10), Haladhara (22/54), Horā or Herā (21/1), Jārathya (2/43), Kapileśvara (Gajapati king) (22/56), Kālabhūpati (4/28), Kālapṛṣṭha (20/89), Kāśirāja (2/42), Kaśyapa (2/18), Kumbhayoni (4/31), Khurudhā (Kingdom of Bhoi dynasty) (5/43), Kauśika (4/28), Maithila (4/23), Maucukundi (4/28), Nārada (3/98), Nīlaśaila (1/5), Nṛsiṁha (1/8), Padmāvatī (22/54), Parikṣita (4/31), Pṛthu (4/37), Puruṣottama (1/6), Rāma (4/29), Rāmacandra (1/3), Raiṇukeya (4/24), Śambhukara (22/54), Sauvīra (2/43), Sumeru (3/136), Vatapi (4/31), Vātsyāyana (18/79), Vairathya (2/43), Viśvakarmā (4/9), Viśvanātha (20/120) etc. These names have found mentioned more than once in the V.M. as and when needed in the topic.

17. Orissa Historical Research Journal, Vol. , 19 , P.

18. Sangitanarayana — Orissa Sahitya Akademi, Bhubaneswar, 19 , P. 73.

Srī Jagannāth has been prayed in the name of Dārubrahma (1/5), Govinda (1/7), Lakṣmīpati (1/10), Lakṣmīvilāsa (1/12), Mukunda (1/19), Jagadvidhāta, Jagadekapātā, Jagatpraśastā (1/25), Mahīmaheśvara (1/49), Rameśa (1/47), Viśvāvāsa, Īśa (2/2), Padmapatrāyatakṣa (4/41), Dayānidhi (5/14), Gadādhara (5/24), Jagatpati (5/26), Keśava (5/27), Jagadguru, Kṛpākara, Sureśvara (5/28), Daśāsya candrarāhu (5/31), Janārdana, Murāri, Śauri, Advaya (5/32), Viṣṇu (5/34), Veda, Vedāṅga (5/36), Upendra, Mukunda, Kṣamāmbudhi, Yādava, Mādhava (7/11), Nīlaśailādhipati (7/44), Lakṣmīnivāsa, Bhuvanapati, Srīpati (12/36,37), Jagadīśa, Ramādhipa (20/62), Gopaveśa, Pītavāsa (20/108), Jagannātha (22/15), Gokulānanda, Parama, Paramātmaka (22/17), Rādhākeli kalāśālin (22/19), Jagaddhara, Ramānātha, Jagadādya (22/31), Mahābāhu (22/33), Hṛṣīkeśa (22/41) etc. which express the poet's earnest devotion to Lord Jagannātha.

The Vasantotsavamahākāvya contains almost all aspects of a standard mahākāvya as defined by the various rhetoricians of India. Leaving apart the descriptions of various technical aspects the work has incorporated strikingly beautiful narrations of nature and expresses varied emotions suitable to the situations as depicted in similar other works of sanskrit. In the pages of the V.M. ample evidences to this can be found.

Editorial Note :

The present edition of the Vasantotsavamahākāvya has been prepared out of a single worm-eaten and broken palm-leaf manuscript. The editing and preparation of the press copy of the work, as it was felt urgently, could not be done satisfactorily. As such various lapses crept into it. It is regretted that in spite of the sincere efforts printing could not be free from mistakes which could have been avoided. The printing mistakes and the blank portions due to worm eaten condition of the manuscript could not be corrected and filled up. They will be rectified in subsequent printing of the work in future. The scholars are requested to bear it as the work was published in stipulated period of time.

I thank all concerned who have sincerely taken due steps in bringing out this work to light.

Snāna Pūrṇimā
The 15th June, 1992

Bhagaban Panda
Editor

वसन्तोत्सवमहाकाव्यम्

विषयसूची

सर्गः	विषयः	पत्रम्
प्रथमः	पुरुषोत्तमप्रवेशः	१
द्वितीयः	राजनीतिवर्णनम्	६
तृतीयः	सङ्गीतनिरूपणम्	११
चतुर्थः	स्वप्नदर्शनम्	६५
पञ्चमः	यात्रानिर्णयः	६९
षष्ठः	हरगौरीपुरीप्रवेशः	७४
सप्तमः	पुरीवर्णनम्	८३
अष्टमः	देवालयप्रवेशः	८८
नवमः	शस्त्रलक्षणम्	९३
दशमः	अन्तपुरः प्रवेशः	१०१
एकादशः	रथघटनम्	१११
द्वादशः	यात्रिकप्रस्थानम्	११६
त्रयोदशः	षड्ऋतुवर्णनम्	१२०
चतुर्दशः	वनविहारः	१२७
पञ्चदशः	जलविहारः	१३२
षोड़शः	चन्द्रवर्णनम्	१४०
सप्तदशः	दूतीप्रस्थानम्	१४७
अष्टादशः	सुरतवर्णनम्	१५४
ऊनविंशः	प्रभातवर्णनम्	१७०
विंशः	गुण्डिचामण्डपप्रवेशः	१७५
एकविंशः	होरावर्णनम्	१९४
द्वाविंशः	परिवर्त्तनगुण्डिचावर्णनम्	१९८

वसन्तोत्सवमहाकाव्यम्

प्रथमः सर्गः

श्री गणेशाय नमः

कटीतटपटीकृतायतगजाजिनो धूर्जटिर्जटापटलमण्डितस्त्रिपुरखण्डने पण्डितः ।
दुरुत्तरभरातुरावनीकृतावनो मे मनो विनोदभरभूर्विभुः सपदि सन्निधत्तां हृदि ॥ १ ॥

प्रभो भवभवाधिपस्मरहरक्षमासागर प्रपन्नजन(भा)वन प्रसभदुःखविध्वंसन ।
मुरारिरसमाधुरीपरिचिते नवे गुण्डिचाविनोदभरवर्णने मम मनो यथा तत्कुरु ॥ २ ॥

पुरा किल धरातलेऽखिलविपक्षकक्षानलो निरन्तरधरासुरप्रकररक्षणे दक्षिणः ।
दयानिधिरुदायुधोऽजनि स रामचन्द्राभिधो[1] विधोः पदसरोरुहद्वितयदत्तचित्तो नृपः ॥ ३ ॥

सदा[2] किल जलाशयाः सुकमलारणत्कोकिलावनी मुनिमनोविनोदनकरीधरामण्डले ।
हया अपि मनोरया गतभया विशालोदया इभा अचलसन्निभा भुवनदुर्लभा यस्य तु ॥ ४ ॥

दारुब्रह्मप्रबलसुकृतान्निर्गतोपाधिलब्ध्वा विष्णोराज्ञामपि मम तनुमत्रजसोन्मीलयेति[3] ।
इन्द्रद्युम्नो नव इति यशः प्राप योऽस्यातिदिव्यां नव्यां भव्यां नयनसुखदां नीलशैले निवेश्य ॥ ५ ॥

तस्यात्मजः क्षितितले पुरुषोत्तमाख्यः साक्षात् पयोरुहसुजातदलायताक्षः ।
कन्दर्पदर्पदलनो निजदेहकान्त्या सन्तापयन्नरिगणानवनीश्वरोऽभूत् ॥ ६ ॥

यो राज्यं तु विपक्ष पक्ष शचि[4] ...... विति सेमुषोपरिगतो भूदेव सेवापरः ।
श्रीगोविन्दपदारविन्दयुगलध्यानावधानार्चना सेवाभूषणभावनादिकुतुके दिष्ट्यान्तमाप प्रभुः ॥ ७ ॥

---

१ । यवनेश्वरस्य   २ । श्रूयते   ३ । प्रकाशयति   ४ । पाठः कीटदष्टः

तस्याङ्गजोऽवनीतलेऽखिलधर्मसेतुः श्रीमन्नृसिंह इति गोद्विजशर्महेतुः ।
दुर्द्धर्ष दुर्विसहशात्रवधूमकेतुः स्वप्नेऽपि योऽनृतमभाषत नैव जातु ॥ ८ ॥

चित्तं यस्य मुरारिपादकमले वित्तं द्विजातिस्थले
कर्णौ दत्तपुराणपूरुषकथागाथाकृतार्थीकृतौ ।
कीर्त्तिः कोटि शरन्निशापति समामूर्त्तिर्मनोजोत्तमा
वृत्तिर्नित्य····· मनो[1] स्फुर्त्तिः सदुल्लासिनी ॥ ९ ॥

येनाकारि मुरारिचारुचरणद्वन्द्वारविन्दात्मना
यात्रा चैत्रविलक्षपक्षविहिता लक्ष्मीपतेर्गुण्डिचा ।
या मोहादथवा भयादृतवसुत्रासात्पुरा नो कृता
वर्य्यैः सूर्य्यशशाङ्कवंशजनृपैः शास्त्रार्थविज्ञैरपि ॥ १० ॥

अथाजगाम स्मरदुर्निवार घोर ज्वरै जर्जरिताङ्गभाजाम् ।
विप्रोषितानामधिकार्त्तिहेतुर्निदाघकालो ज्वलदर्कभासाम् ॥ ११ ॥

तत्रापि यात्रामथ वीक्षितुं तां लक्ष्मीविलासस्य च गुण्डिचाख्याम् ।
नीलाचलं विश्वनिवासवासं समाजगामाशु नृसिंहदेवः ॥ १२ ॥

यत्रातिवेत्रावलिपातपात्रं सूत्राममित्रप्रमुखा अमर्त्त्याः ।
मर्त्त्याश्च यत्र क्षणमात्रदत्तचित्तादिवं न स्पृहयन्ति जातु ॥ १३ ॥

पश्यन्ति विश्वेश्वर तुल्यरूपान्मर्त्त्यानमर्त्त्या अपि यत्र नित्यम् ।
गदारिसङ्खाम्बुजपाणिपद्मान् पद्मालयान् पद्मदलायताक्षान् ॥ १४ ॥

यत्र क्षणं सवसतां जनानामेषा व्यवस्था श्रुतिजातजाता ।
ये तत्र नित्यं निवसन्ति मर्त्त्यास्ते के पुनस्तानपि ते विदन्ति ॥ १५ ॥

भूमण्डलीमण्डनकारिहारि क्षेत्रं यदाश्रित्य तदेव वारि ।
हीलावणं दुष्कृतजातदारि विलोकनादेव चराचराणाम् ॥ १६ ॥

१। पाठः कीटदष्टः

आस्ते समस्तेशपदारविन्दमुद्राङ्कितं सैकतमेव यत्र ।
यद्वीक्ष्य लोकः क्षतपातयातो नातोऽपि नाकं सुखहेतुमेति ॥ १७ ॥

व्युत्पत्तिरेषा विफलैव यत्र दुरात्मनां शंखनतीति शङ्के ।
दुरात्मनां बाप्यथ वेतरेषा महर्दिवं शंतनुते यतोऽसौ ॥ १८ ॥

हासावहासी[1] कृतकुन्दबृन्दः कूर्मोन्नताह्लादिपदारविन्दः ।
बन्दारुबृन्दारकबृन्दबन्द्यः प्रपन्नदुःखाभिभवो मुकुन्दः ॥ १९ ॥

गताङ्कसम्पूर्णशशाङ्कवक्त्रः प्रभाजितानेकसहस्रमित्रः ।
बक्षःस्थलोद्यत्कमलाकलत्रः सदाग्रभूव्यग्रसुवर्णपत्रः ॥ २० ॥

नित्योत्सवानन्दितभृत्यलोकः पाञ्चालपुत्रीहृतभूरिशोकः ।
शोकार्त्तिजीर्यद्गुरुदत्ततोकः प्रपन्नभीमार्त्ति-विनाश एकः ॥ २१ ॥

जगत्त्रयीरक्षणवद्धकक्षः सुजातपाथोजदलायताक्षः[2] ।
आभीर नारी-सुखदान-दक्षः पृथातनूजन्मनिवद्धसख्यः ॥ २२ ॥

भूमण्डलीमण्डनरत्नभूतः क्षमाकरो धर्मसुतैकदूतः ।
महेन्द्रचन्द्रादिसुरौघगीतः स्फुरत्पदाम्भोजयुगो न भीतः ॥ २३ ॥

विश्वम्भरासंहृतभूरिभारः प्रणीतदुर्वृत्तजनापहारः ।
कृपानिधानो जगदेकवीरस्त्रिलोकभूत्यै रचितावतारः ॥ २४ ॥

नैतद्विचित्रं शतपत्रनेत्रो गोत्रातपत्रो भुवनैकमित्रः ।
जगद्विधाता जगदेकपाता जगत्प्रशास्ता किल यत्र चास्ति ॥ २५ ॥

मत्स्यध्वजार्द्धेन्दुदराब्जवज्रेखात्रिकोणादिकचिह्नहारि ।
तदीशितुः पापविदारि वारि जन्मोज्ज्वलं पादत ···[3] ॥ २६ ॥

मयि प्रदीप्तेऽपि विकासिपादपद्मं तु धिङ्मामिति खिन्नखिन्नः ।
इतीव किं पंक्तिकलः कलावान्नखछलात्पादतलं प्रपन्नः ॥ २७ ॥

ऋते तु यस्याङ्घ्रियुगस्य सेवां के वा हि देवा अधिकारभाजः ।
धातापि वाताहत पत्त्रकम्पो निदेशतोऽहं न पुनश्चूतः स्याम् ॥ २८ ॥

---

१ । सप्तभिः कुलकम् २ । पाथोजद्यलायताक्षः ३ । पाठः कीटदष्टः

पद्मापि पद्माधिकचारुगन्धा पद्मानना पद्मदलायताक्षी ।
यत्पादपद्मद्वयदत्तचित्ता लोकस्य माताऽजनि सा किमन्यत् ॥ २९ ॥

यत्पादपद्मं स्मृतिमात्रसौख्यं मनोऽपि जानाति न चान्यदेव ।
यैरीक्षतेऽनुक्षणमेव साक्षाद्वा न जानन्ति[1] तदीयशर्म ॥ ३० ॥

चारुरुजङ्घायुगलं धरायाः सारं स्फुरद्वृत्तमनुक्रमेण ।
अवाङ्मुखस्याङ्घ्रिसरोरुहस्य म्लानस्य नालं किमु हास्यचन्द्रात् ॥ ३१ ॥

उरुद्वयं हारिविदारिभूरि घोरैनसां पादजुषां जनानाम् ।
भवार्णवे संचरणप्रतारहेतुः किमुस्तम्भयुगं कदल्याः ॥ ३२ ॥

सुजातपीताम्बरसम्भृतोरुनितम्बविम्बं जगदेकबन्धम् ।
अनेक रत्नोज्ज्वलतुलबन्धभूभूरिभाराभिभवाय भूयात् ॥ ३३ ॥

नाभीगभीराभवभारहृत्यै भूयाद्विभूत्यै च सतां सदैव ।
संसारकालानलकोलमालाकलालितानां किमहो सुधान्धुः ॥ ३४ ॥

भूयादियं षट्पदपुञ्जमञ्जुरोमावली सर्वजगद् विभूत्यै ।
भवान्धकारान्धितमर्त्यतारहेतुः किमिन्द्रोपलयष्टिसृष्टिः ॥ ३५ ॥

आजानुपीनोज्ज्वलवृत्तहारि बाहुद्वयं लोचनशर्मकारी ।
स्तम्भद्वयं जम्भविपक्षरत्नविनिर्मितं वात्रजगद् विधृत्यै ॥ ३६ ॥

विसारिहारावलिहारिभूरि नव्यप्रसूनावलिधारिवक्षः ।
भृत्यौघघोराघनिवारणाय किमिन्द्रनीलैर्घटितः कवाटः ॥ ३७ ॥

नव्यप्रवालावलिपुष्पजात सुजातभूषा परिभूषिता सा ।
ग्रीवाविभूत्यै करचुम्बिकम्बुसौन्दर्यसर्वंकषगर्वभारा ॥ ३८ ॥

कुन्देन्दुमन्दारविकासिकासनीहारहारद्युतिहारि हासः ।
सिन्दूरसन्दोहमनोज्ञदन्तचेलोज्ज्वलः कोऽपि शुभाय भूयात् ॥ ३९ ॥

सत्त्कप्रभाभासुरसूक्तिमुक्तमुक्तावलीमञ्जुलदन्तपन्तिः ।
इषद् विकाशाढ्यतिलप्रसूनगर्वौघसर्वंकषनासिका च ॥ ४० ॥

---

१ । साक्षात् एव जानन्ति

बालानीलासक्तनवार्कमुक्तमन्दातपोद्यच्छतपत्रनेत्रम् ।
मार्तण्डकोटिस्फुटकर्णभूषा भासाज्वलद् गण्डतलं विभूत्यै ॥ ४१ ॥

रोलम्बमानाकुलपारिजातप्रसूनसाराकलितावतंसः ।
किञ्चिच्चलन्मञ्जुलचिल्लिबल्लिभङ्गी च भूयाद्भवभूरिभूत्यै ॥ ४२ ॥

अर्द्धक्षपानाथललाटपट्टमध्यस्फुरन्मञ्जुलचित्रचित्रम् ।
किञ्चिच्चलभ्रूभङ्गिवलीविलासा लीलालकाश्चापि[1] भूवः शुभाय ॥ ४३ ॥

सुस्निग्धनीलातिघनोर्मिशालिकेशप्रदेशाकलिताबचूलः ।
सुत्रामरत्नाञ्जनभृङ्गपुञ्जविनोलकञ्जोदरसुन्दराङ्गः ॥ ४४ ॥

एकैककूपोदरसारिहारि विराजदेकैकतनूरुहौघः ।
पद्ममुखाम्भोजमरन्दविन्दुसन्दोहभृङ्गो जगतां शुभाय ॥ ४५ ॥

तत्र मित्रशतसम्भृतो नुतः प्रोज्ज्वलाननरुचिः शुचिस्मितः ।
प्राविवेश सहसा मनोज्वलो भ्रातृभिः सह महीमहेश्वरः ॥ ४६ ॥

तदनुमदनकोटिप्रोज्ज्वलाङ्गरथाङ्ग-
प्रवरकरकराग्रस्वाग्रभूव्यग्रपत्रम् ।
अमलकमलनेत्रं मित्रकोटिप्रकाशं
सवलमवलु लोके नीलशैले रमेशम् ॥ ४७ ॥

इति श्रीहलधरमिश्रविरचिते वसन्तोत्सवमहाकाव्ये श्रीपुरुषोत्तमप्रवेशो नाम प्रथमः सर्गः ।

१। लीलाककाश्चापि

द्वितीयः सर्गः

आसीद् यात्रा गुण्डिचाख्यातिचित्रा गोत्रानेत्रानन्दसन्दोहदात्री ।
दृष्ट्वा हृष्ट्वा यामथो वीतशोका लोका मुक्ता[१] नापि रक्ता भवन्ति ॥ १ ॥

तस्यां विश्वावासमीशं समीक्ष्य क्षोणीनाथो हारि पाथोजनेत्रः ।
पूर्णानन्दः कुन्दमन्दारहासो मन्दं मन्दं मन्दिरं प्राविवेश ॥ २ ॥

त्यक्त्वा मायान्नित्यरक्तान् गृहेभ्योऽभ्यङ्गस्थानं मङ्गलावास आशु ।
स्मारं स्मारं चेतसा विश्वबन्धोर्यात्रा प्राप प्रोलस[२] न्नेत्रयुग्मः ॥ ३ ॥

आप्ता आपुस्ते तदानीं विनीताः क्षोणीभर्त्तुर्मन्दमन्दं[३] समीपम् ।
भृत्या नित्यासक्तचित्ता स्वकृत्ये रक्ता एतैर्लक्षणैर्लक्षिता ये ॥ ४ ॥

विद्यौदार्यस्थैर्यशौचाभिजात्यैः सत्यारोग्यौजोदयाविक्रमैश्च ।
युक्ताः शाठ्य[४]द्रोहपैशुन्यमिथ्यालोल्यैस्त्यक्ता भूपभृत्याः प्रदिष्टाः ॥ ५ ॥

कृत्यं चैषास्थानमासाद्ययुक्तं तिष्ठन्त्यर्त्तुर्द्राक् यथा कालमेव ।
सेवां कुर्यादप्रमत्तोऽतिनम्रो मौनी नित्यं वाचि विन्यस्तकर्णः ॥ ६ ॥

भर्त्तुः पुत्रैर्वल्लभैर्नैवमित्रैः साकं कुर्याद् विग्रहं ते ह्यकस्मात् ।
हासेनैव घ्नन्ति तान् हन्तरुष्टास्तस्मात् युक्तास्तैः सहप्रीतिरेव ॥ ७ ॥

आस्यं भर्त्तुर्लोकयन्नेव तिष्ठेद्दृष्टिं नैव प्रक्षिपेदन्यतोऽपि ।
कोऽत्रास्तेऽहं भो समाज्ञापयेति ब्रूयादाज्ञां[५] चापि शक्त्याचरेच्च ॥ ८ ॥

चित्तं भर्त्तुर्द्राक् प्रविशाति नम्रः प्रश्ने दद्यादुत्तरं युक्तमेव ।
नाकल्याण चिन्तयेच्चेतसापि स्त्रीभिर्द्विड्भिश्चैकचर्यां च जह्यात् ॥ ९ ॥

वाचं ब्रूयात् कोऽपि रक्षां न तस्मिन् जह्यान्यानार्होऽपि मानं ग्रहं च ।
लोभं दम्भं[६] चैव मायामसूयां क्रोध स्तेयं मत्सरं चाक्षमां च ॥ १० ॥

उच्चैर्यावानेव नीचैर्वदेत्तन्नापृष्टः सन् व्याहरेत् किञ्चिदेव ।
नो पृष्टेऽपि व्याहरेत्कार्यवाधे तथ्यां पथ्यां वाचमुच्चै रजस्रम् ॥ ११ ॥

१। मुक्तो
२। प्तोल्लसन्
३। भर्त्तुर्मन्दं
४। साठ्य
५। ब्रूयादाकां
६। दाम्भ्यं

अन्यस्यार्थं साधयेद्देशकालौ जानन् स्वार्थं त्वात्ममित्रेण नेत्रा ।
निस्वं चापि स्वं प्रभुं नैव जह्याद्दुःखार्त्तोऽप्यापत्सु यः सोऽपि भृत्यः ॥ १२ ॥

उच्चैर्हासं कासनिष्ठ्युतजृम्भपर्वस्फोटं चित्कृतिं गात्रभङ्गम् ।
जह्याद्भर्तुः कर्मगुह्यं च मन्त्रं नैव क्वापि ख्यापयेद् यच्च किञ्चित् ॥ १३ ॥

काले तस्मिन् चारसघा अथो द्राग्भर्त्तारं स्वं ते प्रविश्य प्रणेमुः ।
स्वं स्वं कृत्यं चोचुरुक्ता विविक्ते रक्तास्तत्तत्कार्ययुक्ता यथार्थम् ॥ १४ ॥

चारानेत्रे भूपतेर्यत्ततः स्यान्नित्यं चारप्रेक्षणोपात्तचित्तः ।
हीनस्तैश्चेदन्धवल्लोकवन्धुर्जीवन्नेव प्रैति नीतिः शितोक्ता ॥ १५ ॥

दक्षः शूरो देशभाषाप्रवीणः शुद्धो विद्वानिङ्गितज्ञः प्रगल्भः ।
तत्तक्षुत्तृट्क्लेशजिष्णुः स्मृतिज्ञश्चारः प्रोक्तः[1] भार्गवेणास्य कृत्यम् ॥ १६ ॥

प्राणाबाधे संप्रवृत्तेऽपि भर्तुः छिद्रं नित्यं गोपयेद्वैरिणस्तु ।
अन्येनैवोद्घाटयेद्वीक्ष्य कालं देशं मित्रं चापरं मध्यम च ॥ १७ ॥

मल्लैराप्तैर्मर्दनं चाथ हृद्यैस्तैलैस्तैस्तैर्यात्यदोर्न्मर्दितस्य ।
आखेटात्त्यकिर्षितस्यापि पार्श्वं रोगानेयः काश्यपैर्वा तुरङ्गाः ॥ १८ ॥

आत्तस्नानोऽथो विषघ्नाश्मधारी तोयैः पूतैर्वाससा निर्विषैस्तैः ।
आप्तैर्दत्तं द्राक् परीक्ष्यान्नजातं चेलासीनोऽभुक्त[2] विश्वस्तदत्तम् ॥ १९ ॥

धूम्याटा वा सारिका वा शुका वा प्राक्रोशन्ति प्रेक्ष्य भक्त विषाक्तम् ।
जीवं जीवोऽश्नानिमेति प्रकामं मत्तो नाशं कोकिलोऽप्यभ्युपैति ॥ २० ॥

संरज्येते द्राक् चकोरस्य[3] नेत्रे क्रौञ्चो माद्यत्येव तस्मात्तदन्नम् ।
क्षिप्त्वा वह्नौ संपरीक्षार्थमादौ पक्षिष्वप्यालक्षयेल्लक्षणानि ॥ २१ ॥

धूम्राहेतिर्वीतिहोत्रस्य रूपं नीलं शब्दस्फोटता चापि कापि ।
नैवाश्नन्ति द्राक् तथा पक्षिणस्तच्चेदश्नन्ति स्यात् विनाशोऽतिवेलम् ॥ २२ ॥

द्रव्यस्य स्यात् क्ष्वेड्दुष्टस्य मध्ये तूर्द्धवं रेखा सा तु नीला रसेषु ।
दध्नः श्यामाकोकिला [स्या] द्रुलस्य तादृङ् मद्यस्चापि दुग्धस्य ताम्रा ॥ २३ ॥

अन्नेषु स्याद् वर्णनाशो विशेषादस्निग्धत्वं शीतताव्यञ्जनेषु ।
द्राक् शुष्कत्वं मन्थने श्यामफेनाः फेनेष्वर्चिर्दृश्यते कापि धूम्रा ॥ २४ ॥

१। प्रोक्ता २। भुक्तं ३। चकोरकस्य

सामान्योऽयं भार्गवस्यापि सर्गः सर्वत्रापि स्पर्शगन्धो रसश्च ।
नश्यन्ति द्राक् कोमलत्व शराणां द्रव्याणां स्यात्कोमलानां च जाड्यम् ।। २५ ।।

वाक्विभ्रंशो जृम्भणं दिग्विलोकः शोषावेशौ श्यामता वेपथुश्च ।
स्वेदः कृत्ये स्वेनरस्थानमेतल्लिङ्गं ज्ञेयं क्ष्वेड़पानां प्रवीणैः ।। २६ ।।

तस्मादन्नं द्राक् चतुर्द्धा परीक्ष्य क्ष्माभृच्चर्व्यं चोष्यपेयं च लेह्यम् ।
अद्याद् यच्चान्यागतं तत्तु हेयं प्राणीयाद्वा संपरीक्ष्य क्षेमेशः ।। २७ ।।

भुक्त्वा भूपो मन्दमन्दं च किञ्चिद्भ्रान्त्वा स्वापं वामभागेन चक्रे ।
सौन्दर्यं तज्जायते स्वापतोऽल्पादारोग्यं यत् किञ्चिदेव भ्रमाच्च ।। २८ ।।

भुक्तः प्राज्ञो नोवसन्नैव धावेद्भुक्त्वा बातं यद्वसंस्तुन्दिलः स्यात् ।
धावन्मृत्युं चाश्रयेन्मानवोऽतो भुक्त्वा भ्रान्त्वा चाथ सुप्याद् विनिद्रः ।। २९ ।।

तत्ताम्बूलं कम्बुकण्ठोऽथ शश्वत् कर्पूरादिव्यापृतंद्राग्जघास ।
आप्तैर्दत्तंसन्ति यत्तत्र नित्य क्षोणीपृष्ठे ते गुणादुर्लभा ये ।। ३० ।।

आप्तैर्भूषा निन्विरे मुदितास्तास्तत्कल्पकैः संपरोक्ष्याथ भर्तुः
रत्नादीनां यत्परोक्षा सुरक्षा वर्णाभावो दूषितानां विषेण ।। ३१ ।।

[1]राजा भालास्ता विलोला विशालापाङ्ग्यो बालाहारिवेशं धरेशम् ।
उष्ट्रं वाजिप्रक्रियापुष्टिमिष्टं भुक्तस्मारद्रव्यजातं तदानीम् ।। ३२ ।।

रक्षासत्त्वैः हारनिहारहासाराजद्वेशाः शोधिताश्चानुरक्ताः ।
युक्ताः स्वैः स्वैः षण्डखर्वैः समन्तान्मारोन्मत्तायोषितो द्राक् समीयुः ।। ३३ ।।

प्राहुर्ब्रह्मानन्द तुल्यं व्यवायं तस्मिन्मूलं योषितः कामलोलाः ।
यत्ताभ्योऽदाच्छौचमिन्दुः सुरम्यां गन्धर्वागां सर्वभक्षत्वमग्निः ।। ३४ ।।

नो दुष्यन्ति स्वर्णदत्ताः पवित्रा मासं मासं यद्रजोऽघांसि हन्ति ।
योषाभूषा भूषयन्ति स्म सत्या नो वा शङ्के तास्तु ता भूषयन्ति ।। ३५ ।।

रक्तागाह्या नो विरक्ता कदाचित् यद्भूमीशं ता विनिघ्नन्ति पापाः ।
तस्मादादावप्रमत्तः परीक्ष्य क्षोणीवन्धुः स्वोपकण्ठे करोतु ।। ३६ ।।

[2]दृष्टवा कान्तं मन्दमन्दं कुचात्ता ह्रन्तः स्मेरा वस्त्रमस्यत्यकस्मात् ।
आलीलोलालिङ्गितस्वां च वाहामूलं पश्यत्याशु लज्जां च धत्ते ।। ३७ ।।

---

१ । युग्मकम् २ । युग्मकम्

इषद्वक्रं लोकते केशपाशं मुञ्चत्योष्ठं पीड़यत्याशु दन्तैः ।
अग्रे मन्दं याति चायाति नोपप्राया ज्ञेया सानुरक्ता विविक्ता ॥ ३८ ॥

कान्ते पश्यत्यादरेणापि दुष्टा स्पष्टं दृष्टिं चान्यतो[1] नश्यति[2] द्राक् ।
सुप्ता पश्चाद्बुध्यतेऽद्धा पराचिवक्त्रं मूढ़ाचुम्बने वारयेच्च ॥ ३९ ॥

यान्तं कान्तं नानुयाति प्रगर्वाद्दृष्टा हृष्टा नो भवत्येव पृष्टा ।
तुष्टां वाचं वक्ति नैवोपकारं धत्ते चित्ते सा विरक्ता प्रदिष्टा ॥ ४० ॥

गच्छेत्कश्चिन्नो विरक्ता निशान्तं यत्तद्वेश्मात्यन्तगुप्तः कनीयान् ।
भ्राता ज्येष्ठं भद्रसेनं जघान क्षोणीनाथ राज्यलोभाभिभूतः ॥ ४१ ॥

दत्वा लाजान् कापि हालाहलाक्तान् पापाकोपात् काशिराजं[3] जघान ।
वेण्यां शस्त्री काचिदासाद्य शेषाद्व्यादोर्ण्णं तं दूरथं चाङ्गनाथम् ॥ ४२ ॥

श्रीसौवीरं क्ष्वेड़दुष्टेन रुष्टा काञ्चोदाम्ना दर्पणेनापि कापि ।
वैरथ्यं तं हिंसकेन सुवशोत्तसं हन्ति स्माशु जारथ्यमन्दा ॥ ४३ ॥

यस्या निस्वासान् समासाद्य सद्यो जीवाभावो जायते मक्षिकाणां ।
द्राक् सा त्यज्या क्ष्वेड़कन्या यतोऽस्या सम्भोगः स्यात्स्मृत्यवे सत्यमेतत् ॥ ४४ ॥

भ्राजद् भूषाद्दानमानावधानैरीक्ष्याः साक्षात्प्राणनाथैर्मृगाक्ष्याः ।
इत्थं जीवो वक्ति नो रक्षिताश्चेन्नित्यं सत्यं सर्वनाशं दिशन्ति ॥ ४५ ॥

स्वातन्त्र्यं स्वे तातवासे निवासो नित्यं तीर्थारामयात्रा प्रसक्तिः ।
गोष्ठीपुंसां सन्निधावीर्षितं द्रागेषु स्त्रीणां यन्मनो लौल्यमेति ॥ ४६ ॥

मालाकारी नापिती द्रुष्टनारी कैवर्त्तं स्त्री चन्द्रिका गोपबाला ।
आभिः सार्द्धं वर्जयेन्नित्यसक्ति यस्मादेता दौत्यमायान्ति सत्यम् ॥ ४७ ॥

दूराद्दूरं कामुकानिन्द्रजालान् धूर्त्तान्भ्रूणानौषधिज्ञांश्च कुर्य्यात् ।
यस्मादेते वीक्षणादेवसाक्षात्कुर्युर्निध्ना मन्मथोद्दामरामाः ॥ ४८ ॥

आभिः सार्द्धं किञ्चिदासाद्य सद्यः स्नातो मन्दं चन्दनागारमागात् ।
तस्मिन् तत्तच्चन्दनालिप्तगात्रः स्वल्पां भूषामिन्द्रकल्पो व्यधत्त ॥ ४९ ॥

१। युग्मकम्   २। नस्यति   ३। कासीराजं

तदनुभुबनमेतत्तारतारैः करैस्तैः
प्रखरकरउदारैरारचक्ष्याति पुत्रम् ।
दिवसभयविषादं चक्रचक्रे समर्प्या-
परगिरिशिखरान्तं तान्ततान्तः ससाद ॥ ५० ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवमहाकाव्ये राजनीतिवर्ण्णनं नाम द्वितीयः सर्गः ।

तृतीयः सर्गः

अथो नरवरश्चन्द्रातपराजिविराजितम् ।
यथाविधि विधिं सान्ध्यं कृत्वा नृत्यालयं ययौ ॥ १ ॥

नृत्यकृत्यार्पितमना राज्यकार्याविरोधतः ।
स्यान्नृपो यन्मनो दृष्टि श्रुतिस्थैर्यं भवेदतः ॥ २ ॥

ततोऽङ्गना मानधनाः सङ्गीतार्थं तदग्रतः ।
विरेजिरे क्षणे नृत्यमदोषमपरं दिवम् ॥ ३ ॥

अथ गीतलक्षणमाह —

गीतं वाद्यं च नृत्यं च सङ्गीतं त्रितयं विदुः[१] ।
हृदाह्लादस्वरो गीतं[२] द्विविधं तन्निगद्यते ॥ ४ ॥

अनिबद्धं निबद्धं स्यादाद्यं तालादिवर्जितम् ।
आलप्तिरिति[३] नामास्य केचिदिच्छन्ति[४] सूरयः ॥ ५ ॥

परं तालादिसंयुक्तं निबद्धं कवयो विदुः ।
शुद्धं छायालगं क्षुद्रं त्रिधा तदपि कथ्यते[५] ॥ ६ ॥

आलापधातुमात्वङ्गसंयुक्तं शुद्धमुच्यते ।
आलापः सार्थकपदैर्भवेदत्रेति तद्विदः ॥ ७ ॥

प्रबन्धावयवो धातुः स च त्रिविध ईरितः ।
उद्ग्राह ध्रुवकाभोगैरुद्ग्राहः प्रथमे पदे[६] ॥ ८ ॥

मध्ये ध्रुवोऽन्त आभोगः कविनायक नामनी[७] ।
अत्र स्तः केचिदालापे प्रवदन्ति परे पुनः ॥ ९ ॥

धातु[८] रक्षरविन्यासो मातुस्तान[९]विशेषकः ।
तेनकस्तालपाटौ च[१०] स्वरश्च विरुदं पदम् ॥ १० ॥

षड़ङ्गान्यस्य तेनेति तेनका मङ्गलप्रदाः ।
आदितालादिकास्तालागाझा[११]धा धा धुगादयः ॥ ११ ॥

---

१ । त्रयं सङ्गीतमुच्यते
२ । स्वरैर्गीतं
३ । आलप्तिरपि
४ । दित्सन्ति
५ । कीर्तितम्
६ । प्रथमं पदं
७ । कविनेतृकौ
८ । मातृ
९ । धातुस्तान
१० । पाटौ च
११ । पाट

स्वराः षज्जादिसप्तस्युर्विरुदं गुणकीर्त्तनम् ।
सुप्तिङन्तं पद प्राहुरित्यङ्गानां च लक्षणम् ॥ १२ ॥

अङ्गानामादिमध्यान्तद्वित्र्यादिन्यासभेदतः ।
प्रबन्धा विविधास्तेषु दिङ्मात्रमिह सूचिता.[1] ॥ १३ ॥

अथैक[2]रागतालेन रागतानवहुत्वतः ।
बहुतालैकरागेण कर्त्तव्या वा यथेच्छया ॥ १४ ॥

केचिदाद्यादिकैस्तालैर्दशभिर्नवभिस्तथा ।
सप्तभिर्वापि[3] कथ्यन्ते प्रबन्धा रागरञ्जिताः ॥ १५ ॥

एकतालीं प्रबन्धान्ते तां गीत्वा त्वादिखण्डके[4] ।
मानमादि[5] कलायां स्यान्नामवर्णविभेदतः ॥ १६ ॥

षड़ङ्गामेदिनो स्वङ्गा नन्दिन्यर्द्धङ्ग दीपिनी ।
त्र्यङ्गा स्यात्पाविनी तारावलीद्यङ्गास्य जातयः[6] ॥ १७ ॥

अनियुक्तो नियुक्तश्च प्रबन्धो द्विविधो मतः ।
छन्दस्तालाद्यनियमा विनियुक्तः परः पुरः ॥ १८ ॥

तेषां नियमनात्तेतु पञ्चतालेश्वरादयः ।
नोक्ता विस्तरभीत्यातोऽनियुक्तोऽयं मयोदितः ॥ १९ ॥

नवादितालकालापशुद्धधातुविनिर्मितः ।
पाटादिरहितः सूड़प्रबन्ध एक रागवान् ॥ २० ।

इति शुद्धगीतप्रकरणम् ।

अथ छायालगमाह —

शुद्धस्य लगति छायां[7] यस्माच्छायालगो भवेत् ।
सूड़ो नामान्तरं चास्य केचित्सालग इत्यपि ॥ २१ ॥

---

१ । सूचितं
२ । तथैक
३ । र्वाथ
४ । प्रवन्धान्ते गीत्वा तस्यादि खण्डके
५ । मानमाद्य
६ । द्वयङ्गा तारावली ज्ञेया
द्वयङ्गास्याद्भावनी मता ।
षडङ्गा मेदिनी षट् स्युः
प्रवन्धानां तु जातयः ॥
७ । छाया

यतो बहूनां तालानां सूड़ एकत्र गुम्फनम् ।
ततोऽस्य तालमूलत्वात्तालान् प्रथमतो ब्रुवे ॥ २२ ॥

अस्य रूपमाह —

तालशब्दस्य निष्पत्तिः प्रतिष्ठावाचि धातुतः ।
गीतं वाद्यं तथा नृत्यं यस्मात्तस्मिन् प्रतिष्ठितम् ॥ २३ ॥

स्कन्दस्तकारोऽकारः स्याद्विष्णुर्लोमरुदत्यपि ।
अथवा तालयोर्घाताज्जात[1] इत्येव वा पुनः ॥ २४ ॥

तालाङ्गानाह —

अनुद्रुतं द्रुतं चापि लघुश्चैव गुरुः पुनः ।
प्लुत इत्थं क्रमेणैव तालाङ्गानि च पञ्चधा ॥ २५ ॥

ह्रस्वं लघुर्गुरुयुगं[2] गुरुर्लत्रितयं प्लुतः[3] ।
द्रुतं च व्यञ्जनं चानुद्रुतं चापि तदर्द्धकम् ॥ २६ ॥

प्लुतस्त्रिमात्रिको दीर्घो द्विमात्रश्चैकमात्रकः ।
ह्रस्वो द्रुत चार्द्धमात्रं द्रुतार्द्धं तु विराभकः ॥ २७ ॥

सानुस्वारश्च दीर्घश्च[4] विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्वस्तु पादान्तो वाऽपरो लघुः ॥ २८ ॥

तालघातप्रकारस्तु प्लुते त्र्यष्टाङ्गुलो गुरौ[5] ।
कलाङ्गुलो लघावष्टाङ्गुलो वेदाङ्गुलो द्रुते ॥ २९ ॥

द्रुतमंगुल युग्मं स्याल्लघुश्च चतुरंगुलः ।
वस्वंगुलो गुरुः केचित् प्लुतश्च द्वादशांगुलः ॥ ३० ॥

सशब्दश्चैव निशब्दो द्विधाघातोऽस्य कीर्त्तितः ।
प्लुतमूले सशब्दः स्यादेकोघातद्वयं ततः ॥ ३१ ॥

निःशब्दमनयोरेक ऊर्ध्वं यात्यपरस्त्वधः ।
गुरौ घातद्वयं तत्रादिमोनाद्य परोऽस्वनः ॥ ३२ ॥

---

१ । ताल
२ । लघुयुगं
३ । गुरुर्लघुत्रयं प्लुतं
४ । दीर्घी च (अधिक पाठः)
५ । प्लुतेऽष्टे द्वयङ्गुलो गुरौ

लघौ सशब्द एकः स्याद्द्रुते चैव तदर्द्धकम् ।
अनुद्रुते तदर्द्धं स्यादितिधातविनिर्णयः ॥ ३३ ॥

अथ तालान्याह —

चच्चत्पुटश्चाचपुटः षड्गता पुत्रकस्तथा ।
सम्पकर्ष्टाक उद्पट्ट आदितालश्च दर्पणः ॥ ३४ ॥

चर्च्चरी सिंहलीलश्च कन्दर्पः सिंहविक्रमः ।
श्रीरंगो रंगलीलश्च रगतालः परिक्रमः । ३५ ॥

प्रत्यंगो गजलीलश्च त्रिभिन्नो वीरविक्रमः ।
हंसलीलो वर्णलीलो राजचूड़ामणिस्तथा ॥ ३६ ॥

रंगो द्योतो राजतालः सिंहविक्रीड़ितस्ततः ।
वनमाली वर्णतालो मिश्रो रंगप्रदीपकः ॥ ३७ ॥

हंसनादः सिंहनादो मल्लिकामोदसंज्ञकः ।
अथोसरसलीलश्च रंगाभरण एव च ॥ ३८ ॥

ततस्तुरगलीलश्च स्यात्पुनः सिंहनन्दनः ।
जयश्रीर्विजयानन्दो यतितालो द्वितीयकः ॥ ३९ ॥

मकरन्दः कीर्त्तितालो विजयो जयमंगलः ।
राजविद्याधरो मण्ठो जयतालः सुदुर्वलः ॥ ४० ॥

ततो निःसारुकः क्रीड़ा त्रिभंगो कोकिलप्रियः ।
श्रीकान्ति[1] विन्दुमाली च समतालश्च नन्दनः ॥ ४१ ॥

उदीक्षणो मण्ठिका च ढेंकिका वर्णमण्ठिका ।
अभिनन्दोऽन्तर क्रीड़ा लघुतालश्च दीपकः ॥ ४२ ॥

अनंगो विषमो नान्दी मुकुन्दः कुन्दकोऽपि च ।
एकतालो च कङ्कालश्चतुस्तालश्चड्खुडो ॥ ४३ ॥

अनंगोराजझङ्कारस्तथैव लघुशेखरः ।
प्रतापशेखरश्चान्यो गजझम्पश्चतुर्मुखः ॥ ४४ ॥

---

१ । श्रीकान्तो

झङ्कार प्रतिमण्ठश्च तथा तालस्तृतीयकः ।
तस्मादुपरि विज्ञेयो वसन्तो ललितः शिवः ॥ ४५ ॥

करशाखश्च षट्तालो वर्द्धनो वर्णदस्तथा ।
राजनारायणस्तस्मादुत्सवः परिकीर्त्तितः ॥ ४६ ॥

मदनश्चैव विज्ञेयः पार्वती लोचनस्तथा ।
ततः शारंग तालस्यात्ततः श्रीनन्दवर्द्धनः ॥ ४७ ॥

लीलाविलोकितश्चान्यो ललितप्रिय एव च ।
जनकश्चैव लक्ष्मी गोरांगवर्द्धनसंज्ञकः ॥ ४८ ॥

इत्थमेकोत्तरशतं तालास्तिष्ठन्ति यद्यपि ।
तथापि सालगोक्तानां वक्ष्येऽन्येषां च लक्षणम् ॥ ४९ ॥

आदिर्यतिश्च निःसारको मण्ठोऽप्यथ झम्पकः ।
त्रिपुटाड्डौ रूपकैकताल्यौ सूड़े नवेरिताः[१] ॥ ५० ॥

कुडुकं च उपाड्ड़ं च केचिदत्र समूचिरे ।
अत्र सूड़ो[२] भवेदेकादशतालात्मकोऽपि च ॥ ५१ ॥

भवेदेकादशदशनवाष्टाति रसैरपि ।
तालैर्यथेच्छया कार्यं सूड़स्य ग्रथनं बुधैः ॥ ५२ ॥

आदिरेकेन लघुना गीतरञ्जकता यथा ।
तालाभक्ति[३]स्तथा कार्यान्नैषामावृत्तिनिर्णयः ॥ ५३ ॥

अत्र द्विखण्ड उद्ग्राह आभोगोऽपि तथाविधः[४] ।
मण्ठ लक्षणरीत्या तु ध्रुवे स्याद्ध्रुवकल्पना ॥ ५४ ॥

मात्रावान्तरखण्डस्य षोड़शाथ चतुर्दश ।
प्रान्तावान्तरखण्डस्य भंगी स्यादष्टमेऽष्टमे ॥ ५५ ॥

यतिर्लौद्रद्वयं चैव सा भवेत्त्रिपुटान्तरा ।
निःसारकान्तरा चैव शुद्धा चेति त्रिधा मता ॥ ५६ ॥

---

१ । लोके पञ्चताल इति संज्ञा
२ । अत्रः सूत्रो
३ । तालाबृत्तिः
४ । आभोगोर्द्ध द्विखण्डकः

मात्रावान्तरखण्डस्य चतुर्दश परस्य तु ।
द्वादश स्याद्भवेद्भंगी सप्तमे सप्तमे पुनः[१] ॥ ५७ ॥

द्रुद्वयं लद्वयं निःसारके[२] मात्रा चतुर्दश ।
अवान्तरस्य खण्डस्य प्रान्तावान्तरकस्य च ॥ ५८ ॥

त्रयोदशात्र भंगी स्यात् षष्ठे च दशमेऽपि च ।
षट्लघ्वण्र्णोच्चार कालो मात्रात्रेति च केचन ॥ ५९ ॥

मण्ठस्याल्लद्वयं गश्च चत्वारो लववोऽरवाः ।
अस्य बन्धादिकं वक्ष्ये रूपकस्य निरूपणे ॥ ६० ॥

निर्विरामद्रुतद्वन्द्वं विरामेति च केचन ।
लघु झम्पोऽथमात्रास्य[३] दशाद्यनतिविंशतिः ॥ ६१ ॥

अवान्तरस्य[४] खण्डस्य प्रान्तावान्तरकस्य तु ।
द्वित्र्युनास्य भवेद्भंगी पञ्चमे पञ्चमे पुनः ॥ ६२ ॥

द्रुतत्रयं विरामान्तं त्रिपुटः स्यद्गतेरिव ।
बन्धाद्यस्य परं भिन्नं गानलालित्यशिक्षया ॥ ६३ ॥

विरामान्तं द्रुतन्द्वद्वं लघुरड्डोऽस्यनामनी ।
शङ्कुशोलोऽथ शङ्कुः स्याल्लघोद्रुत युगेन च ॥ ६४ ॥

वीर शृंगारयोः शोलो करामान्ते द्रुते लघुः ।
शान्तेऽथ झम्पवत् बन्धो भिन्नं गानवशाद् भवेत् ॥ ६५ ॥

सविरामद्रुत द्वन्द्वाद्रूपकः प्रथमे कलाः ।
द्वादशैकादशप्रान्ते भवेद्भंगी रसे रसे ॥ ६६ ॥

एकतालो द्रुतैकेन बन्धः स्यादादि तालवत् ।
गानलालित्यतोभिन्नमितिधीश्च स्वतां भवेत् ॥ ६७ ॥

१। सप्तमेऽपि च

२। निःसारको

३। मात्रास्यात्

४। अथवान्तरस्य

एषां[1] प्रबन्धेष्वालाप युतेत्याहुः पुरातनाः ।
नवीनास्त्वग्रतोऽप्यस्याभिन्नमालापकं[2] विदुः ॥ ६८ ॥

कुडुक्को द्रुद्वयं लौच बन्धः स्यादादितालवत् ।
निःसारुकेण चेदैक्यं[3]स्याद्भिन्नो बन्धभेदतः ॥ ६९ ॥

उपाड्डस्तु द्रुतैकेन बन्धो रूपकवद् यतः ।
अतो विजृम्भते भेदः शृण्वतां चैकतालितः[4] ॥ ७० ॥

ध्रुवौ द्वौ यतिनिःसारौ मण्ठान्त्यौ[5] मण्ठलक्षणौ ।
आदिरूपकझम्पाड्डत्रिपुटाः स्युर्द्विलक्षणाः ॥ ७१ ॥

कुडुक्को मण्ठलक्ष्मा स्यादुपाड्डोऽपि द्विलक्षणः ।
अनयोः केचिदुभयलक्षणत्वं समूचिरे ॥ ७२ ॥

उद्ग्राह एव यत्रस्याद्ध्रुवः स ध्रुवलक्षणः ।
द्विर्द्विः खण्डद्वयं गेयं किञ्चिदुच्चैः पुरस्कृतः[6] ॥ ७३ ॥

ध्रुवे तु द्विगुणोमात्रा सार्द्धैकगुणिताथवा ।
उद्ग्राहाभोगयोस्तुल्या स भवेन्मण्ठलक्षणः ॥ ७४ ॥

तानक्रम[7] प्रकारेण केचित्सूडस्य गुम्फनम् ।
केचिद् यत्यादिकं निःसारुकाद्यं केचिदूचिरे ॥ ७५ ॥

आद्यादि मण्ठकान्तानां गानमादौ यथाक्रमम् ।
एकतालि भवेत्प्रान्तेऽन्येषामनियमः परे ॥ ७६ ॥

आदितालो भवेदादावन्ते स्यादेकतालिका ।
अन्येषां नियमाभावः केषांचिन्मतमीदृशम् ॥ ७७ ॥

चञ्चपुटे गुरुद्वन्द्वं लः प्लुतः प्रथमे दले ।
मात्रा चैकादश प्रान्तावान्तरेऽपि च तादृशी ॥ ७८ ॥

१। एषा
२। मालापनं
३। चैवैक्यं
४। चैकतान्वितः
५। मण्ठान्तौ
६। परंस्मृतः
७। तालक्रम

भङ्गी षष्ठे शुक्लवर्ण्णः सद्योवक्त्रसमुद्भवः ।
ततः[1] परं तु ये तालास्ते प्रोक्ता मण्ठलक्षणाः ॥ ७९ ॥

गौलौ चाचपुटश्च षट्षण्मात्रादलद्वये ।
तेनास्यदलगैर्मात्रा[2] पञ्च पञ्च दलद्वये ॥ ८० ॥

वादकाकुलताले तु द्वौ प्लुतौ लचतुष्टयम् ।
षट् संख्या गुरवो लौ द्वौ द्रुतद्वन्द्वं लघुस्ततः ॥ ८१ ॥

चत्वारो लघवोऽशब्दा अत्रैका वर्त्तनादपि ।
स्युरुद्ग्राहध्रुवाभोगा ईदृशा ईदृशाः परे ॥ ८२ ॥

नलकुवरताले स्युश्चत्वारो गुरवस्ततः ।
प्लुता एतत्समाज्ञेयाश्चत्वारो लघवोऽपि च ॥ ८३ ॥

सिंहनन्दनताले द्वौ गुरुलप लगाद्रुतौ[3] ।
गुरुद्वयं लपलपा गुरुर्लघुयुगं ततः ॥ ८४ ॥

निशब्दं ल चतुष्कं च केचिदत्र समूचिरे ।
सिंहलीलेऽभिधातव्यं लघ्वाद्यन्तद्रुतत्रयम् ॥ ८५ ॥

सिंहविक्रमतालेऽस्मिन्गलपागलगा स्मृताः ।
रङ्गलीलेऽभिवातव्यं लघुद्वन्दं गुरुद्वयम् ॥ ८६ ॥

उक्ता विंशतिसंख्यातास्ताला गानानुरोधतः ।
अन्येषां लक्षणं नोक्तं ग्रन्थविस्तारभीतितः ॥ ८७ ॥

कुडुक्काद्येक[4] तालानां यतित्रिपुटयोस्तथा ।
रूपकोपाड्डमण्ठानां तथाझम्पाड्डतालयोः ॥ ८८ ॥

समोबन्ध समावेशो निःसारुर्नान्यबन्धगः ।
गानलालित्यतोभिन्नमितिधीः शृण्वतां परम् ॥ ८९ ॥

---

१ । अतः
२ । ते कास्यां गेलगैर्मात्रा
३ । द्वौ द्रुतो लघुर्लघुद्रुते
४ । कुडुकादेक

अत्रार्थे संग्रहश्लोका: —

कुडुकाद्येक तालोनां खण्ड: षोड़शमात्रिक: ।
यति त्रिपुटयो: खण्डस्याच्चतुर्दशमात्रिक: ।। ९० ।।

एषां खण्ड: परो द्वाभ्याञ्जूनोऽर्द्धेऽर्द्धे तु भञ्जिक ।
रूपकोपाड्डमण्ठानां खण्डे द्वादशमात्रिक: ।। ९१ ।।

एकोनस्त्वपर: खण्डोभंग्यर्द्धेऽर्द्धे व्यवस्थिता ।
दशादि विंशति प्रान्त मात्रो झम्पाड्डतालयो: ।। ९२ ।।

द्वित्र्युनस्त्वपर:[1] खण्डे बाणे बाणे तु भञ्जिका ।
नि:सारोर्मनुमात्र: स्यात् प्रथमस्त्वपर: पुन: ।। ९३ ।।

एकोन: साद्ध्रुवेद्भञ्जी षष्ठे च दशमेऽपि च ।
आदिरेकेन लघुना यतिर्लौ द्रुद्वयं तथा ।। ९४ ।।

द्रुद्वयं लद्वयं नि:सारुको मण्ठस्तत: परम् ।
लद्वयं गश्च चत्वारो लघवोऽरवसंज्ञका: ।। ९५ ।।

निर्विराम द्रुतद्वन्द्वं लघु झम्पोऽभिधीयते ।
द्रुतत्रयं विरामान्तं त्रिपुट: कथ्यते बुधै: ।। ९६ ।।

विरामान्तं द्रुतद्वन्द्वं लघुरड्डोऽत्र कीर्त्तित: ।
सविरामद्रुतद्वन्द्वं रूपकोऽथैकतालिका ।। ९७ ।।

उपाड्डोऽपि द्रुतैकेन नि:सारुरिव कुड्डक: ।
किंचित् प्रबन्धबन्धा हि धातुसंघटितो यदि ।
तदा सूड़ोऽपि भवति प्रबन्ध इति नारद: ।। ९८ ।।

अथ क्षुद्रगीतमाह —

छायालगस्य लक्ष्मैकयुक्गीतं क्षुद्रमुच्यते ।
ध्रुवमण्ठादिचिन्हानां निर्णयोनात्रसम्मत: ।। ९९ ।।

---

१ । द्वित्र्युनास्वपर:

तच्चतुर्द्धा भवेच्चित्र कलाचित्र पदापि च ।
तथा ध्रुवपदा पञ्चमिकेति परिकीर्त्तिता ॥ १०० ॥

अथ चित्रकला त्र्याद्यवस्वन्त पदसंयुता ।
ध्रुवे मात्रा भवेन्न्यूना परे पादाः समा यदि ॥ १०१ ॥

पदानि यत्र चित्राणि अन्त्यानुप्रासवन्ति च ।
भवेदेषा चित्रपदा यदि मात्रा ध्रुवे समा ॥ १०२ ॥

त्र्याद्यवस्वन्तपदता अस्या अपि मता बुधैः ।
अनयोर्गीतगोविन्दगोपगोविन्दकादिषु ॥ १०३ ॥

सन्त्युदाहरणानीह साङ्कर्येऽपि बहूनिच ।
ध्रुवं गायेद्भिन्नधातु यत्र ध्रुवपदा मता ॥ १०४ ॥

सा द्विधा कीर्त्तिता प्राज्ञैस्त्रिपदादि ध्रुवापि च ।
उद्ग्राह ध्रुवकाभोगैस्त्रिपदादि ध्रुवा पुनः ॥ १०५ ॥

ध्रुवं गीत्वा पुरः पश्चाद् यदन्यद् गीयते पदम् ।
पञ्चमी बहुभिः पादै साद्विधा सध्रुवाऽध्रुवा ॥ १०६ ॥

अत्रोदाहरणं जज्ञं गीतं कृष्णजयादयः ।
गानमस्यादिनिः सारुमण्ठहीनैश्च तालकैः ॥ १०७ ॥

मात्रानिबन्धनियमः सर्वत्र परिकीर्त्तितः ।
कवेरत्युन्नतिकरमात्राक्षरविनिर्णयः ॥ १०८ ॥

अथ गीतगुणानाह —

गुणा गीतस्य तालेषु लयगत्यो[1]र्ग्रहस्य च ।
मानस्यापि विचित्रत्वं गमकानां च संग्रहः ॥ १०९ ॥

---

१ । पत्यो

धातो बन्धस्य[1] नैर्मल्यं रागाणां रम्यतानता ।
तेन्न[2]पाटस्वराणां च नानाविधनिवेशनम् ॥ ११० ॥

न तेन्नस्य प्रबन्धादौ प्रयोगो विनिबध्यते[3] ।
गानानन्तरत: पाटस्वरयोरस्य बन्धनम् ॥ १११ ॥

अथ लयमाह —

क्रियान्तरेण विश्रान्तिर्लय इत्यभिधीयते ।
सोऽपि त्रिधेति कथितो द्रुतो मध्यो विलम्बित: ॥ ११२ ॥

द्रुतेति शीघ्रो मध्यस्य विश्रान्तिर्द्विगुणा तत: ।
ततो विलम्बितस्यापि विश्रान्तिर्द्विगुणा मता ॥ ११३ ॥

त्रिपुटादौ द्रुतोज्ञेयो मध्यो नि:सारुकादिषु ।
विलम्बितस्तु यत्यादाविति केचित् सम्रूचिरे ।
सकलेष्वपि तालेषु मन्यतेऽन्ये विपश्चित: ॥ ११४ ॥

यतिमाह —

लयप्रवृत्तिनियमो यति: सा त्रिविधा मता ।
समाश्रोतोवहाचैव तथा गोपुच्छिकेति च ॥ ११५ ॥

आदिमध्यावसानेषु लयैकत्वे समामता ।
आदि मध्यावसानेषु क्रमेण यदि गीयते ॥ ११६ ॥

विलम्ब-मध्य-द्रुतकैर्लयै: श्रोतोवहा मता ।
लयैर्गोपुच्छिका प्रोक्ता द्रुतमध्यविलम्बितै: ॥ ११७ ॥

ग्रहानाह —

समातीतानागता:[4] स्युस्तालेषु त्रिविधा ग्रहा: ।
गीतोच्चारणकालेतु यदा ताल: प्रवर्त्तते ॥ ११८ ॥

---

१ । मातुरर्थस्य

२ । तेन

३ । प्रयोगस्तु विधीयते

४ । ममतीतानागता:

तदा समग्रह इति लक्ष्यं निःसारुकादिषु ।
गीतस्याद्याक्षरयुगं त्यक्त्वा तालो यदा पतेत् ॥ ११९ ॥

तदातीतग्रहस्त्वेनं कुडुक्कादिषु लक्षयेत् ।
कला या तु पतिष्यन्ति पश्चात्तां प्रथमे यदि ॥ १२० ॥

विन्यस्य गीयते तालो यत्याद्येनागतो ग्रहः ।
सर्वेष्वपि च तालेषु ग्रहाः स्युरिति केचन ॥ १२१ ॥

अथ मानमाह —

तालविश्रामहेतुत्वान्मानं तालसमाप्तिकृत् ।
तच्चेद्ध्रुवे द्वितीयायां कलायां निपतेत्तदा ॥ १२२ ॥

आवर्त्तोवर्द्धमानाख्यस्तालौ प्रोक्तौ मनीषिभिः ।
मानं ध्रुवेत्वन्तिमायां कलायां निपतेत्तदा ।
आवर्त्तो हीयमानाख्य इति मानं द्विधा मतम् ॥ १२३ ॥

अथ गमकमाह —

गमकः स्वरकम्पः स्यात् श्रोतृचेतः सुखप्रदः ।
मुनिना भरतेनास्य भेदाः पञ्चादश स्मृताः ॥ १२४ ॥

तिरिपः स्फुरितश्चैव कम्पितो लीन एव च ।
आन्दोलितो बलिश्चापि त्रिभिन्न कुरलाहताः ॥ १२५ ॥

उन्नामितः प्लावितोऽथ हुंनितो मुद्रितोऽपि च ।
नामितो मिश्रितस्त्वेषां लक्षणान्यद्य्रुनाव्रुवे ॥ १२६ ॥

अनुच्चश्चव्यड़मक ध्वानकम्पामनोरमः ।
इरितस्तिरिपोविज्ञैद्रुततुर्यांश वेगतः ॥ १२७ ॥

द्रुतस्य तु तृतीयांशवेगेन स्फुरितं मतम् ।
कम्पितं तु द्रुतस्यार्द्ध मानवेगेन कीर्त्तितम् ॥ १२८ ॥

लीनस्तु द्रुतवेगेनान्दोलितो लघुवेगतः ।
वलिर्वोगवशान्नानावक्रतानिचितस्तु यः ॥ १२९ ॥

स्त्रिषु स्थानेष्वविश्रान्त घनारावस्त्रिभिन्नकः ।
कुरलोवलिरेवस्याद्ग्रन्थिनः कण्टकोऽपि सः ॥ १३० ॥

आहतोऽग्रिममाहत्यस्वरं यदि निवर्त्तते ।
उन्नामितः क्रमाद्यच्छेद्यः स्वरानुत्तरोत्तरान् ॥ १३१ ॥

प्लावितः प्लुतगानेन कम्पनं समुदीरितः ।
हुंकितो हृदयाह्लादि हुंकारभरितो यदि ॥ १३२ ॥

मुखमुद्रणसंभूतो मुद्रितेनामितः पुनः ।
स्वराणां नमनादेषां मिलनान्मिश्रितो मतः ॥ १३३ ॥

माघपौषनिशायां तु शेषे प्रहरमात्रके ।
साधकः सलिले स्थित्वा गमकान् साधयेदिमान् ॥ १३४ ॥

अथ रागानाह[1] —

अष्टसाहस्रसंख्याभिर्गोपीभिः पुरतो हरेः ।
रासे गीतं पृथक्गीतं रागास्तत्संख्यका अतः ॥ १३५ ॥

सुमेरोः परितो ये ये देशास्तेषु क्वचित् क्वचित् ।
केचित् केचिद्विकीर्णास्ते सर्वे सर्वे समन्ततः ॥ १३६ ॥

क्वचिद्गुणिगणाक्रान्ते भिन्नदेशोद्भवा अपि ।
रागाः केचिज्जनपदे निवसन्तीति तद्वदः ॥ १३७ ॥

रञ्जनाच्छोतृचित्तस्य रागा इति मता बुधैः ।
तत्तेषा मोड्सिद्धानां द्वाचत्वारिंशदुच्यते ॥ १३८ ॥

नाटकर्णाटमल्लारदेशाख्यो मालवोऽपि च ।
वसन्तश्चेति षट्पुंसः षट्षट् चैषां च योषितः ॥ १३९ ॥

काम्वोजी नटभाषाख्या नाटिका गुणमञ्जरि ।
शेखरी मुखरी चेति नाटकान्ता इमा मताः ॥ १४० ॥

---

१ । इति गुणनिर्णयः (अधिकपाठः)

चन्दनी मालवः श्रीश्च सिन्धुवेलावली तथा ।
प्रपाचनी विभाषाख्या एता कर्णाटनायिकाः ॥ १४१ ॥

मल्लारी ललिता देशो तथा च पटमञ्जरी ।
मधुकारी दुग्धकारो चेति मल्लारवल्लभाः ॥ १४२ ॥

गुज्जरी रामकेरी च गुण्डकेरो सुरेहिका ।
धनासी च वराड़ो च देशाख्यास्यावलामताः ॥ १४३ ॥

सिरीकेदारसंज्ञा च मेघमार्जनिका तथा ।
कधुश्चिन्ता च नरणी मालबस्यावला मताः ॥ १४४ ॥

भैरवी रङ्गलीला च मेघत्राणी सुपञ्चमी ।
अमरीतोषगौड़ी च वसन्तस्यैव नायिकाः ॥ १४५ ॥

नाटकर्णाटयोर्योगे टक्करागो नपुंसकम् ।
कर्णाटवालवेतारो केयोमालवकौशिकः ॥ १४६ ॥

दशधा गुज्जरी प्रोक्ता भरतेन महात्मना ।
सरसाविरसा चैव दक्षिणाद्यक्षमालिनी ॥ १४७ ॥

निर्वाणा पञ्चमग्रामा भाषाहारा विभाषिणी ।
मधुरा मङ्गला चेति रागा भिन्ना इमा मताः ॥ १४८ ॥

दुग्धकारो समेता च गुज्जरो सरसा भवेत् ।
विरसा नरणी सक्ता दक्षिणा देशिसंयुताः ॥ १४९ ॥

गुण्डकेरी युता दक्षमालिनी चिन्तया सह ।
निर्वाणा पञ्चमग्रामा भवेत् यदि सरीयुता ॥ १५० ॥

भाषाहारा विभाषान्त्याभाषिणी कधु संयुता ।
मधुकार्या च मधुरा मङ्गला ललितेन च ॥ १५१ ॥

वराडि त्रिविधा प्रोक्ता सुरामा देशमालिका ।
वङ्गहारा सुरासया सुरामा सहिता यदि ॥ १५२ ॥

देशी युता देशमालि वङ्गलीला युता यदा ।
सा पुनर्वङ्गहारेति तदा प्रोक्ता मनीषिभीः ॥ १५३ ॥

संकीर्णाः सन्ति बहवो नोक्ता विस्तरभीतितः ।
वक्षेऽमीषां गानकालं दोषो यत्काललंघने ॥ १५४ ॥

मलारो ललितादेशीकधुश्च पटमञ्जरी ।
घनाशी रामकेरी च गुण्डकेरि सुरेहिका ॥ १५५ ॥

देशाख्यो दुग्धकारी च मधुकारी च चन्दनी ।
विभाषा गुज्जरी मल्लाय्युर्दयात्सप्तनाड़िकाः ॥ १५६ ॥

वराड़ी भैरवी रङ्गलीला वेलावली तथा ।
नाटिका नटभाषाख्या विभासा च प्रपाचनी ॥ १५७ ॥

भ्रमरी मुखरी चैव चोखरी सप्तदण्डतः ।
भवेदेषां गानकालो यावद्विंशतिनाड़िकाः ॥ १५८ ॥

कर्णाटनाटचोके परा नरणी तोप गौड़िका ।
चिन्तासिन्धुः कधुर्मेघ मार्जनो गुणमञ्जरी ॥ १५९ ॥

मालवो मालवश्रीश्च सिरी चैव सुपञ्चमी ।
काम्वोजी मधुकारी च मेघत्राणी पराह्णके ॥ १६० ॥

वसन्तो रामकेरी च सरसा गुज्जरी तथा ।
सर्वस्मिन् गीयते काले नैव दोषोऽभिजायते ॥ १६१ ॥

लोभान्मोहाच्च ये केचिद्गाययन्ति विरागतः ।
सरसा गुज्जरी तस्माद्दोषं हन्ति न संशयः ॥ १६२ ॥

आरुह्य शयनं विष्णोर्यावद्दुर्गामहोत्सवः ।
तावद्गेया मालवश्रीर्नान्यकाले कदाचन ॥ १६३ ॥

श्रेणीबन्धवशाद्गाने रागाणां च प्रबन्धके ।
नृपाज्ञायां रङ्गभूमौ कालदोषो न दुष्यति ॥ १६४ ॥

अथ दोषानाह —

गीतं त्रिविधं दिव्यं च[1] मानुषं दिव्यमानुषम् ।
दिव्यं[2] तु संस्कृतं प्राहुर्मानुषं प्राकृतं विदुः ॥ १६५ ॥

---

१ । तु २ । दिव्ये

तत् पुनर्द्विविधं सौरसेनीभाषादिकोत्थितम् ।
देशभाषोत्थित चैव दिव्यादिव्यं विमिश्रितम् ।। १६६ ।।

दिव्यादीनाममीषां तु स्वस्वलक्षणतश्च्युतिः ।
तालादिहीनता चेति नित्यदोषा इह द्विधा ।। १६७ ।।

देशभाषोत्थिते गीते ह्रस्वदीर्घविपर्ययः ।
असंयुक्ताक्षरे योगः संयुक्तस्य पृथक्क्रिया ।। १६८ ।।

उच्चारणं च वर्णानां विलम्वेन जवेन च ।
पौनरुक्तं तथाऽर्थस्य न दुष्यन्तीति तद्विदः ।। १६९ ।।

शुद्धसालगीतेषु संस्कृत[1] प्राकृतानुगा ।
नानाविधा विमिश्राऽपि भाषादोषाय नो भवेत् ।। १७० ।।

अनित्या बहवो दोषाः सन्ति तद्वद्गुणा अपि ।
नोक्ता विस्तरभीत्याऽत्र ज्ञेयास्ते पुस्तकान्तरात् ।। १७१ ।।

अथ गायकदोषानाह —

सन्दिष्टोद्घृष्टसुत्कारीभीतकम्पितविस्वराः ।
कराली कपिलकाकी वितालकरभोद्भताः ।। १७२ ।।

साम्वकस्तु[2] वकी वक्री प्रसारी विनिमीलकः ।
विरसोशब्दितो[3]ऽव्यक्तः स्थानभ्रष्टोऽव्यवस्थितः ।। १७३ ।।

मिश्रकोऽनवधानश्च सानुनासिक इत्यपि ।
अमी दोषा गायकानां कथिताः पञ्चविंशतिः ।। १७४ ।।

सन्दस्यदत्तान् यो गायेत्स्वसंदष्टः प्रकीर्त्तितः ।
उद्घृष्टवक्त्ररुद्घृष्टः सुत्कारी सुत्कृतैरपि ।। १७५ ।।

भीतो भयान्वितो गायन् कम्पितो गात्रकम्पनात् ।
विस्वरः स्वरसं त्यागात्कथितः पूर्वसूरिभिः ।। १७६ ।।

करालो घटितास्य स्यात्कराली कपिलः स्वरान् ।
न्यूनाधिकश्रुतीन् गायन् काकी काकवदारवः ।। १७७ ।।

---

१ । गीतसुसंस्तुत २ । झम्पकस्तु ३ । शङ्कितो

वितालस्तालरहितः करभः कम्रमस्तकः ।
उद्धतश्छागनिनदो[1] विद्वद्भिः परिकीर्त्तितः ॥ १७८ ।

करालवदनग्रीवः साम्वकस्तुम्वकी पुनः ।
तुम्ववत्फुल्लगल्लोऽथ वक्री वक्रो भवद्गलः ॥ १७९ ॥

गीतप्रसारणात्प्रोक्तेः प्रसार्यथ निमीलकः ।
निमीलनादीक्षणयोर्विरसो रसवर्ण्णताः ॥ १८० ॥

शङ्कितस्त्वरया युक्तोऽथाव्यक्तोऽव्यक्तवर्णकः ।
स्थानभ्रष्टस्तु यः प्राप्तुमशक्तः स्थानकत्रयम् ॥ १८१ ॥

अव्यवस्थित इत्युक्तः स्थानकैरव्यवस्थितैः ।
द्वित्रिणामपि रागाणां मिलनान्मिश्र ईरितः ॥ १८२ ॥

स्थाय्याद्यनवधानेन कथितोऽनवधानकः ।
सानुनासिक इत्युक्तो नासिकागायनादपि ॥ १८३ ॥

अथ स्वरानाह —

रञ्जयति श्रोतृचित्तं स्वयं यस्मात्ततः स्वराः ।
श्रुत्यन्वितास्त्रिधा मन्द्रमध्यतारससाश्रिताः ॥ १८४ ॥

जाताः श्रुतिभ्यः षड्जाद्याः सरिगाद्याः पराभिधाः ।
षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ॥ १८५ ॥

धैवतश्च निषादश्च श्रुतिसम्वलिताः स्वराः ।
ऋषभ शीतलस्तारो निषादो मध्यमस्तथा ॥ १८६ ॥

गान्धारो गद्गदः षड्जो मन्द्रः गीतस्तु पञ्चमः ।
ऊर्ध्वगो धैवतश्चेति स्वराणां नादलक्षणम् ॥ १८७ ॥

तत्रान्तरे —

षड्जं नदति मयूरो गावो रम्भन्ति चर्षभम् ।
अजाविकौ तु गान्धारं क्रौञ्चो नदति मध्यमम् ॥ १८८ ॥

---

१ । उद्भूटाश्छागनिनदो

पुष्पसाधारणे काले कोकिलो रौति पञ्चकम् ।
अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः ॥ १८९ ॥

अथ ग्रामानाह —

स्वराणां सुव्यवस्थानां समूहो ग्राम ईष्यते ।
षड्जश्च मध्यमश्चैव गान्धारश्चैति स त्रिधा ॥ १९० ॥

पञ्चमश्चेन्निर्विकारी षड्ज ग्रामस्तदोच्यते ।
यद्युगान्तश्रुतिस्तोऽयं ग्रामः स्यान्मध्यमस्तदा ॥
गन्धारो देवगेयत्वान्नास्माभिरिह लक्षितः ॥ १९१ ॥

अथ श्रुतिराह —

ऊर्ध्वमूर्ध्वं क्रमान्नादो नाभिग्रन्थेः समुत्थितः ।
नाभिदेशेऽतिसूक्ष्मः स्यात्सूक्ष्मो हृदयपङ्कजे ॥ १९२ ॥

कण्ठे पुष्टो मूर्द्ध्नि पुष्टो वदने कृत्रिमोऽभवत्[१] ।
एवं पञ्चविधः पञ्चस्थानेषु च समाश्रितः ॥ १९३ ॥

स नादः श्रुतयो द्वाविंशतिः स्यान्मारुताहतः ।
द्वाविंशतिस्तीर्य्यगूर्द्ध्वाधोनन्ताहृदयाश्रिताः ॥ १९४ ॥

ता यावत्य स्तुतावत्यः श्रुतयः परिकीर्त्तिताः ।
क्रमादुत्तोलिता[२] युक्ता वीणादावेव लक्षिताः ॥ १९५ ॥

नान्दी विशाला सुमुखी विचित्रा षड्जजाः स्मृताः ।
चित्रा घना गलनिका ऋषभेति स ईरिता ॥ १९६ ॥

गान्धारे सरसा रामा मध्यमे मागधी शिवा ।
मातङ्गिकाच मैत्री च चतस्रः परिकीर्त्तिताः ॥ १९७ ॥

वाला कला कलरवा शार्ङ्गि वापि च पञ्चमे ।
माला रसाऽमृता चैव तिस्रो धैवतनामनि ॥ १९८ ॥

निषादनामनि द्वे च विजया मधुकर्यपि ।
इति स्वराणां श्रुतयो द्वाविंशतिरुदीरिताः ॥ १९९ ॥

---

१ । भवेत् २ । क्रमादुच्चोच्चता

अथ वाद्यमाह —

अथ क्रमागतान्वक्ष्ये वाद्यभेदान् समासतः ।
गीतनृत्यादिके यस्मात् वाद्यं मूलं प्रयोजनम् ॥ २०० ॥

चतुर्विधमिदं प्रोक्तं वादित्रं मुनिपुङ्गवैः ।
ततमानद्धमित्येवं सुषिरं घनमेव च ॥ २०१ ॥

ततं वाद्यं च देवानां गन्धर्वाणां च सौषिरम् ।
आनद्धं राक्षसानां च किन्नराणां घनं विदुः ॥ २०२ ॥

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंश्यादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ २०३ ॥

तन्त्री सम्मार्जनं द्वैधं रौद्रं शारङ्गमेव च ।
सारङ्गं द्विगुणं रौद्रं पार्श्वे चोपरि संस्थितम्[1] ॥ २०४ ॥

तर्जन्या चालयेदूर्द्ध्वं कन्यसेन[2] च पार्श्वगम् ।
सप्तस्य च विभागार्द्धं दीयते सप्तसारिका ॥ २०५ ॥

गीताक्षरोच्चारणार्थं मध्ये च दशसारिका ।
ऋषभस्थानमादाय षड्जस्थानं यदिस्पृशेत् ॥ २०६ ॥

तदन्ते मध्यमस्थानमस्य सारीत्रिकं स्पृशेत् ।
पुनश्च ऋषभस्थानं झटित्येवं स्पृशेत् पृथक् ॥ २०७ ॥

तदा संजायते रागो मालवो नात्र संशयः ।
निषादस्थानमादाय धैवतं तु स्पृशेद्यदि ॥ २०८ ॥

षड्जस्थानं तदन्ते च झटित् पञ्चमसारिका ।
अधः सारी तुरीयं च संस्पृशेदेकहीनतः ॥ २०९ ॥

पुनश्च पञ्चमस्थानं केदाराख्या तदा भवेत् ।
सारङ्गमार्जने सर्वरागाणामुत्थितिर्भवेत् ॥ २१० ॥

---

१ । सन्धितं २ । कनिष्ठाङ्गुलिना

किन्तु जिह्वास्ययोगेन नैव श्रवणगोचरे ।
रौद्रमार्जनमाधाय यदि रागो निरूप्यते ॥ २११ ॥

सप्तस्वरकसंस्थानं निरूप्य तन्नियोजयेत् ।
लाटे पञ्चगुणं रौद्रं कर्णाटे त्रिगुणं मतम् ॥ २१२ ॥

मालवे सप्त देशाख्ये षड्गुणं द्विगुणं श्रियि ।
अन्येष्वपि च रागेषु त्रिगुणं लक्ष्यते सकृत् ॥ २१३ ॥

तृतीयमृषभस्थाने द्वितीयं मध्यमे पुनः ।
तृतीयं मध्यमस्थाने अधः सारोकपञ्चकान् ॥ २१४ ॥

एवं कृत्वा परान् सारानधः क्षिप्त्वा स्पृशेत् पुनः ।
अङ्गुलीनां त्रिकोणैव ऋषभ सनकं स्पृशेत् ॥ २१५ ॥

अधः सारीगणं स्पृष्ट्वा झटिन्मध्यममाहरेत् ।
एवमेव प्रकारेण नाटरागोऽभिजायते ॥ २१६ ॥

रागे रागेऽन्यमेलापं रौद्रं संजायते पुनः ।
रौद्रमूर्च्छायुतो रागसम्भावस्तत्र जायते ॥ २१७ ॥

सारंगे रागमात्रं स्यान्नैव सम्यक् श्रुतिर्भवेत् ।
रागभेदं समाधाय स्वरभेदं विचार्य्य च ।
रौद्रमार्जनकं कृत्वा सर्वरागान् विभञ्जयेत् ॥ २१८ ॥

अथ नृत्यलक्षणमाह —

अथांगानामुपांगानां प्रत्यंगानां तथैवच ।
तालवाद्यलयोपेतो विक्षेपो नृत्यमुच्यते ॥ २१९ ॥

नृत्यं[1] नाटयं तथा नृत्तं त्रिधा तदपि कीर्त्यते ।
नाटयं चारिप्रधानं स्यान्नृत्यं हस्तकविस्तृतम् ।
दृष्टिप्रधानं नृत्तं स्याद्द्रुते तत्त्रितयं मतम् ॥ २२० ॥

एतद्भेदमाह —

स्त्रीनृत्यमुच्यते लास्यं पुं नृत्यं ताण्डवं मतम् ।
देवी तुष्यति लास्येन ताण्डवेन महेश्वरः ॥ २२१ ॥

---

१ । नृत्तं

वर्द्धमानसारिकाद्यैर्गीतै यत्र ध्रुवायुतम् ।
करणैरंगहारैश्च प्राधान्येन प्रवर्त्तितम् ॥ २२२ ॥

तण्डूक्तमुद्धतप्रायप्रयोगं ताण्डवं मतम् ।
लास्यां तु हस्त इ्ष्टचाढ्यं मकरध्वजवर्द्धनम् ॥ २२३ ॥

केचित्तु —

प्रेरणिः बहुरूपं च नृत्यं तु द्विविधं स्मृतम् ।
अंगविक्षेपबाहुल्यं यत्राभिनयशून्यता ॥ २२४ ॥

प्रेरणी सा समाख्याता संज्ञा देशी त्रिलोकतः ।
नानारससमाकीर्ण्णं सर्वलोकमनोहरम् ॥ २२५ ॥

नानाभाषावलीदीप्तं नानावर्ण्णविभूषितम् ।
आश्चर्य्यकरमत्यन्त्यं प्रत्यक्षमिव दृश्यते ॥ २२६ ॥

पुरावृत्तं कल्पितं वा नान्दीपटहसंयुतम् ।
प्रागभूतं कथारूपं महाभिनयरंजितम् ॥ २२७ ॥

सूत्रधारसमारब्धं सूचितान्तः प्रवेशनम् ।
सुनिष्टपात्रबहुलं हास्यकौतुकसंकुलम् ॥ २२८ ॥

बहुरूपमिदं प्राहुः केचिन्मार्ग इति स्मृतः ।
श्रृंगारवीरयोरेक प्रधानं तत्र वै रसः[1] ॥ २२९ ॥

तेन्नाप्रवेशरुचिरं किवा[2] गीत प्रवेशकम् ।
स्फुरितं यौवतं चेति तत्पुनर्द्विविधं मतम् ॥ २३० ॥

यत्राद्येऽभिनये भावैः रसैराश्लेषचुम्बनैः ।
नायिकानायकौ रंगे नृत्यतः स्फुरितं च तत् ॥ २३१ ॥

मधुरावद्धलीलाभिर्नारीभिर्यत्र च नृत्यते ।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम् ॥ २३२ ॥

१। सरः २। तेना

अंगान्याह —

उर: शिर: करौ पार्श्वौ कटोपादौ तथैव च ।
षड़ांगान्याहुराचार्य्या: स्कन्धावप्यत्र केचन ॥ २३३ ॥

करौग्रीवोदरं पृष्ठं जङ्घोरुषड़िति क्रमात् ।
प्रत्यंगानि परेत्वाहुर्मणिबन्धौ च जानुनी ॥ २३४ ॥

दृष्टिस्तारापुटौ भ्रूश्च नासिका नासिकानिल: ।
रसना चिवुकं दन्ता: कपोलावधरं मुखम् ॥ २३५ ॥

मुखराग इति प्राहुरुपांगानि त्रयोदश ।
मस्तकांगान्तरेष्वेव उपांगानि विदुर्बुधा: ॥ २३६ ॥

एतत् दर्शनकालमाह —

द्रष्टव्ये नाटचनृत्ते ते पर्वकाले विशेषत: ।
नृत्यं त्वत्र नरेन्द्राणामभिषेक महोत्सवे ।
नगराणा मगाराणां[1] प्रवेशे पुत्र जन्मनि ॥ २३७ ॥

एतत्त्रयाणां जवनिका आह —

आद्या स्याच्चद्रिका कान्ता द्वितीया जलदोपमा ।
तृतीया हरितालाभा त्रिधा जवनिका मता ॥ २३८ ॥

पुष्पाञ्जलिं रंगपीठे निक्षिपेद्विनयान्वित: ।
गत: स्वयं सुरज्येष्ठो मध्ये रंगमधिष्ठित: ॥ २३९ ॥

अथ गात्राणि —

कुलस्त्री नटजा वेश्या सौराष्ट्री नर्त्तकी तथा ।
तदभावेऽपरा मानयतिग्रहलयान्विता ॥ २४० ॥

नातिदीर्घा न खर्वा च सुपक्ष्मा च सुलोचना ।
सर्वांग सुभगा दृश्या नर्त्तकी समुदाहृता ॥ २४१ ॥

खर्वायु त्वकृशा स्थूला पीताक्षा दन्तुरालसा ।
हीनस्तनी च जरती कुरूपा नृत्यवर्जिता ॥ २४२ ॥

१। गणामगाराणां

अस्य फलमाह —

न केवलमिदं नेत्रमनः कर्ण्णसुखावहम् ।
किन्तु मुक्तिकरं ज्ञातं सेवित पापनाशनम् ॥ २४३ ॥

अपि ब्रम्हसुखानन्दादिदमभ्यधिकं मतम् ।
जहार नारदादीनां चित्तानि कथमन्यथा ॥ २४४ ॥

सङ्गीतकरसाविज्ञः[1] पशुरेव न संशयः ।
यन्नाश्नाति वने शस्यं तद्भाग्यं पशुसंहातेः ॥ २४५ ॥

अथ हस्तकम् —

उत्तमं मध्यमं वापि हस्तकं लक्षणोदितम् ।
परित्यज्यान्यथा कर्त्तुः स पापो लिङ्गभेदकः ॥ २४६ ॥

अशुद्धनृत्यकर्त्ता यः[2] कुम्भीपाके स पच्यते ।
अतः शुद्धमिदं कार्य्यं द्रष्टव्यं वाऽन्यथा भयम्[3] ॥ २४७ ॥

बहूनन्धान् यथा शब्दा नानार्थास्तन्यते तथा ।
व्यापारा आङ्गिका एषां प्रयोगो निर्ण्णयस्ततः ॥ २४८ ॥

प्रयोगस्यापि शरणं शास्त्रं लोका अपि क्वचित् ।
शास्त्रलोकानुसारेण वक्ष्येऽमीषां[4] च लक्षणम् ॥ २४९ ॥

अथासंयुतहस्तकाः —

पताकस्त्रिपताकश्च हंसपक्षस्ततः परम् ।
चतुरः सर्पशीर्षश्च मृगशीर्षोऽर्द्धचन्द्रकः ॥ २५० ॥

मुष्टिकः शिखरश्चापि कपित्थः खटकामुखः ।
सन्दशस्ताम्रचूड़श्च भ्रमरः कर्त्तरीमुखः ॥ २५१ ॥

अरालो हंसवदनो मुकुलः पद्मकोषकः ।
शुचीमुखोऽलपद्मश्च काङ्गुलः शुकतुण्डकः ।
उर्ण्णनाभः कराः प्रोक्ताश्चतुर्विंशत्यसंयुताः ॥ २५२ ॥

---

१ । रसाभिज्ञ

२ । अशुध्यनृत्यकर्त्ताक्षः

३ । नरकादितिविशेषः

४ । वक्षेऽपीषां

अथ संयुतहस्तकाः —

असंयुता अर्थवशादेते स्युः संयुताः पुनः ।
अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा ॥ २५३ ॥

खटका वर्द्धमानाख्य उत्सङ्गो निषधोऽपि च ।
दोलः पुष्पपुटश्चैव तथा मकर एव च ॥ २५४ ॥

गजदन्तोऽवहित्थश्च वर्द्धमानस्तथैव च ।
एते तु संयुता हस्ताः क्रमात्प्रोक्तास्त्रयोदश ॥ २५५ ॥

अन्येऽपि सन्ति भूयांसो नात्रोक्ता विस्तृतेर्भयात् ।
उक्ता ये लक्षणं वक्ष्ये तेषां संक्षेपतो मया ॥ २५६ ॥

तर्जनीमूल संलग्नाऽङ्गुष्ठाग्रा ऋजवः समाः ।
यत्रांगुल्यः पताकाख्यः स करः कीर्त्तितो बुधैः ॥ २५७ ॥

एष कार्यः प्रेरणायां प्रहारे प्रोञ्छने तथा ।
राज्ञां प्रतापाभिनये प्रशंसागर्वयोरपि ॥ २५८ ॥

स्पर्शे विभजने वस्तुनिर्देशे प्रतिषेधने ।
छेदप्रधाने गोप्यार्थे पुष्करादेश्च वादने ॥ २५९ ॥

आदर्शे याचने श्लक्ष्णमर्दने तालिकादिके ।
उर्मिवेगे वायुवेगे अधोगत्वोत्थितांगुलिः ॥ २६० ॥

अग्निज्वालामूर्ध्वमुखो वर्षाधारास्त्वधोमुखः ।
कटिक्षेत्रगतोऽयं स्यात्पक्षिपक्षनिरूपणे ॥ २६१ ॥

मुखप्रदेशमागच्छन्नाभिमुख्ये स्वपार्श्वतः ।
पाषाणादि-स्थूलवस्तुग्रहणे तारणस्य च ॥ २६२ ॥

उत्पाटने पताकादौ कार्य्यावन्योऽन्यसम्मुखौ ।
सरः पल्वलनिर्द्देशे स्वस्तिकीभूय विच्युतौ ॥ २६३ ॥

पताकस्य यदा वक्रानामिका जायते तदा ।
त्रिपताकः स विज्ञेयो नियोगो वक्ष्यतेऽस्य तु ॥ २६४ ॥

एष दध्यादिमंगल्यद्रव्यस्पर्शे प्रयुज्यते ।
प्रणामे मस्तकगतः कर्त्तव्यः पार्श्वतस्तलः ॥ २६५ ॥

अश्रुप्रमार्जने नूनमधोगच्छेदनामिकः ।
आह्वानेऽङ्गुलियुग्मस्य कुञ्चनात् स्यादवाङ्मुखः ॥ २६६ ॥

उत्तानांगुलियुग्मः स्यात् वदनोन्नमने त्वसौ ।
अंगुल्यो संशये कार्ये पर्यायेण नतोन्नते ॥ २६७ ॥

अधस्तलो बहिः क्षिप्तांऽगुलि द्वन्दस्त्वनादरे ।
अधोमुखो भ्रमन् शीर्षप्रान्ते उष्णीषधारणे ॥ २६८ ॥

तादृशो मस्तकादूर्द्ध्वं कार्यो मुकुटधारणे ।
तिलके स्याद्भ्रुवोर्मध्यादूर्ध्वमेष ललाटगः ॥ २६९ ॥

अलकस्यापनयने ललाटादलकाश्रितः ।
पताकस्य तु हस्तस्य यदोर्द्ध्वास्यात्कनीयसी ॥ २७० ॥

मध्यास्तिस्रोन्नताः किञ्चिद्धंसपक्षः स उच्यते ।
प्रतिग्रहेष्वाचमने चन्दनाद्यनुलेपने ॥ २७१ ॥

भालक्षेत्रगतः कार्यस्त्रिपुण्ड्रतिलके करः ।
प्रत्यक्षे च परोक्षे चालिंगने स्वस्तिकीकृतौ ॥ २७२ ॥

कार्यौ मण्डलिकाकारौ महास्तम्भादि सूचने ।
कपोलदेशगः कार्यश्चिन्तायां हनुधारणात् ॥ २७३ ॥

स्त्रीणां विभ्रमभेदेषु स्थापनीयस्तनान्तरे ।
निर्वेदादिषु भावेषु श्रृंगारादिरसेष्वपि ॥ २७४ ॥

रोमाञ्चाद्यनुभावेषु प्रयोज्योऽयं यथोचितम् ।
हंसपक्षस्य हस्तस्य मध्यमांगुलिमध्यतः ॥ २७५ ॥

अंगुष्ठः कुञ्चितः किञ्चिद्यदा स चतुराभिधः ।
मुखक्षेत्रगतः कार्य्यो नयेप्राज्ञैरयं करः ॥ २७६ ॥

विनये द्वाविमौ कार्य्यौ संश्लिष्टमणिबन्धतौ ।
पाश्वगोऽयं विचारे स्यादूहार्थे च हृदि स्थित: ॥ २७७ ॥

उद्वेष्टित: स्याल्लोलायां कैतवे चाक्षपातने ।
स्यादुत्तानतलेऽङ्गुष्ठमध्यमान्योऽन्यमर्द्दनात् ॥ २७८ ॥

मर्द्दनाभिनये कार्य्यश्चान्तर्योक्तिषु संयुतौ ।
उत्तानौ नयनौपम्ये पद्मपत्रनिरूपणे ॥ २७९ ॥

तथा हरिणकर्ण्णस्य निर्द्देशे मुरजे[1] पुन: ।
विधेयौ स्वस्तिकाकारौ बालके स्यादधोमुख: ॥ २८० ॥

स्वल्पार्थस्याभिनयने तथा वर्ण्णकचूर्ण्णने[2] ।
पताको निम्नमध्ये य: स ज्ञेय: सर्पशीर्षक: ॥ २८१ ॥

अधोमुख: सर्पगत उत्तानो[3] देवतर्पणे ।
प्रसृते[4] परिमाणेऽप्यास्फाले च गजकुम्भयो: ॥ २८२ ॥

मल्लानां च भूजास्फाले प्रयोग: परिकीर्त्तित: ।
कनिष्ठांगुष्ठकावुर्द्ध्वौ सर्पशीर्षस्य चेत्पुन: ॥ २८३ ॥

मृगशीर्षोऽभिधो हस्त: स्यादधोवदनस्त्वसौ ।
इहास्ति साम्प्रताद्यर्थेषूत्तानोऽक्षप्रपातने ॥ २८४ ॥

स्वेदापमार्जने गण्डफलकक्षेत्रमाश्रित: ।
प्रकम्पित: कुट्टमिते रसनाकर्षणेऽपि च ॥ २८५ ॥

अंगुल्ये विनता: श्लिष्टा एकतोऽन्यत्र चापवत् ।
अंगुष्ठोऽपि स्थिते यस्य सोऽर्द्धचन्द्र: स्मृत: कर:[5] ॥ २८६ ॥

असंयुतोर्द्ध्वगामिभ्यामुत्थिताभ्यामुपाश्रित: ।
अभिनयोऽर्द्धचन्द्राभ्यां कराभ्यां वालपादप.[6] ॥ २८७ ॥

---

१ । सुरते
२ । चूर्ण्णिके
३ । सर्पगतावुत्तानो
४ । प्रसूते
५ । कर: स्मृत:
६ । पादत:

द्वाभ्यां मुखक्षेत्रगाभ्यां संख्यस्यानयो भवेत् ।
अन्योऽन्याभिमुखौ स्यातां पुरतः कलशे करौ ॥ २८८ ॥

वलये मण्डलावृत्या मणिबन्धप्रदेशतः ।
खेदे पराङ्मुखो ज्ञेयः कपोल फलकं दधत् ॥ २८९ ॥

मध्वौपम्येन संश्लिष्टो तिर्यगान्योऽन्यसम्मुखौ ।
कटाक्षेऽत्र गतौ तौ तु तन्मनाया[1] मधोमुखौ ॥ २९० ॥

ताटङ्काभिनये कार्यः कर्णदेशसमीपगः ।
बलान्निष्कासनादौ च प्रयोज्यो लोकयुक्तितः ॥ २९१ ॥

अङ्गुल्यस्तलमध्यस्थाः सर्वाङ्गुष्ठः प्रकीर्त्तितः[2] ।
यदि मध्या भवेत् प्राज्ञैर्मुष्टिरित्युच्यते करः ॥ २९२ ॥

मल्लयुद्धे खड्गमुष्टिग्रहे सम्वाहने तथा ।
दोहने रसवद्द्रव्यद्रवनिष्पोड़नेऽपि च ॥ २९३ ॥

धावने प्राङ्मुखोऽङ्गुष्ठः प्रकोष्ठग्रहणे तथा ।
भवेदूर्द्धवमुखोङ्गुष्ठो मुष्टिः शिखरसंज्ञकः ॥ २९४ ॥

शक्तितोऽमरमोक्षे चालक्तकोत्पीड़नेऽपि च ।
कुशग्रहे धनुर्वल्गाङ्कुशादीनां च धारणे ॥ २९५ ॥

अलकोत्क्षेपणे कान्ताधरोष्ठस्य च रञ्जने ।
शिखरे तु यदा हस्ते तर्जनी पीड़िता भवेत् ॥ २९६ ॥

अङ्गुष्ठवामभागेन कपित्थः स्यात्तदा करः ।
यथा भूतार्थकथने चापस्याकर्षणे तथा ॥ २९७ ॥

शिखरस्यापि कार्याणि कपित्थे क्वचिदाविशेत्[3] ।
कुञ्चिते किञ्चिदुत्क्षिप्ते कनिष्ठानामिके यदि ॥ २९८ ॥

अस्यैव तु कपित्थस्य स भवेत् खटकामुखः ।
प्रसूनादिचये बाणाकर्षणे दर्पणग्रहे ॥ २९९ ॥

---

१ । तसनाय २ । प्रपीडिता ३ । दादिशेत्

मुक्तस्रग्धारणे[1] पत्रवृन्तच्छेदनकर्मणि ।
वल्गास्रग्चामरादाने वीटिका ग्रहणेऽपि च ॥ ३०० ॥

अधस्तालाविमौ कुक्षौ कुङ्कुमादेश्च पेषणे ।
तर्जन्यग्रेण संलग्नमङ्गुष्ठाग्रं भवेत् यदा ॥ ३०१ ॥

किञ्चदाकुञ्चिताः शेषांगुल्यः संदंशहस्तके ।
अग्रजो मुखजश्चैव पार्श्वजश्चेत्ययं त्रिधा ॥ ३०२ ॥

कण्टकोद्धरणे पुष्पावचये चाग्रजो मतः ।
वर्त्यञ्जनशलाकादिपूरणे मुखजो मतः ॥ ३०३ ॥

मणिमुक्ताप्रवालादि गुणनिक्षेपणे तथा ।
वेधनेऽपि च मण्यादेस्तथा तत्त्वस्य भाषणे ॥ ३०४ ॥

ध्यानेऽलक्तादिनिपीड़े चित्रकर्मणि पार्श्वजः ।
मध्याग्रमिलितोऽङ्गुष्ठ उर्द्ध्वावक्रा प्रदेशिनी ॥ ३०५ ॥

अन्ये द्वे तलसंलग्ने ताम्रचूड़ाभिधे करे ।
भर्त्सने वालकाह्वाने शैघ्ये विश्वासकर्मणि ॥ ३०६ ॥

ताले कालमुहूर्त्तादौ छोटिकायां च शब्दवान् ।
ऊर्द्ध्वीकृत कनिष्ठा तु मुष्टिमन्यः[2] प्रचक्षते ॥ ३०७ ॥

मध्याग्रमिलितोऽङ्गुष्ठस्तर्जनी चापवन्नता ।
अन्ये द्वे विरले दीर्घे यत्र स भ्रमरः करः ॥ ३०८ ॥

कण्टकोद्धरणे कर्णपूरे वृन्ताद्यधारणे ।
त्रिपताके यदा मध्या पृष्ठगा तर्जनी भवेत् ॥ ३०९ ॥

मिलिताऽमिलिता चेति स करः कर्त्तरीमुखः ।
अधोमुखोऽयं चरणे रञ्जनोर्ध्व प्रदर्शने ॥ ३१० ॥

१। साधारणे २। मुष्टिमर्थः

वीक्षणे नासिकाक्षेत्रात् कार्यः कर्णान्तिकं गतः।
मस्तकस्थाविमौ कार्य्यौ शङ्काभिनयकर्मणि ॥ ३११ ॥

पतने मरणे तद्वदपराधे वितर्किते ।
निक्षेपोऽवाङ् मुखो व्यस्ततर्जनिश्चलदंगुलिः ॥ ३१२ ॥

अग्रोत्तानांगुलीकः स्यादीदृशे लेखवाचने ।
ईषन्नम्रा मध्यमाद्यास्तर्जनी चापवन्नता ॥ ३१३ ॥

अंगुष्ठः कुञ्चितोऽन्तस्थो यत्रारालः स ईरितः।
आशीर्वादे प्रयोज्योऽयं हृदयक्षेत्रमाश्रितः ॥ ३१४ ॥

बलोत्साहधृतिस्थैर्य्यगर्वगाम्भीर्य्यसूचने ।
नाभिक्षेत्रादूर्द्ध्वमेनं प्रापयेन्मस्तकावधि ॥ ३१५ ॥

द्विस्त्रिर्वा मण्डलावृत्या केशबन्धे स्त्रियां भवेत् ।
स्वेदापनयने भालक्षेत्रात्कार्य्यस्त्वधोमुखः ॥ ३१६ ॥

बहिर्मुखप्रयोज्योऽयं श्राद्धकर्मणि पण्डितैः।
प्रदक्षिणीभवन् कार्य्यो देवतादिप्रदक्षिणे ॥ ३१७ ॥

विवाहेऽङ्गुलिमूर्द्ध्वस्थो द्वयोः स्वस्तिकयोजनात् ।
ज्ञेयान्यराले कर्माणि त्रिपताकोदितानि वै ॥ ३१८ ॥

स्त्रीणामरालविहितं त्रिपताके प्रयुज्यते ।
पुंसामरालविहितं त्रिपताके न युज्यते ॥ ३१९ ॥

इत्याह सिंहणाचार्य्यो व्याख्यायां भरतस्य वै ।
यत्रात्यन्तम विलग्नास्तर्जन्यंगुष्ठमध्यमा ॥ ३२० ॥

ऊर्द्ध्वे च विरले स्यातां हंसवक्त्रः करः ततः।
श्लक्ष्णे मृदुनि निःसारे मर्दिताग्रांगुलित्रयम् ॥ ३२१ ॥

शिथिलेऽर्द्धलघावग्रदधत्क्षिप्तं विधूनितम् ।
मुक्ताफलादिग्रहणे कुसुमावचयादिषु ॥ ३२२ ॥

पञ्चांगुल्योऽग्रसंलग्ना मुकुले पद्मकोषवत् ।
भोजने देवताच्चार्यां बलिकर्मणि कुट्मले ॥ ३२३ ॥

कमलादेः प्रार्थनायां चुम्बितं विटपुंगवैः ।
मुहुर्विकाशे संकोचं मुहुर्नीतोऽतिसत्वरे ॥ ३२४ ॥

हिरण्यगणनायां च संख्यापञ्चकसूचने ।
स्यादाच्छुरितके गोप्यरसभावविजृम्भिते ॥ ३२५ ॥

ईषन्नताग्राः सर्वा अंगुल्यः सांगुष्ठका यत्र ।
विकसितपद्माकार स पद्मकोषः करः कथितः ॥ ३२६ ॥

भूमिस्थितार्थग्रहणे कुञ्चिताग्रस्त्र्यधोमुखः ।
वलिकर्मणो सिंहाद्यैरामर्षग्रहणे तथा ॥ ३२७ ॥

प्रमदानां तु कवरीकुचयोर्ग्रहणे पुनः ।
संश्लिष्टमणिबन्धौ द्वावत्यन्तविरलांगुली ॥ ३२८ ॥

पद्मकोषौ विधातव्यौ फुल्लाब्जेन्दीवरादिषु ।
खटकामुखहस्तस्य तर्जनी चेत्प्रसारिता ॥ ३२९ ॥

सूचीमुखः स विज्ञेयस्तदा कर्मास्य कथ्यते ।
भ्रमन्ती वलयाकारमूर्द्ध्वास्या चक्रसूचने ॥ ३३० ॥

कुलालचक्राभिनये भ्रमन्ती स्यादधोमुखी ।
भ्रमन्ती निजपार्श्वे स्याद्रथचक्रनिरूपणे ॥ ३३१ ॥

साधुवादे ध्वजे चापि चलोर्द्ध्वा तर्जनी भवेत् ।
एकत्वे ऋजुरुर्द्ध्वास्यान्नासास्थाश्वासवीक्षणे ॥ ३३२ ॥

आयान्ती शीघ्रमूर्द्ध्वाधः सौदामिन्यामियं गता ।
कर्णावतंसे कर्णान्तं यान्ती मन्दप्रकम्पिता ॥ ३३३ ॥

स्तवकानामभिनयेष्वाकुञ्च्याल्पप्रसारिता ।
अथ मण्डलिका कार्य्या कुटिलायां गतौ पुनः ॥ ३३४ ॥

चलत् किशलये दीपशिखायामपि चेष्यते ।
अंगुष्ठादष्टम्भितेऽयं पाश्वर्तिपाश्वन्तिरं व्रजन् ॥ ३३५ ॥

रुजुरूर्द्ध्वमुखः कार्य्यो नक्षत्राद्यवलोकने ।
भ्रामयन् मण्डलाकारपतने पातयेदधः ॥ ३३६ ॥

व्याघ्रादिदंष्ट्राभिनये ओष्ठप्रान्तगताविमौ ।
कर्ण्णकण्डूयने दुष्टश्रुतौ श्रवणमध्यगा ॥ ३३७ ॥

कुन्तलोत्कीर्ण्णने स्वेदापनयेऽंशुकसीवने ।
तर्जनेऽज्ञातपृच्छायां प्रयोज्यो लोकयुक्तितः ॥ ३३८ ॥

शिवस्याभिनयेऽरालसंबद्धा स्यादधोमुखी ।
आवर्त्तिन्यः करतले परिवर्त्तिन्य एव वा ॥ ३३९ ॥

यत्राङ्गुल्यः पाश्र्वगता विकीर्ण्णाः सोऽलपल्लवः ।
अलपद्मोऽयमेव स्यादभिनेयोऽस्य कथ्यते ॥ ३४० ॥

नास्तिवादेऽनृतोक्तौ च कस्य त्वमिति वाचने ।
स्वापराधनिवृत्त्यादौ स्त्रीभिरेष प्रयुज्यते ॥ ३४१ ॥

त्रिकोणस्थास्तु संलग्नास्तर्जन्यङ्गुष्ठमध्यमाः ।
वक्राऽनामानिष्ठौर्द्ध्वा भवेल्लाङ्गलहस्तकः ॥ ३४२ ॥

चुचुकग्रहणे तद्वच्चिवुकग्रहणेऽपि च ।
मिते ग्रासे फलेऽल्पेऽपि कुसुमे चम्पकस्य च ॥ ३४३ ॥

विरालपदवैदूर्य्यरत्नाद्यभिनयेऽपि च ।
अनामिका यदा वक्रा स्यादरालकरे तदा ॥ ३४४ ॥

शुकतुण्डः स्मृतो द्यूताऽक्षपाते लेशनग्रहे ।
प्रेम्णा कोपेर्ष्यया वास्यादपराधे प्रिये सति ॥ ३४५ ॥

न त्वं नाहं न मे कृत्यमित्यसम्वद्धभाषणे ।
विसर्जने स्यात् सावज्ञे बहिः क्षिप्ताङ्गुलिर्भवेत् ॥ ३४६ ॥

सावज्ञा वाहने त्वन्तर्नीतमध्याङ्गुलिर्मतः ।
करस्य पद्मकोषस्य सर्वाः स्युः कुञ्चिता यदि ॥ ३४७ ॥

उर्णनाभः स विज्ञेयो विनियोगोऽस्य कथ्यते ।
चौर्येण वस्त्रग्रहणे शिरः कण्डूयनेऽपि च ॥ ३४८ ॥

कुष्ठव्याधेरभिनये पाषाणादिग्रहे तथा ।
सिंहव्याघ्राद्यभिनये चिवुकक्षेत्रगो भवेत् ॥ ३४९ ॥

अथ संयुतहस्तकाः —

पताकौ तलयोः श्लिष्टावूर्द्ध्वभागप्रसारितौ ।
अञ्जलिः स्यादसौ धार्यो मूर्द्ध्नि वक्रे च वक्षसि ॥ ३५० ॥

नमस्कारे देवतानां[1] गुरोर्विप्रस्य च क्रमात् ।
मूलाग्रपार्श्वसंश्लिष्टौ तलमध्ये वियोजितौ ॥ ३५१ ॥

कपोतसदृशौ हस्तौ यत्र स स्यात् कपोतकः ।
एनमेव[2] करं केचित् कूर्ममाहुर्मनीषिणः ॥ ३५२ ॥

विनये गुरुसम्भाषे प्रणामे प्राङ्मुखो मतः[3] ।
वक्षस्थः कम्पितः कार्यः स्त्रीकापुरुषयोर्भये ॥ ३५३ ॥

इयत्तायां परिच्छेदे खेदोक्तौ नेतिसूचने ।
विमुक्तोऽयं बुधैः प्रोक्तोऽङ्गुलिस्पर्शनपूर्वकम् ॥ ३५४ ॥

अङ्गुल्यो यत्र करयोरन्योन्यान्तरनिर्गताः ।
दृश्यन्ते बहिरन्तर्वा स करः कर्कटाभिधः ॥ ३५५ ॥

पराङ्मुखतलः किञ्चिदन्तर्नीता खिलाङ्गुलिः ।
उर्द्ध्वे पार्श्वगतो वा स्यात्कन्दर्पादिगमोटने ॥ ३५६ ॥

सुप्तोत्थितस्य जृम्भायां गात्राणां च प्रसारणे ।
वहिर्गतांगुलिः स्थूलजठरस्य निरूपणे ॥ ३५७ ॥

---

१ । देवताया २ । एकमेव ३ । मुखयोगतः

जठरक्षेत्रगः शंखधृतो वक्त्रांगुलिर्मुखे ।
अभिषेके मूर्द्ध्निमुखे द्विस्त्रिर्वा स्नानकर्मणि ॥ ३५८ ॥

अरालावूर्द्ध्ववदनौ मणिबन्धनमाश्रितौ ।
उर्द्ध्वाधोवदनस्थौ वा पताकौ विरलांगुलि ॥ ३५९ ॥

वामदक्षिणगः कार्यो दक्षो वा वामसंस्थितः ।
स्वस्तिकोयं करः पादवदनादौ प्रयुज्यते ॥ ३६० ॥

परस्परस्याभिमुखौ द्वौ हस्तौ खटकामुखौ ।
मणिबन्धः स्वस्तिको वा खटकावर्द्धमानकः ॥ ३६१ ॥

प्रणामकरणे पुष्पग्रथने सत्यभाषणे ।
सूर्योदयादावुत्तानः स्यादयं प्रथमो मतः ॥ ३६२ ॥

ताम्वूलग्रहणे यूनोर्द्वितीयस्तिर्यगाननः ।
वामपार्श्वगतं यद्वा दक्षिणपार्श्वमागतम् ॥ ३६३ ॥

स्वस्तिकं केचिदिच्छन्ति हस्तमुत्संगसंज्ञिकम् ।
पताकः सपशीर्षो वा प्रकोष्ठस्वस्तिकौ कृतौ ॥ ३६४ ॥

परस्परस्कन्धगतावुत्संगोऽयं करो मतः ।
शृंगारे च प्रयोक्तव्यः प्रणामकरणे तथा ।
उपर्य्यधोगतत्वेन संमुखीनस्तथा तथा[1] ॥ ३६५ ॥

पराङ्मुखस्य ग्रहणे लीलालिंगनयोरपि ।
अतिप्रयत्नसाध्येऽर्थे रोषामर्षकृते तथा ॥ ३६६ ॥

प्रार्थनामभ्युपगमे[2] लज्जादावपि योषिताम् ।
दक्षिणं वाऽथ वा वामं मुकुलं परिवेष्टच चेत् ॥ ३६७ ॥

कपित्थो वर्त्तते प्राहुः करं तं निषधाभिधम् ।
शास्त्रार्थस्य स्वीकरणे स्वीकृतार्थस्य धारणे ॥ ३६८ ॥

तथा समयशास्त्रोक्तसंकेतग्रहणेऽपि च ।
निष्पीड़ने सत्यमेतदित्युक्तावपि कीर्त्तितः ॥ ३६९ ॥

१। इति केचित् २। प्रार्थनानभ्युपगमे

लम्बितौ शिथिलांसौ च पताकौ दोलसंज्ञकः ।
ससंभ्रमगतौ मूर्च्छाव्याधिखेदादिषु स्मृतः ॥ ३७० ॥

व्यक्ति संश्लिष्य[1] करभावुत्तानौ सप्तशीर्षकौ ।
हस्तः पुष्पपुटोनाम पुष्पाञ्जलिविसर्जने ॥ ३७१ ॥

धान्यपुष्पफलादीनां ग्रहणे देवतर्पणे ।
अर्घ्यदाने गुरुनृपप्रसादग्रहणे तथा ॥ ३७२ ॥

पाणिपात्राशने तोयानयने चापि कीर्त्तितः ।
उर्द्ध्वांगुष्ठौ पताकौ द्वावन्योन्यस्योपरिस्थितौ ॥ ३७३ ॥

श्लिष्टादधोमुखौ तज्ज्ञः कथितो मकरः करः ।
क्रव्यादमत्स्यमकरनदीपूरादिषु स्मृतः ॥ ३७४ ॥

कण्ठलग्नौ सर्पशीर्षौ समाकुञ्चितकूर्परौ ।
गजदन्तो भवेद्भारोद्बहने स्तम्भधारणे ॥ ३७५ ॥

शैलवृक्षशिलादीनां चालने स्याद्गता गतः ।
वरवध्वोर्विवाहायानयने च प्रचक्षते ॥ ३७६ ॥

हृदयाभिमुखौ हस्तौ शुकतुण्डौ शनैः शनैः ।
अधोमुखं संप्रयातावविहित्थः करो मतः ॥ ३७७ ॥

कार्श्येऽङ्गानां वियुक्तेः स्यान्निःश्वासौत्सुक्ययोरपि ।
मृगशीर्षौ पराक्वक्रौ अथवा हंसपक्षकौ ॥ ३७८ ॥

तादृशो स्वस्तिकीभूता अथवा सपशीर्षकौ ।
पराङ्मुखाविति द्वेधा वर्द्धमानाभिधः करः ॥ ३७९ ॥

द्वारवातायनादीनां कवाटोद्घाटने मतः ।
मणिबन्धच्युतौ हंसपक्षौ वक्षोविदारणे ॥ ३८० ॥

---

१ । व्यक्तिसंश्लिष्टः

भ्रूनेत्रमुखरागाद्यैं रूपांगै रूपवृंहिताः।
प्रत्यंगैश्च कराः कार्या रसभावप्रदर्शकाः ॥ ३८१ ॥

अथ शिरोव्यपाराः —

धूतं विधूतमाधूतमवधूतं निहञ्चितम्।
कम्पितो कम्पितोत्क्षिप्ताधोमुखं परिवाहितम् ॥ ३८२ ॥

विलोड़ितपरावृत्तप्राकृतान्यञ्चितं तथा।
चतुर्द्दशैषां वक्ष्येऽहं विनियोगं च लक्षणम् ॥ ३८३ ॥

क्रमेण गलितं तिर्य्यक् मस्तकं धूतमीहितम्।
प्रतिषेधेऽनिप्सितार्थे विषादे विस्मयेऽपि च ॥ ३८४ ॥

अनाश्वासे शून्यतायां कार्य्यां पार्श्वावलोकने।
धूतमेव विधूतं स्यात्तरसा भ्रमितं यदि ॥ ३८५ ॥

तत्तु पीतासवे भीते शीतज्वरभयातुरे[1]।
सकृन्नीतं तिर्य्यगूर्द्ध्वंशिर आधूतमुच्यते ॥ ३८६ ॥

गर्वेण भुजवीक्षायां शक्तोऽस्मीति निरूपणे।
पार्श्वस्थस्योर्द्ध्ववीक्षायामंगिकारेऽपि कथ्यते ॥ ३८७ ॥

यदधः सकृदाक्षिप्तमवधूतं तु तत् शिरः।
उपविष्टाल्पनिद्रायामालापज्ञानयोरपि ॥ ३८८ ॥

स्थित्यर्थे स्थाननिर्देशे संज्ञायां च प्रयुज्यते।
उत्क्षिप्तांसः सकृत्तिर्य्यक्कृतग्रीवं निहञ्चितम् ॥ ३८९ ॥

मोट्टायिते कुट्टमिते विव्वोके मानगर्वयोः।
ललिते वाञ्छितप्राप्तौ विलासे किलकिञ्चिते ॥ ३९० ॥

बहुशः शीघ्रमूर्द्ध्वाधः कम्पनात्कम्पितं भवेत्।
शीघ्रप्रश्ने तर्जने च विचारे व्याध्यमर्षयोः ॥ ३९१ ॥

क्रोधेऽभ्युपगमे ज्ञाने प्रयोज्यं कम्पितं भवेत्।
कम्पितं द्विः प्रयुक्तं चेन्मन्दमाकम्पितं मतम् ॥ ३९२ ॥

१। भरातरे

अग्रस्थवस्तुनिर्द्दे शे चित्तस्यार्थप्रकाशने ।
सञ्ज्ञोपदेशयोः प्रश्नावाहनादौ प्रयुज्यते ॥ ३९४ ॥

ऊद्ध्वीकृतास्यमुत्क्षिप्तं स्यादर्थस्य विचारणे ।
दिव्यस्त्रीणां प्रयोगे च चन्द्राद्युच्चस्थवीक्षणे ॥ ३९५ ॥

अधोमुखं स्यादन्यथ दुःखे लज्जाप्रणामयोः ।
शिरसो मण्डलाकारभ्रमणं परिवाहितम् ॥ ३९६ ॥

विचारे विस्मये हर्षे स्मिते क्रोधेऽनुमोदने ।
सवतो लोलनान्मन्दमन्दं स्याल्लोलितं मतम् ॥ ३९७ ॥

मूर्च्छाव्याधि ग्रहोन्मादनिद्रावेशेषु संमतम् ।
प्रत्यक्कृतमुखं शीर्षपरावृत्तं प्रकीर्त्तितम् ॥ ३९८ ॥

एतल्लज्जादिजनिते मुखापसारणे तथा ।
परावृत्तानुकरणे पृष्ठतः प्रेक्षणेऽपि च ॥ ३९९ ॥

निर्विकारं स्वभावस्थं शिरः प्राकृतमुच्यते ।
तच्च पूजाजपध्यानस्वामिसेवादिषु स्मृतम् ॥ ४०० ॥

किञ्चित् पार्श्वनतग्रीवमञ्चितं मस्तकं विदुः ।
व्याधौ मोहे च मूर्च्छायां चिन्तायामपि चेष्यते[१] ॥ ४०१ ॥

अथ दृष्टयः —

कान्तावीराऽथ वीभत्सा रौद्री स्यादद्भुतास्तथा ।
भीता च करुणा चेति दृष्टियोऽष्टौ रसाश्रयाः ॥ ४०२ ॥

सुप्रसन्ना सहर्षा च सकामातिमनोहरा ।
कटाक्षमधुरा दृष्टिः कान्ता शृङ्गार ईरिता ॥ ४०३ ॥

गाम्भीर्यौदार्य माधुर्य स्थैर्यादाश्च विवृण्वती ।
अक्षुब्ध समतारा या वीरा वीररसे भवेत् ॥ ४०४ ॥

१। इति शिरः प्रकरणम्

निकुञ्चितपुटप्रान्ता घृणानिकूततारका ।
संरुद्धपक्ष्मा बीभत्सा बीभत्से च रसे भवेत् ॥ ४०५ ॥

रुक्षाऽक्रूराऽरुणोवृत्ता निस्तब्धपुटतारका ।
भ्रूकुटी कुटोला रौद्री रसे रौद्रे च कीर्त्तिता ॥ ४०६ ॥

आकुञ्चितपुटा तीव्रमध्यमन्द्रक्रमेण या ।
भ्रान्तान्तर्नीततारा च दृष्टिर्हास्ये रसे भवेत् ॥ ४०७ ॥

समाकुञ्चितपक्ष्माग्रामनागुद्वृत्ततारका ।
सौम्या विकसितप्रान्ता चाद्भुते दृष्टिरद्भुता ॥ ४०८ ॥

स्तब्धो भयपुटात्यन्त वलमानकनीनिका ।
दृश्या पलायमानेव या सा योज्या भयानके ॥ ४०९ ॥

शोकमन्थरताराश्रुपूर्णा नासाग्रगामिनी ।
व्यानम्राद्र्धपुटा दृष्टिः करुणा करुणे रसे[१] ॥ ४१० ॥

अथ भ्रूकर्माणि —

सहजा चतुरोत्क्षिप्ता[२] रेचिता कुञ्चिता तथा ।
पतिता भ्रूकुटी चेति भ्रूलता सप्तधा मता ॥ ४११ ॥

भ्रुवोः स्वभावावस्थानं सहजेति प्रकीर्त्तिता ।
भावेषु स्वल्वणेष्वषा विधातव्येति तद्विदः ॥ ४१२ ॥

या किञ्चिदायता[३] स्निग्धा मन्थरा च भ्रुवोः स्थितिः ।
चतुरा स्यान्मनोज्ञेऽर्थे शृङ्गारे भावहावयोः ॥ ४१३ ॥

एकैकशः समं वापि यत्तूत्क्षिप्तो[४] भ्रुवोर्द्वयोः ।
उत्क्षिप्ता सोच्यते स्त्रीणां सहजे दर्शने श्रुतौ ॥ ४१४ ॥

कोपे वितर्के लीलादौ भ्रुवमेकां समुत्क्षिपेत् ।
ईर्ष्याविस्मयहर्षेषु युगपद्द्वे[५] अपि क्षिपेत् ॥ ४१५ ॥

---

१ । इति दृष्टिप्रकरणम्
२ । चतुराक्षिप्ता
३ । कुञ्चितायता
४ । यत्तत्क्षेपो
५ । यौगपद्ये

एकस्या एव ललितमुत्क्षेपो रेचिता मता ।
नृत्तेष्वेव प्रयोक्तव्या न चान्यत्र कदाचन ॥ ४१६ ॥

वक्रीभावाद्भ्रुवोरग्रं नतयोः कुञ्चिता मता ।
मोट्टायिते कुट्टमिते विलासे किलकिञ्चिते ॥ ४१७ ॥

सममेकैकशो वाधःपतनं पतिता भ्रुवोः ।
अनिष्टगन्धासूयादौ भ्रुवमेकामधः क्षिपेत् ॥ ४१८ ॥

हास्यशोकविषादादौ भ्रुवौ द्वे द्वेऽप्यधो नयेत् ।
भ्रुवोराम्मूलतः क्षेपो भ्रूकुणस्य मता क्रुधि[१] ॥ ४१९ ॥

अथ स्थानकानि —

प्रविश्य रङ्गं स्थित्वात्र चार्य्या विकुर्वते क्रियाः ।
नर्त्तका येनतेनादौ स्थानकान्यभिदध्महे ।
उर्द्ध्वोपविष्टसुप्ताख्यभिधैतानि त्रिधा जगुः ॥ ४२० ॥

ऊर्द्ध्वस्थानकानि यथा —

समपादं वैष्णवं च वैशाख्यं मण्डलं तथा ।
आलीढप्रत्ययालीढे पुंसां षट्स्थानकानि च ॥ ४२१ ॥

गतागतं मोटितं च वलितं विनिवर्त्तितम् ।
आयतं चावहित्थं च अश्वक्रान्तं स्त्रियां विदुः ॥ ४२२ ॥

साधारणमिति प्राहुः केचिदेतत्त्रयोदश ।
स्वस्थं विष्कम्भितं क्रान्तमुत्कटं च मदालसम् ॥ ४२३ ॥

श्रस्तालसं जानुगतं मुक्तजानुविमुक्तकम् ।
एवं नवोपविष्टस्य स्थानान्यूचे मुनिः स्वयम् ॥ ४२४ ॥

सममाकुञ्चितं चैव प्रसारितविवर्त्तिते ।
नतमुद्वाहितं चेति स्युः सप्तस्थानकानि षट् ॥ ४२५ ॥

एव त्रिविधभेदेन स्थानकान्यष्टविंशतिः ।
पादौ ऋजुस्थितौ यत्र वितस्त्यन्तरितौ समौ ॥ ४२६ ॥

---

१ । इति भ्रूप्रकरणम्

स्थानकं समपादं तद्दैवताऽस्य पितामहः ।
एतद्ब्राह्मणदत्ताश्रीः स्वीकारे विनियुज्यते ॥ ४२७ ॥

विलोकने विहंगानां वरवध्वोश्च वीक्षणे ।
विमान स्यन्दनस्थेषु तथा व्रतीषु लिंगिषु ॥ ४२८ ॥

एकः पादः समो भूमौ सार्द्धतालद्वयोऽपरः ।
किञ्चिदाकुञ्चितस्त्यस्र पक्षस्थो वैष्णवं तु तत् ॥ ४२९ ॥

जीवितं चतुरास्यं स्याद् विष्णुरत्राधिदैवतम् ।
एतद्विधेयं संलापे नृभिरुत्तममध्यमैः ॥ ४३० ॥

सूत्रधारादिना नाट्यस्थितिकर्त्तेति चापरे ।
विष्णुवेशधरेणैव नटेनेत्य ब्रुवन् परे ॥ ४३१ ॥

चरणौ त्र्यस्रपक्षस्थौ सार्द्धतालद्वयान्तरौ ।
उरुनिषण्णो गगने सार्द्धतालद्वयान्तरे ॥ ४३२ ॥

यत्रैतत् स्थानकं ज्ञेयं वैशाखं[1] स्कन्ददैवतम् ।
वेगदाने[2] हयादीनां युद्धादौ प्रेरणेऽपि च ॥ ४३३ ॥

रङ्गप्रवेशे स्थूलानां खलानामपि दर्शने ।
चतुस्तालान्तरौ पादौ त्र्यस्रपक्षस्थितौ भुवि ॥ ४३४ ॥

उरुसार्द्धद्वितालस्थौ तत् स्थानं मण्डलं विदुः ।
प्रयोगे वज्रचापादौ तथा वारणवाहने ॥ ४३५ ॥

तार्क्ष्यादि वीक्षणे चास्य देवता शक्र इरितः ।
सार्द्धद्विहस्तान्तरितौ पादौ वामस्तथाग्रगः ॥ ४३६ ॥

कुञ्चितो दक्षिणः पश्चादालीढो रुद्रदैवतः ।
आस्फोटनादौ मल्लानां शस्त्रादिनां च योजने ॥ ४३७ ॥

---

१ । वैशाख्यं   २ । वेगवाने

उत्तरोत्तरजन्येऽपि स्यादीर्ष्याक्रोधसम्भवे ।
आलीढव्यत्ययात् प्रत्यालीढं स्यात् रुद्रदैवतः ।
आलीढे योजयेत् शस्त्रं प्रत्यालीढे वियोजयेत् ॥ ४३८ ॥

स्त्रीकर्त्तृकसप्तस्थानकानि —

एकं चरणमुद्धृत्य नर्त्तकी गमनोन्मुखी ।
यदास्ते चेङ्गिता[1] गत्योः सम्भवात्तद्गतागतम् ॥ ४३९ ॥

यत्रैकः कुञ्चितो भूत्वा चरणोद्धृतताङ्गुलिः[2] ।
अग्रे प्रसार्य्यतेऽन्यस्तु चरणः स्थाप्यते समः ॥ ४४० ॥

उर्द्ध्वस्यैककटौ हस्तौ स्थानकं मोटितं विदुः ।
कार्य्यमेतदवस्थासु कन्दर्पाद्यङ्गमोटने ॥ ४४१ ॥

वपुषो बलितस्यालपपादौ बलित दिग्भवः ।
अङ्गुष्ठेन स्पृशेद्भूमिमन्यस्यांघ्रेः कनिष्ठिका ॥ ४४२ ॥

स्पृशेद्ध्रुवं तद्बलितं साभिलाषविलोकने ।
एतदेव परावृत्त्या पृष्ठतोऽङ्कः स कथ्यते ॥ ४४३ ॥

अनादरात् प्रियालोके स्थानकं विनिवर्त्तितम् ।
तालान्तरः स्याच्चरणौ वामस्त्यस्रोऽथ दक्षिणः ॥ ४४४ ॥

समः स्यादुन्नतं वक्षः प्रसन्नं मुखपङ्कजम् ।
कटिः सम्मुन्नता हस्तो दक्षिणः स्यान्नितम्वगः ॥ ४४५ ॥

वामः करो लताहस्तो यत्र तत् स्थानमायतम् ।
देवतान्तरमाकार्यं पुष्पाञ्जलिविसर्जने ॥ ४४६ ॥

चारीषु विहितास्वेतां विदध्यान्नर्त्तकी स्थितिम् ।
रङ्गावतरणे कार्य्यं स्त्रीभिरेवेति केचन ॥ ४४७ ॥

आभाषणमनेन स्यात्सखी-प्रियतमादिभिः ।
मानावलम्बने स्त्रीणां प्रतिषेधे च तर्जने ॥ ४४८ ॥

१। चेदृशः २। चरणोऽल्पचलाङ्गुलिः

ईर्ष्या हर्षो भवेत्कार्यमङ्गुलीस्फोटने तथा।
मौने विसर्जनाह्वाने भवेद्गाम्भीर्यगर्वयो: ॥ ४४९ ॥

आयतस्य विपर्यासादवहित्थिमुदाहृतम् ।
दुर्गात्र देवताकार्य्यमेतच्चिन्ता वितर्कयो: ॥ ४५० ॥

निजसौभाग्यगर्वेण स्वाङ्गवीक्षा सुयोषिताम्।
वीक्षायां वरमानुष्यसंलापे च स्वभावजे ॥ ४५१ ॥

सूचिपादोऽथवांघ्रे: स्यात्समादन्य: स्वपार्श्वत: ।
तालमात्रे स्थितो यत्र तदश्वक्रान्तमुच्यते ॥ ४५२ ॥

विभ्रमे गोपने पुष्पस्तवकादानकर्मणि ।
तुरगारोहणारम्भे वृक्षशाखावलम्बने ।
सहजालापवसनादाने वाण्यस्य देवता ॥ ४५३ ॥

अथ नवोपविष्टस्थानकानि —

वक्षो यत्रोन्नतं किञ्चित्पादौ विस्तारिताञ्चितौ ।
कट्यूरुसंश्रितौ हस्तौ स्वस्थं स्थानं सुखासने ॥ ४५४ ॥

वक्ष: समुन्नतं यत्र पादौ विस्तारिताञ्चितौ ।
निमीलिते च नयने यदा विस्कम्भितं भवेत्[१] ॥ ४५५ ॥

ध्यानयोगे तदा प्रोक्तं स्वाभाविकभटासने ।
अंसे[२] मूर्द्धानमाधाय चिबुकं हस्तयोर्द्वयो: ॥ ४५६ ॥

नेत्रवाष्पाविले स्यातां यत्र तत्कान्तमुच्यते ।
विगृहीते तथा ग्लाने शोकाविष्टे पराजिते ॥ ४५७ ॥

चरणौ द्वावपि समौ न स्पृशत्यासनं क्षिति: ।
यत्रैतदुत्कटं संज्ञं[३] ध्यानयोगजपादिषु ॥ ४५८ ॥

एकोऽंघ्रिरासनगत: किञ्चिदन्य: प्रसारित: ।
यत्र शीर्षं पार्श्वगतं तत्स्थानं स्यान्मदालसम् ॥ ४५९ ॥

१। च तत् २। अंशे ३। सन्ध्या

विरहौत्सुक्यनिर्वेदमदेव्यापदि वर्त्तते ।
शस्त्रौ विमुक्तौ च करौ नयनमपि[1] मन्थरे ॥ ४६० ॥

सालसं च वपुर्यत्र तत्सालसं समुच्यते ।
मदमूर्च्छाभयव्याधिहानिग्लान्यादिषु स्मृतम् ॥ ४६१ ॥

भूमिष्ठे जानुनी यत्र स्थानजानुगतं तु तत् ।
मृगाद्यन्वेषणे दुष्टसत्वत्रासे च याचने ॥ ४६२ ॥

होमे देवार्च्चने दाने कुपितस्य प्रसादने ।
एकं जानुभुवः पृष्ठमुत्कटस्याधितिष्ठति ॥ ४६३ ॥

यदा तदा मुक्तजानु सा वामानां प्रसादने ।
क्रमादिषु विमुक्तं स्यात्तच्च प्रतपनं भुवि ॥ ४६४ ॥

अथ षट् सुप्तस्थानकानि —

उत्तानं वदनं सुप्तं तद्रूपं शयने समम् ।
आविद्धे जानुनी शेषमङ्गमाकुञ्चितं तु तत् ॥ ४६५ ॥

यत्राकुञ्चितमेतत्स्यात्सीताद्यभिनये तु तत् ।
प्रसार्य जानुनी बाहुमुपधाय प्रसुप्यते ॥ ४६६ ॥

यत्र प्रसारितं तत्स्यामुखसुप्ते तदिष्यते ।
अधोमुखं यच्छयनं तत्कृतौ तद्विवर्त्तितम् ॥ ४६७ ॥

इषत् प्रसार्य्य जंघे यच्छ्रस्तं हस्तद्वयं भवेत् ।
सुप्तं तन्नतमाख्यातं खेदालस्यश्रमादिषु ॥ ४६८ ॥

निधाय मस्तकं स्कन्धे कूर्परराग्रेण भूतलम् ।
आक्रम्य सुप्यते यत्तत् स्थानमुद्वाहितं भवेत् ।
लोलयावस्थितौ राज्ञामभिनेयमिदं स्मृतम्[2] ॥ ४६९ ॥

---

१ । नयं न अपि

२ । इति षट् सुप्तस्थानकानि

अथ चार्य्यः —

श्रृङ्गारादिरसानां तु भावोद्दीपनकारकः ।
लयतालसमायुक्तोऽङ्कानां सञ्चार एव यः ॥ ४७० ॥

सा चारीति मता नाट्ये नृत्यं स्यात्तद्गुणं मतम् ।
चारीपदं चरेर्धातोर्घञ्जन्तांङिपि जायते ॥ ४७१ ॥

भवेत्तत्साधकतमश्चरणो हस्तकाङ्कितः ।
सेयं चारी द्विधा प्रोक्ता भौमाकाशविभेदतः ॥ ४७२ ॥

भौम्यः षोड़शसंख्याता आकाशिक्योऽपि षोड़श ।
कार्याभावाद्व्यासभीत्या भौम्यो नोक्ता स्त्रयोदश ॥ ४७३ ॥

समोत्सारिता मतल्ली उरुवृत्ता मतल्लिका ।
आसामाकाशिकीनां च वक्ष्ये लक्षणमुत्तमम् ॥ ४७४ ॥

षोड़शाकाशिक्यो यथा —

अतिक्रान्ता अपक्रान्ता पार्श्वक्रान्ता मृगप्लुता ।
उर्द्ध्वजानुरलाता च सूची नूपुरपादिका ॥ ४७५ ॥

दोलपादादण्डपादा विद्युद्भ्रान्ता भ्रमर्य्यपि ।
भुजङ्गत्रासितोत्क्षिप्ता विद्धोद्वृत्तेति षोड़श ॥ ४७६ ॥

अथ त्रिविधभौमचार्य्यः —

निहितेऽन्यस्य पादस्य मध्येऽग्रतलसंचरे ।
कृते जंघास्वस्तिके वा पादोऽग्रतलसंचरे ॥ ४७७ ॥

घूर्णन्तौ यत्र कुर्वाते चरणावुपसर्पणम् ।
यद् वाऽपसर्पणं सेयं चारी स्यान्मध्यमे पदे ॥ ४७८ ॥

समोत्सरितमतल्लीत्याहुश्चारीविदो जनाः ।
पार्ष्णिरङ्घ्रेरग्रतलसंचरस्य यदा भवेत् ॥ ४७९ ॥

अन्यांघ्रि पृष्ठाभिमुखो जंघा च बलिता यदा ।
अथ वैतद्विपर्य्यासाज्जंघा च नतजानुका ॥ ४८० ॥

स्यादन्यजंघाभिमुखी चार्य्यां यस्यां वदन्ति ताम् ।
उरुवृत्तेति निपुणा लज्जेर्ष्यादौ प्रयुज्यते ॥ ४८१ ॥

अर्द्धत्र्यस्रौ श्लिष्टभूमीतलाभ्यां स्वस्तिकाकृती ।
जङ्घाप्रदेशचरणौ घूर्णितावुपसर्पतः[1] ॥ ४८२ ॥

यद्वापसारणं स्यातां हस्तावुद्वेष्टितक्रियौ ।
तथापविद्धो यत्रेयं मतल्ली तरुणे मदे[2] ॥ ४८३ ॥

अथाकाशिक्यः —

एकस्यांघ्रे र्गुल्फदेशे कुञ्चितश्चरणोऽपरः ।
पुरः प्रसारितः किञ्चिदुत्क्षिप्याथ निपातितः ॥ ४८४ ॥

यथालोकं चतुस्तालाद्यन्तरं पुरतो यदा ।
तदाचारीमतिक्रान्ता कथयन्ति विपश्चितः ॥ ४८५ ॥

जंघयोः स्वस्तिकं कृत्वा पादमुद्धृत्य कुञ्चितम् ।
यत्र क्षिपेत्पार्श्वदेशे सापक्रान्तेति तद्विदः ॥ ४८६ ॥

तां पार्श्वदण्डपादेति भरतः संप्रचक्षते ।
उत्क्षिप्यान्योरूपक्षिप्तपादमुद्घटितं भुवि ॥ ४८७ ॥

क्षिपेत्पार्श्वे तदा चारु पार्श्वक्रान्तामिमां जगुः ।
कुञ्चितं चरणं किञ्चिदुत्क्षिप्योत्प्लुत्य पातयेत् ॥ ४८८ ॥

अन्यस्याञ्चितपादस्य जङ्घा पश्चात्प्रवर्त्तयेत् ।
यस्यामुद्घटिता[3] चारीसा विदूषककर्तृका ॥ ४८९ ॥

एकस्य कुञ्चितस्याङ्घ्रेर्जानु स्तनसमं नयेत् ।
अङ्ध्र्यन्तरेऽन्यमङ्घ्रिं चेत् कुर्यात्स्यादूर्द्ध्वजानुका ॥ ४९० ॥

पृष्ठतः प्रस्तुतस्यांघ्रेः कृत्वोर्द्ध्वाभिमुखं तलम् ।
पार्ष्णिश्च पार्श्वतुल्यस्थो यत्र लतेति सोच्यते ॥ ४९१ ॥

१। वुपसर्गतः २। इति त्रिविधभौम्यश्चार्य्यः ३। यस्यां मृगप्लुता

अंघ्रि कुञ्चितमुत्क्षिप्य जंघामूर्ध्वं प्रसार्य्य च।
अन्यस्य जानुपर्यन्तमूरुपर्यन्तमेव वा ॥ ४९२ ॥

अग्रतः पातयेत्पादं भूमौ सूचीति सा स्मृता।
पृष्ठतश्चरणं नीत्वा स्पीचे स्पृट्वा च पार्ष्णिना[1] ॥ ४९३ ॥

पातयेदग्रयोगेन सा स्यान्नूपुरपादिका।
उद्धृत्य कुञ्चितं पादं पार्श्वयोर्दोलयेत्ततः ॥ ४९४ ॥

क्षिपेच्च पार्ष्णिना पार्श्वे दोलापादेति सा स्मृता।
अन्यस्यांघ्रेः पार्ष्णिदेशं नूपुरं पादमानयेत् ॥ ४९५ ॥

ततोऽभिमुखजान्येनं स्वदेहक्षेत्रसंमुखम्।
पुरः प्रसारयेद्यत्र दण्डपादेति सोच्यते ॥ ४९६ ॥

पृष्ठभागेन मूर्द्धानं स्पृश्यैकेनापरेण च।
पदा भ्रमेन्मण्डलवत् विद्युद्भ्रान्तेति सा मता ॥ ४९७ ॥

कृत्वातिक्रान्तमात्मानमंघ्रिमूलं विवर्त्तयेत्।
त्र्यस्रपादतलभ्रान्त्या भ्राम्यते केवलं वपुः ॥ ४९८ ॥

यत्र तां भ्रामरी चारी मार्गविद्भिरतोऽब्रवीत्।
कुञ्चितं पादमन्योरूमूलक्षेत्रान्तमुत्क्षिपेत् ॥ ४९९ ॥

पार्ष्णिं नितम्बाभिमुखं कृत्वा जानुस्वपार्श्वगम्।
अंघ्रिमुत्तानिततलं कटीजानुविवर्त्तनात् ॥ ५०० ॥

यस्यां चार्य्यामियं प्रोक्ता भुजङ्गत्रासिताभिधा।
अन्यथेयं भुजङ्गेभ्यस्त्रासंसूचनाद्भवेत् ॥ ५०१ ॥

कुञ्चितं चरणं किञ्चित्तालमुत्क्षिप्य चालयेत्।
पार्श्वान्तरं क्षितितले जंघस्वस्तिकयोगतः ॥ ५०२ ॥

१। पार्ष्णिका

पातयेत्पार्ष्णिना पादं यत्राक्षिप्तेति तां विदुः।
स्वस्तिकीकृत्य विश्लिष्टे जङ्घेऽङ्घ्रिकुञ्चितं ततः॥ ५०३ ॥

प्रसार्य्य पातयेत्पार्ष्णि पार्ष्ण्यन्तर समीपतः।
स्वपार्श्वे वा यत्र चार्यमाविद्धा साभिधीयते॥ ५०४ ॥

अन्योरुदेशगं पार्ष्णि कृत्वा विद्धां समञ्चितम्।
उत्प्लुत्याथभ्रमरिकां दत्वा यत्र निपातयेत्॥ ५०५ ॥

एवमेवाप्यन्यमंघ्रिमुद्वृत्तायाभिधीयते।
नृत्यस्य शेषमनया पूरयेदिति तद्विदः॥ ५०६ ॥

आकाशिक्य इमाश्चार्य्यो निर्दिष्टाः षोड़श क्रमात्।
एनाश्चार्य्यः प्रयोक्तव्या नृत्ये[1] नाट्ये तथा गतौ।
बाहुयुद्धे तथा युद्धे ललिताङ्गप्रवर्तिताः[2]॥ ५०७ ॥

अथ करणम् —

अङ्गैरुपाङ्गैः प्रत्यङ्गैरुत्प्लुत्य क्रियते तु यत्।
आश्चर्यकरमत्यर्थं नाट्येषु करणं तु तत्॥ ५०८ ॥

तत्रादावञ्चिताख्यं स्यादेकपादाञ्चितं ततः।
दण्डप्रणामाञ्चितकं भैरवाञ्चितकं तथा॥ ५०९ ॥

कर्त्तर्य्यञ्चितलोहड्यै एकपादादिलोहडी।
कर्त्तरी लोहड़ी दर्पशरणं जलशायि च॥ ५१० ॥

नागवन्धाभिधं चैवालगं कूर्मालगं ततः।
स्यादन्तरालगमस्य करणोर्द्ध्वालगे ततः॥ ५११ ॥

कपालघूर्णनं तिर्यगञ्चितं नतपृष्ठकम्॥
तथा तिर्यक् स्वस्तिकं च करपर्शनमेव च॥ ५१२ ॥

तिर्यक्करणकं चैव बाह्यभ्रमरिकेत्यपि।
अन्तभ्रमरिका चापि तिरिप[3] भ्रमरी ततः॥ ५१३ ॥

१। नृत्ते २। इति चारीप्रकरणं ३। तिरिग

स्याच्छत्र भ्रमरीचक्रभमर्यलगपूर्विका।
भ्रमरी तद्वदुचित भ्रमरी शीर्षपूर्विका ॥ ५१४ ॥

भ्रमपादाञ्चितं[1] चैव त्रयस्त्रिंशदितिक्रमात्।
स्थिरादौ समपादेनोत्तानश्चेदुत्पतेन्नटः ॥ ५१५ ॥

तदञ्चिताख्यं करणं स्यादित्याहुर्विपश्चितः।
एकपादकृतं त्वेतदेकक्षादाञ्चितं भवेत् ॥ ५१६ ॥

यदञ्चितवदुत्प्लुत्य निपतेद्दण्डवद्भुवि।
दण्डप्रणामाञ्चितकं भवेत्करणमुत्तमम् ॥ ५१७ ॥

तरुस्थितैकचरणस्योत्प्लुतौ भैरवाञ्चितम्।
स्वस्तिकांघ्र्यञ्चितं यत्स्यात्तत्कत्तर्य्यञ्चितं भवेत् ॥ ५१८ ॥

यत्र कृत्वा समौ पादावुत्प्लुत्य तिर्य्यगापतेत्।
त्रिकंविवर्त्तयंस्तत्स्याल्लोहड़ी लुठिताभिधम् ॥ ५१९ ॥

एकपादप्रयुक्तोऽयमेकपादादि लोहड़ी।
इयमेव स्वस्तिकाङ्घ्रिः कर्तरी लोहड़ी भवेत् ॥ ५२० ॥

वैष्णवं स्थानमाश्रित्य भूमौ पार्श्वेण चेत्पतेत्।
तदाहुर्द्दर्पशरणं करणं करणप्रिया ॥ ५२१ ॥

जलशाय्येतदेवस्यादासीने जलशायिवत्।
तदेव नागबन्धं स्यादास्ते चेन्नागबन्धवत् ॥ ५२२ ॥

उत्प्लुत्याधोमुखोऽग्रेऽथ पतित्वा कुक्कुटासनम्।
वध्नीयाद्यत्र तत्प्रोक्तमलगं सर्वसूरिभिः[2] ॥ ५२३ ॥

कूर्मासनं चेदलगे कुर्यात्कूर्मालगं तदा।
अलगं संविधायोर्व्यामुत्तानोरः स्थलं पतेत् ॥ ५२४ ॥

पृष्ठतः श्रोणिशीर्षाभ्यां भूस्पर्शादन्तरालगम्।
उत्प्लुत्य मध्यमावर्त्य वामपार्श्वेण मत्स्यवत् ॥ ५२५ ॥

१। भ्रमर्यथोदिग्भ्रमभ पादाञ्चितं
ततः भ्रान्तपादाञ्चितं

२। तत्प्रोक्तमलगं तद्विदो जनाः

परिवर्त्तेत यत्रैतत्स्यान्नस्य करणाभिधम् ।
समांघ्रेरूर्द्ध्वसंस्थाने पतित्वोर्द्धालगं भवेत् ॥ ५२६ ॥

समपादस्थितो यत्र शिरसाश्लिष्य भूतलम् ।
परावृत्तस्तत्कपालघूर्णनं करणं भवेत् ॥ ५२७ ॥

तिर्यगुत्पतनात्तिर्यगञ्चितं समपादतः ।
कपालघूर्णने जाते वक्षस्युत्तानितानते ॥ ५२८ ॥

तत्तु पृष्ठं[1] भवेदेतद्वङ्कोलं केचिदूचिरे ।
तिर्य्यक् स्वस्तिकमारब्धस्वस्तिकं तिर्यगुत्प्लुतौ ॥ ५२९ ॥

कृत्वा लगाख्यं करणं कराभ्यां भूतलं स्पृशन् ।
परिवर्त्तनवान् यत्र तत्करस्पर्शनं मतम् ॥ ५३० ॥

एकेन पादेनोत्प्लुत्य तिर्यगेव निपत्य चेत् ।
भूमौ तिष्ठेदथान्येन स्यात्तिर्यक्करणं तु तत् ॥ ५३१ ॥

सव्येतरेण पादेन स्थित्वा सव्यांघ्रिकुञ्चनात् ।
वामावर्त्तं भ्रमेद्यत्र सा बाह्यभ्रमरी भवेत् ॥ ५३२ ॥

इयमेव विपर्यासात्स्यादन्तर्भ्रमरीति च ।
अंघ्रिस्वस्तिकमारभ्य तिर्यग्भ्रमति यत्र सा ॥ ५३३ ॥

तिरीपभ्रमरी ज्ञेया दाक्षिणात्यनटप्रिया ।
स्थित्वैकेनाङ्घ्रिणा भूमावन्यमुत्क्षिप्य दण्डवत् ॥ ५३४ ॥

वामावर्त्तं भ्रमेद्यत्र तां छत्रभ्रमरीं विदुः ।
उत्प्लुत्याधोमुखो भूत्वाथादौ हस्तौ प्रसार्य्य च ॥ ५३५ ॥

दक्षावर्त्तं भ्रमेद्यत्र सा चक्रभ्रमरी मता ।
वैष्णवं स्थानमास्थाय तिष्ठन् वामांघ्रिणा यदा ॥ ५३६ ॥

---

१ । नतपृष्ठं

शरीरं भ्रमयेत्तिर्यगलगभ्रमरी तदा ।
समपादस्थितः पश्चात्तिर्यक् चेद्भ्रामयेद्वपुः ॥ ५३७ ॥

उचितभ्रमरी सा स्यादिति रत्नाकरोऽभ्यधात् ।
निधाय मस्तकं भूमौ कृत्वोर्द्ध्वौ चरणौ यदा ॥ ५३८ ॥

त्रिपरिभ्रमति प्रोक्ता सा शिरो भ्रमरो तदा ।
अधिष्ठान[1] भुवं मूर्द्ध्ना हस्ताभ्यां धारयन् भुवम् ॥ ५३९ ॥

सकृद्भ्रान्त्या तदन्ता च तदा दिग्भ्रमरी[2] भवेत् ।
समौ पादावूर्द्ध्वमुखौ कृत्वा स्कन्धेन भूतलम् ॥ ५४० ॥

आक्रमोल्लालयन् पादौ परिवर्त्तनमाचरेत् ।
तिर्यक् यत्र भ्रमादेतत्समपादाञ्चितं मतम् ॥ ५४१ ॥

स्कन्धाभ्यां भुवमाक्रम्य भ्रामयित्वा तु दक्षिणम् ।
चरणं तस्य पृष्ठेन जंघामध्यं निपीड़येत् ॥ ५४२ ॥

वामांघ्रे रञ्जितं कृत्वा विवृत्य तदनन्तरम् ।
पादावुल्लोलयेद्यत्र भ्रान्तपादाञ्चितं तु तत् ॥ ५४३ ॥

अन्येपि सन्ति भूयांसो भेदाः करणमार्गगाः ।
तेनात्र कथिताः प्राज्ञैर्ग्रन्थविस्तरभीरुभिः[3] ॥ ५४४ ॥

अथ कलानाह —

विद्युत्खड्गौ मृगवकौ प्लवहंसाविति क्रमात् ।
प्रभेदाः षट्कलासस्य भरतेन समीरिताः ॥ ५४५ ॥

प्लुतेन विद्युत्खड्गौ च गुरुणादौ मृगो वकः ।
मण्डुको लघुना हंसो द्रुतेन परिमीयते ॥ ५४६ ॥

वर्षासु जलदराजिषु सचमत्कारं यथा विद्युत् ।
विलसति तथा पताकप्रमुखान् प्लुतमानर्निमितान् दधति ॥ ५४७ ॥

---

१ । अधिपुन २ । सकृद्भ्रान्त्या च तद्भ्रमादिग्भ्रमरी ३ । इति करणप्रकरणम्

उर्ध्वं तयाप्यधोधः प्रकाशयन्ति करानारात् ।
यस्मिंश्चकास्ति विद्युकलास इति तं विदुर्विज्ञाः ॥ ५४८ ॥

सव्यापसव्य चकिता विलोकयन्ती मुहुः पश्चात् ।
करधृतखड्गलतेव प्रखरमातन्वती विविधम् ॥ ५४९ ॥

प्लुतमानहृष्टरूपा विदधाति करान्सम्बाधम् ।
यत्रार्द्धचन्द्रमुख्यान् खड्गकलास स विज्ञेयः ॥ ५५० ॥

पादाङ्गुलीभिरुर्वीमाक्रम्योत्थाय जानुनी च मुहुः ।
आपातगर्भखिन्ना मृगीव सालसा गतियुक्ताः ॥ ५५१ ॥

मृगशीर्षहस्तकवती हरिणप्लुतया प्लुति त्रिविधा ।
गुरुमानतो विधत्ते यदिस स्यान्मृगकलास इति ॥ ५५२ ॥

सजलच्छदौ वक इव विधुन्वती वामदक्षिणे पार्श्वे ।
संदश्य मुकुलमुख्यान् प्रकाशयन्ती करानारात् ॥ ५५३ ॥

गुरुमानकलितविग्रहमासनमुत्थानमपि रचयन्ती ।
नृत्यानन्दरूपं यत्र नटी वककलास एव स्यात् ॥ ५५४ ॥

विसमासनासमानौ चरणावुत्प्लुत्य सर्वतो दधती ।
त्रिपताकहस्तवती नृत्यति यत्प्लवकलास एष स्यात् ॥ ५५५ ॥

वरटेव ललितचरणन्यासा हंसास्य हस्तकसंयुक्ता ।
नृत्यति यत्र विचित्रं हंसकलासः स विज्ञेयः[१] ॥ ५५६ ॥

अथ शुद्धगतिः —

सङ्गीतज्ञैः[२] सभासद्भिः प्रेक्षके नायके स्थिते ।
रङ्गस्थलं प्रविश्याथ तिष्ठन्तः साम्प्रदायिकाः ॥ ५५७ ॥

सावधाना नादसमं वाद्यानि विविधानि च ।
मेलापकं वादयेयुः प्रबन्धं गजरं तथा ॥ ५५८ ॥

---

१ । इति कलासप्रकरणं

२ । सर्वज्ञैः

पात्रं किञ्चिदधिष्ठाय स्थानकं सौष्ठवान्वितम् ।
तिष्ठेज्जवनिकान्तर्द्धौ दधानं कुसुमाञ्जलिः ॥ ५५९ ॥

अथारम्भे प्रबन्धस्योपशमासंप्रसारिते[1] ।
प्रतिसीरांशुके रङ्गभुवं पात्रं विशेदथ ॥ ५६० ॥

वाद्यमाने प्रबन्धेऽस्मिन् क्रमादुपशमाभिधे ।
पुष्पाञ्जलिं रङ्गपीठमध्यतो विकिरेत्ततः ॥ ५६१ ॥

यतः स्वयंविधिः साक्षाद्रङ्गपीठमधिष्ठितः ।
वाद्ये नोपशमेनात्र नृत्ताङ्गैरेव केवलैः ॥ ५६२ ॥

पात्रं मनोन्वितं नृत्येदानन्दरसनिर्भरम् ।
अथ प्रबन्धैरेलाद्यैर्गीयमानैर्निजेच्छया ॥ ५६३ ॥

नृत्यं विधाय विधिवन्नर्त्तनत्यागमाचरेत् ।
गजरात्परतो नास्ति यदोपशमवादनम् ॥ ५६४ ॥

तदा पात्रप्रवेशाय परस्यारम्भमाचरेत् ।
पाट्टैश्च समहस्ताद्यैः समहस्तस्य वादनम् ॥ ५६५ ॥

प्रवेशे प्राहुरन्ये तु समहस्तस्य वादनम् ।
प्रवेशे समपादाख्यं स्थानकं केचिदूचिरे ॥ ५६६ ॥

केचित्प्रयोगं गीतस्य वाद्येन च सहाभ्यधुः ।
कैश्चित्प्रयोगो गीतादेः पृथक् पृथगपीष्यते ॥ ५६७ ॥

अथ गोण्डली —

वाद्यप्रभेदैः कठिनैः शुद्धैरेलादिभिस्तथा ।
यन्न नृत्यति किं त्वन्यैर्गीतैः सालगसूड़गैः ॥ ५६८ ॥

ध्रुवादिभिः प्रबन्धैश्च लास्याङ्गैरेव केवलैः ।
अङ्गैर्वा केवलैर्नृत्ये स्वरं गायति यं स्फुटम् ॥ ५६९ ॥

---

१ । प्रबन्धस्योपशस्यापसारिते

त्रिवर्ण्णं वादयेद्वापि तत्पात्रं गोण्डलीं जगुः ।
त्रिवलीवाद्नं केचिदनयानभ्युपागमन् ॥ ५७० ॥

साहि स्कन्धे धृतास्तीभिर्ग्राम्यतायै प्रकल्पते ।
गायन्तीत्वाशारीरान् सेवस्यान्मुकगोण्डली (?) ॥ ५७१ ॥

तस्याश्च नर्त्तनं प्राहुर्गोण्डली लक्षणाश्रयात् ।
देशी पद्धतिरेषैव स्यादेतल्लक्ष्म कथ्यते ॥ ५७२ ॥

कर्ण्णाटालंकृतियुता स्युरस्मिन् साम्प्रदायिकाः ।
आतोद्यानामिहापि स्यात्पूर्ववतुल्यनादता ॥ ५७३ ॥

एकताल्या वादयेयुरथ मेलापकं ततः ।
निःसारुतैकताल्वा वा तालेनान्येन केनचित् ॥ ५७४ ॥

गजरेवादिते व्यक्तं तस्यैवोपशमे सति ।
प्राग्वत् पात्रं रङ्गभूमौ विकर्य्य कुसुमाञ्जलिः ॥ ५७५ ॥

अङ्गान्या विष्णुविदिव गुरौ दक्षिणवामयो ।
गजरोपशमेनैव नृत्यत्यत्र ततं परम् ॥ ५७६ ॥

समाश्रितायाड्डतालं वा निःसारुं वैकतालिकम् ।
आश्रितासपयतालनियमानन्वितौ च यौ ॥ ५७७ ॥

तावत् स कवितौताभ्यां कृत्वा सर्वाङ्गनर्त्तनम् ।
रिगोन्युटवगाम्नूना त्वया नृत्तं समाचरेत् ॥ ५७८ ॥

निवारितेषु वाद्येषु सहगायनसंयुतैः ।
वांशिकैरवकासे च वितोर्ण्णे सति गोण्डली ॥ ५७९ ॥

उचार्य्य स्थायीनं कृत्वा द्रागालप्तिं चतुर्विधाम् ।
तान्याधागायनीमुखा द्विविलक्ति समाचरेत् ॥ ५८० ॥

मण्ठप्रतिमठाभ्यां च तालेनान्येन रञ्जितम् ।
ध्रुवकं सफलं गीत्वा जर्ज्जया वाद्यमानया ॥ ५८१ ॥

ध्रुवकस्या द्विखण्डेन गायमानेन नर्त्तितम् ।
विदध्यान्मेलकोपेतं मनो धर्ममनोहरम् ॥ ५८२ ॥

अथानयोरुपशमे विहिते गानवाद्ययो ।
स्थायीन् विधायविविधां मुहुध्रुवपदं श्रयेत् ॥ ५८३ ॥

अथवा प्राग्विधायैव स्थायीन् भक्तिसमन्मितान् ।
नातिह्रस्वान् नातिदीर्घान् गमकप्रौढिपेशलान् ॥ ५८४ ॥

सुतानललितत्रान्ता ध्रुवखण्डे पलासयेत् ।
आतोद्यवादनं कुर्युर्पलासे वादकाः समम् ॥ ५८५ ॥

गात्रं चित्रार्पितमिव पलासे लीनतां व्रजेत् ।
एवं नृत्यप्रक्रियायां कृतायां पूर्ववत् पुनः ॥ ५८६ ॥

ध्रुवस्याभोगखण्डेन गीयमानेन गायकैः ।
वादकैर्वाद्यमानेन तथा प्रहरणेन च ॥ ५८७ ॥

नृत्यं किंचिद्विधायाथ त्यागे सन्निहिते सति ।
नानाविधप्रोढचारी चालिनं नृत्यमाचरेत् ॥ ५८८ ॥

अत्र वाद्यं प्रहरणमाभोगेऽपि च तन्मतम् ।
वाद्यसाम्येन च त्यागं कृत्वा विश्रान्तिमाचरेत् ॥ ५८९ ॥

ध्रुवेणैवं तु नर्त्तित्वा ध्रुववन्मण्ठकादिभिः ।
क्रमान्नृत्यविशेषस्मु तेषामेषः प्रकाश्यते ॥ ५९० ।

मण्ठतालेन मण्ठादिप्रारम्भे नर्त्तनं भवेत् ।
प्रतिमण्ठादिनृत्येतु नत्तने स्यात् स्वतालतः ॥ ५९१ ॥

मण्ठादेध्रुवखण्डेन केवलं नर्त्तनं भवेत् ।
एकताल्या ततो नृत्यं भवेन्मध्यलयाश्रयम् ॥ ५९२ ॥

नृत्यं द्रुतलगं ज्ञेयमासु सालगगीतिषु ।
विलम्बितलयेन स्यात्ताण्डवे नर्त्तनक्रिया ॥ ५९३ ॥

एवं सालगसुड़स्थैरेकतालयवसानकैः ।
रूपकैर्नर्त्तनं कृत्वा त्यागमस्य समाचरेत् ॥ ५९४ ॥

अथ नृत्यभेदाः —

नाटयप्रकारमाहुस्तद्यत्रा सक्रोड़नादिकम् ।
शवरी नृत्यमेतत्तु शवर्य्यौ यत्र नृत्यतः ॥ ५९५ ॥

शवर्याभागया गीतं गजघण्टादिसंयुतम् ।
अष्टभिर्गोपनारीभिरष्टाभिः कृष्णमूर्त्तिभिः ॥ ५९६ ॥

कायानृत्यं तु तत्प्रोक्तं नृतस्य स्त्रीकमङ्गलम् ।
कौरञ्जी नृत्यमेतत्तु गुञ्जाभरणभूषिते ॥ ५९७ ॥

स्वीयया भाषया यत्र नृत्यन्तः प्रथमे मुदा ।
जाकडी नृत्यमीत्याहुस्तुरष्कस्मृतभाषया ॥ ५९८ ॥

पिच्छहस्तौ तु पुरुषौ नृत्यन्तौ यत्र ताण्डवे ।
यस्मिन् देशे च या रीति या च भाषा मनोहरा ॥ ५९९ ॥

तयापि नृत्यं भवति प्रभूणां चित्ततुष्टये ।
सन्त्यन्ये नृत्यभेदास्तु हस्तकस्थानकादिकाः ।
ते नोक्ता विस्तृति भयात्किन्तु साराः समाहृताः ॥ ६०० ॥

तदनुवसनभूषा दानमानावधानै-
रतिशयसुखपूर्णा पूर्णदम्भोरुहाक्ष्यः ।
रसभरपरिरम्भारम्भविश्रम्भभाजो
निजनिजभुवनान्तं ता ययुस्तान्ततान्तः ॥ ६०१ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये सङ्गीतनीरूपणं
नाम तृतीयः सर्गः ।

चतुर्थः सर्गः

तत्रैवाथो पादपाथोजगाथा वेगैर्विष्णोर्नीतिवाधे रसाद्यैः ।
हासोल्लासैः कौतुकैश्चातिगूढैः रात्रेः पूर्वो हन्त यामो जगाम ॥ १ ॥

त्यक्त्वा नित्यासक्तचित्तानमात्यान् स्वस्वाबासावेशनाय क्षितीशः ।
मन्दं मन्दं सेन्दुसच्चन्दनार्द्रोऽमन्दानन्दो मन्दिरं प्रावि‍वेश ॥ २ ॥

मुग्धो दुग्धं तत्र स प्राच्यविश्वाधीशो गर्भागारमाराज्जगाम ।
नानारत्नैरुज्वलं शोधितं द्रागाप्तैर्वीरैरक्षितं शस्त्रहस्तैः ॥ ३ ॥

फुल्लपुष्पोद्दामदामाभिरामं सम्यक्कुञ्चच्चारुचन्द्रातपाद्यम् ।
भोगिद्विड्भिर्नीलकण्ठैश्च युक्तं तेषां पार्श्वं यन्नासर्पन्ति सर्पाः ॥ ४ ॥

शास्त्राधीतैस्तत्रमित्रप्रकाश्यै रत्नैः स्वर्णैर्दारुदन्तैश्च युक्तम् ।
पर्यङ्कस्वैर्लक्षणैर्लक्षितं स्वं प्राप प्रेयान् कुन्दमन्दारहासः ॥ ५ ॥

कश्चिदाम्रः[1] शिंशिपादेवदारुः शाकः सालश्चन्दनः स्यन्दनश्च[2] ।
पर्य्यङ्कार्थं तिन्दुकः पद्मकः स्युः सर्जोभव्या चार्जुनोवाहरिद्रुः ॥ ६ ॥

चैत्यामात्यागारमार्गश्मशानो भूताः पाशिश्राद्धदिग्जातपाता ।
दम्भोल्यम्भो बातहस्तिप्रशुन्ना वृक्षा नेष्टा क्षौद्रनोड़ा कुलाश्च ॥ ७ ॥

पृथ्वीनाथस्तं शतेनाङ्गुलानां भाक्त्वाहीनं तत्सुतंषोड़शोनम् ।
मन्त्रीसेनाशाशितेशद्वयोनं कुर्यादिन्द्रद्वन्द्वहीनं पुरोधाः ॥ ८ ॥

अर्द्धं चास्मदष्टभागेन हीनं विष्कम्भः स्याद्विश्वकर्मेदमाह ।
आयामस्य त्र्यंशतुल्यस्तु पादोच्छ्रायः प्रोक्तः स्यादकुप्योत्तमाङ्गः ॥ ९ ॥

या श्रीपर्ण्या सर्वया निर्मिता सा शय्याभूत्यै चासने नामयघ्ना ।
रिक्तप्राप्त्यै तिन्दुकेनाथ दत्ते वित्तं दीर्घं चायुषं पद्मकेन ॥ १० ॥

---

१ । काश्चीर्याम्रः

२ । सन्दनस्यनश्च

वृद्धां वृक्षशिंशिपानिर्मिता चेत् स्यातां कल्याणाय शाकश्च शालः ।
धर्मं दीर्घं जीवीतं चापि कीर्त्ति शत्रोर्नाशं चन्दनेनापि धत्ते ॥ ११ ॥

वृक्षेष्वन्येनापि युक्तौ विभूत्यै स्यातां नित्यं तिन्दुकः शिंशपा च ।
न श्रीपर्ण्णासनो न हरिद्रुर्यस्मादेते मिश्रिता दुःखभाजः ॥ १२ ॥

स्यातां भूत्यै केवलौ शाकशालौ युक्तौ चान्योन्येन तद्विप्रदिष्टौ ।
वृक्षौ नीपद्रुद्रुमौ चापि तद्वच्चूतः सर्वप्राणहृत्स्यन्दनोऽपि ॥ १३ ॥

द्रुणामेषां शस्यते नागदन्तो भूषार्यैर्दिङ्मण्डलं चास्य मूलात् ।
त्यक्त्वा शेषं कल्पयेदद्रिभाजां तस्मात्किंचिच्चाधिकं कच्छभाजाम् ॥ १४ ॥

भूयाद्भूत्यै दारुवर्ण्णापिशुश्चेत्कष्टप्राप्त्यै स्यार्च्चिवर्ण्णाविवोढुः ।
सर्वेष्वेव ग्रन्थियुक्तं न सम्यक् सर्वं दारु स्याद् यतस्तेषु दोषाः ॥ १५ ॥

वृक्षैर्णैकेनासनं निर्मितं चेद्धन्यं द्वाभ्यां चातिधन्यं त्रिभिश्च ।
पुत्रप्राप्तिः स्याच्चतुर्भिर्यशोऽर्थौ पञ्चत्वं स्यात् पञ्चभिर्नाधिकं सत् ॥ १६ ॥

दोषास्पृष्टेश्चन्दनानां तु काष्ठैः पर्यङ्के श्रीशालिरत्नानिभाजि ।
आसीनश्चेत्पूज्यते राजवर्यो देवैरन्यैः किं पुनः कथ्यतेऽन्यत् ॥ १७ ॥

शय्यां सज्जां संपरीक्ष्यातिसूक्ष्मप्रावाराढ्यां तां स वीरोऽध्युवास ।
साक्षक्ष्वेडैर्दूषिता नाशहेतुः स्यान्नीलार्च्चिः कोर्ण्णतातपरीक्षा ॥ १८ ॥

सुप्त्वा कञ्चित्तत्र कालं[1] दयालुः प्राप्ते यामे पश्चिमेऽथाभिरामे ।
मन्दं मन्दं पूर्णदम्भोरुहाक्षो निद्रामुद्राभाक् निरास क्षितीशः ॥ १९ ॥

कृत्यं किञ्चित्तत्र मित्रार्पितश्रीः कृत्वा धीरः शुष्कपत्पाणिपद्मः ।
शय्यां सज्जां सज्जनानन्दकन्दोऽनन्दानन्दोभाक् पुनः सोऽध्युवास ॥ २० ॥

तत्रासीनो मुद्रिताक्ष. ससाक्षादात्मानं द्राक्क्रन्तयामास शश्वत् ।
यस्माद् यामे पश्चिमे वुद्धिवृद्धेर्हेतौ राजा चिन्तयेदात्मनीनम् ॥ २१ ॥

---

१ । तालं

आत्मज्ञानोद्रेकतो रामचन्द्रश्चक्रे सर्वेषां हृतं सर्वसाक्षी ।
तत्सर्वं चेदात्मवन्नैति भूपः केनात्मानं तारयेद्भूरिभारम् ॥ २२ ॥

चित्तं सत्यं बन्धमोक्षैक वीजं तज्जित्वा भून्मैथिलः सर्वपूज्यः ।
चेतो जेतुं ये न शक्ताः क्षितीशास्ते किं पातुं स्यु. समर्थाः प्रजास्ताः ॥ २३ ॥

जित्वा चित्तं रैणुकेयोऽप्यभुक्तं क्षोणीं लोकान् पालयन् दीर्घकालम् ।
ये भूमीशा नो जयन्तीन्द्रियाणि नाशं शश्वद् यान्ति तल्लोभतस्ते ॥ २४ ॥

लीनश्चीनः काननान्तेऽपि गन्तुं शक्तः प्रैति व्याधतो गीतलोभात् ।
गोलाकारो हस्तिनी स्पर्शलोभाद् बन्धं नागो वीर्यवानभ्युपैति ॥ २५ ॥

मीनोऽगाधेऽप्युच्चरन् वारिराशौ प्रैयायस्तोऽप्यामिषाद्वान्तिशाच्च ।
हृष्टो दृष्ट्वा दीपरूपं पतङ्गो लोकोऽप्याराद‌ाशु नाशं समैति ॥ २६ ॥

गन्धाकृष्टो दन्तीनां गण्डदेशे शुण्डाघाते नालिरप्येति नाशम् ।
इत्थं दोषैर्धीन्द्रियाणां विशेषैरेते मृत्युं सत्यमत्यन्तमीयुः ॥ २७ ॥

चैद्योवीरोऽप्युक्तिदोषान्मुरारेरन्तं प्राप प्रौढ़त्युपालमध्ये ।
लव्ध्वा कालो भूपतिर्मौकुकुन्दीं दृष्टिं नष्टोभाग्वभुवांघ्रि दोषात् ॥ २८ ॥

शम्भोर्लब्ध्वा द्राग्वरं मूर्द्ध्नि हस्तं दत्वा चास्तोऽभूद्वृकः पाणिदोषात् ।
भ्रातुर्जायां कामयानोऽपि वीरो रामाद्वाली शिष्णदोषान्ममार ॥ २९ ॥

जिह्वामत्यं वैरिषड्वर्गमासीत् सर्वाधीशः सोऽम्वरीशः क्षमायाम् ।
तज्जेतुं ये दैवशक्ताश्च्यवन्ते दाण्डक्याद्याभूमिपाला यथा ते ॥ ३० ॥

दाण्डक्यो वै कामतः पंक्तिवक्त्रो मोहादैलो लोभतो मत्सरात्तु ।
वाताप्याख्यः श्रीमदात् कुम्भयोनेर्नेशु क्रोधावेव पारीक्षितस्तु ॥ ३१ ॥

तस्माद् यस्यादात्मतत्त्वं न वेत्ता भूमीभर्त्ता तापिनामिन्द्रियाणाम् ।
लोभादीनां षड्द्विषां चैव जेता भुंक्ते भूमिं भूरिकालं विशालाम् ॥ ३२ ॥

आत्मज्ञाने रासमुद्रं वमुद्रे चेद्राङ्मग्नो नो भवेद्भूमिभर्त्ता ।
क्षोणी भारोषवुंधोत्यन्त उप्तः केनोपायेनात्मदेहं वहेतु ॥ ३३ ॥

चेतोलावे स्वे वपुः पञ्जरस्थे योनेशः स्यात्क्ष्मां कथं सागरान्तम् ।
आत्माधीनां नामकुर्यात् क्षितीशो वश्यास्तस्य स्युः कुतः सर्वलोकाः ॥ ३४ ॥

तस्माद्गत्वात्मानमाकन्दकन्दं राष्ट्रं किञ्चिच्चिन्तयामास कृत्यम् ।
तस्माद्भूयो राज्यकार्याविरोधाच्चेष्टः सर्वाश्चेष्टयेदिष्टदिष्टः ॥ ३५ ॥

भूमीं धर्मेणैव भुंक्तेऽति कालं भूमीपालो दुर्बलोऽप्यर्णवान्ताम् ।
तस्मान्नित्यं दानमानावधानैः सत्यं धर्मं पालयेत्तद्विधिज्ञः ॥ ३६ ॥

धर्मेणैवाधत्त वीरः पृथुः क्ष्मां दीर्घं कालं व्यालशून्यां विशालाम् ।
आयोः पुत्रो धर्मतो विच्युतः सन्नैन्द्रा भ्रष्टो भूतलं प्राप यानात् ॥ ३७ ॥

राज्या भूपो यस्त्व धर्मेण हृत्वा वित्तं नित्यं वर्द्धयेत् कोषजातम् ।
नश्यत्येवावश्यमस्मात् बलं स्वं न्यायप्राप्तैः पालयेदर्थजातैः ॥ ३८ ॥

द्राङ् निस्वेनान्यायरीत्याच तेन क्षोणीभर्त्रा सैनिकाः पोषिता ये ।
शीर्य्यन्ते ते कार्यकालेऽतिवेलं लोला नित्यं सैकताः सेतवो वा ॥ ३९ ॥

इत्यादीत्थं चिन्तयेत्येव चान्यत् किञ्चिद्वीरे नीरजाक्षे प्रकाशः ।
आसीद्विश्वेषा प्रवोधैकहेतुः केतुर्ध्वान्ते भूसुरे धर्मसेतुः ॥ ४० ॥

तदनु सपदि किञ्चिन्निद्रयान्मुद्रिताक्षो नवदमनकमालान्दोलमित्थं ब्रुवाणम् ।
अरिदरकरपद्मं पद्मपत्रायताक्षं नरपतिरतिकान्तं हृष्टवानिष्टदेवम् ॥ ४१ ॥

नरवर मम यात्रा गुण्डिचाख्यां पवित्रां सुखितसकलनेत्रां यत्र कुत्रापि देशे ।
रचयत गतिरम्यां चाष्टमीं प्राप्य शुक्लं यदि मम पदपद्मे निश्चलातेऽस्ति भक्तिः ॥ ४२ ॥

सपदि विगतनिद्रो मुद्रिताक्षोऽपि वीरोः जशयनमुदारं तारदारो विहाय ।
किमिदमिति नितान्तं चिन्तयश्चेतसाऽसौ रतिमतिशयनुन्नो नैव कुत्रापि लेभे ॥ ४३ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवमहाकाव्ये
स्वप्नदर्शनं नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः

अथोदिते कृताह्निको नराधिपो धरासुरान् ।
निशागतं न्यवेदयत्तदीशभाषितं नुतम् ॥ १ ॥

तदा कलय्य ते धरासुरानराधिपोदितम् ।
परस्परं मनोगतं मतं विते निरे मुहुः ॥ २ ॥

पुरा मुरारिसुन्दरस्फुरत् पदाब्जसेवनात् ।
इदं फलं विजृम्भतेऽत्र वन्नितीव केचन ॥ ३ ॥

परेऽवदन्निदं पुनर्विचार्य्य कार्य्यगौरवम् ।
भवद्भिरीरितं मतं नुतं नहीति नो मतिः ॥ ४ ॥

यतः पुरा धरेश्वरा न चक्रिरे महोत्सवम् ।
नवे वदन्ति कं श्रुतं वसुप्रसुनिराधरा ॥ ५ ॥

परे पुनः परस्परं करे करं निपीड्य च ।
नवो नवो महोत्सवो नवे नवे नृपे भवेत् ॥ ६ ॥

इदं निशम्य केचनात्रवदन् युतं[1] नवो मतम् ।
यथातथास्तु वा कथा हरेर्जगत् विभूतये ॥ ७ ॥

अनिच्छयापि पावको दहत्यहो धृतं करम् ।
तथाकथा हरेर्हरेदघं वृथास्तु वाऽवृथा ॥ ८ ॥

ततो नृसिंहभूपतिः श्रुतिस्मृतिप्रतिश्रुतैः ।
महोत्सवैर्मुरद्विषो मनोमुदं तनोत्वयम् ॥ ९ ॥

तदुत्तरं निरुत्तरं विचिन्त्यते विपश्चितः ।
इदं मतं जगज्जितं कुरुष्व ते नृपाऽत्रुवन्[2] ॥ १० ॥

१। केनोवदन्नुतिम् २। कुरुष्वसे नृपाऽद्रुवन्

इदं वचोऽमृतं नुतं धरासुरैर्निवेदितम् ।
निशम्य भूपतिर्ददौ तदाऽमृतेऽपि नो मतिम् ॥ ११ ॥

सविश्वनाथमात्मनो हितं विपश्चितं नुतम् ।
निजानुजं मुरद्विषः पदारविन्दषट्पदम् ॥ १२ ॥

गुणोज्वलं च मातुलं यशोविशोभिताखिलम् ।
तथान्यमौलतल्लजान् द्विजानुवाच सादरम् ॥ १३ ॥

अघौघकक्षपावको वसन्त उत्सवो नवः ।
करिष्यते मया दया निधेर्यतः सतां मतः ॥ १४ ॥

तथा तथा विधीयतां यथा भवे दयोदयः ।
जनुः फलं महोज्वलं ननु स्फुटं तदा मम ॥ १५ ॥

इदं निशम्य ते मनागजना जनाधिपोदितम्[१] ।
परस्पराननं पुनः पुनर्न ननु व्यलोकयन् ॥ १६ ॥

विचार्य्य कार्यमुन्नतं तमूचिरे नरेश्वरम् ।
तथास्तु वो यथामतिर्भवाह्लिको यतो गतिः ॥ १७ ॥

तथापि सेवका वयं निरन्तरा पराधिनः ।
वदाम किञ्चनाधुना यतो नृपाः कृपाकराः ॥ १८ ॥

पुरा प्रभो नरेश्वरैः समस्तकार्यतत्परैः ।
यतः कृतो नवोत्सवस्ततो न साधु मन्महे ॥ १९ ॥

इदं निशम्य भूपतिर्निजसमाजमाजहौ ।
नरादराहितोदराः पुराणि जग्मुरात्मनः ॥ २० ॥

अयं दुरुत्तरोत्करो नरेश्वरोदरेऽन्तरम् ।
न चाप भानुभावनं यथेव कैरवोदरे ॥ २१ ॥

---

१ । नाजराधिपोदितमिति पाठः

प्रभात आगते ततः कृताह्निका हिते तदा ।
समागताः परस्परं विचारमाशु तेनिरे ॥ २२ ॥

अहो महोदये महान्महीपतेर्महाग्रहः ।
अतो यथा भवेत्तथा चरन्तु चेन्ननोऽशिवम् ॥ २३ ॥

इदं विचिन्त्य तैस्तदा मुदा गदाधरोत्सवे ।
यथा प्रभोर्निदेशनं तथा पुनर्मतिः कृता ॥ २४ ॥

ततो नृसिंहभूपतिः सुधाम्वुधौ शतावधौ ।
ममज्ज सज्जनाश्रयो महोदयो दयोज्जलः ॥ २५ ॥

तथाऽतिहृष्टमानसो यशो विशोभिताखिलः ।
जगाम कामसुन्दरो विलोकितुं जगत्पतिम् ॥ २६ ॥

विवेश केशवाग्रतः सतां मतः कृपान्वितः ।
इतस्ततः समागतैर्जनोत्करैः समावृतः ॥ २७ ॥

विलोक्य तं जगद्गुरुं कृपाकरं सुरेश्वरम् ।
स्तुतौ मतिं चकार स क्षमाम्वुधेर्विधेर्विधेः ॥ २८ ॥

हरे सुरेश्वरेश्वर क्षमाधराजराक्षर ।
दयानिधे जगद्विधे क्षमाम्वुधे प्रसीदमाम् ॥ २९ ॥

जगत्पते सतां गते सुरासुरैः कृतस्तुते ।
रमारते धृतक्षिते प्रसीद सेवकोऽस्मिते ॥ ३० ॥

नमो नमः सदाहवे दशास्यचन्द्रराहवे ।
स्फुरद्विदारि वारिजाम्वुजप्रदीप्तबाहवे ॥ ३१ ॥

नमो नमो मुरारये जनार्दनाय शौरये ।
करोदरोद्यतासये नमस्तवास्तु अद्वये ॥ ३२ ॥

नमो विपक्षतारिणे व्रजावनीप्रचारिणे ।
स्यमन्तरत्नधारिणे स्वभृत्यपापहारिणे ॥ ३३ ॥

नमो नमोऽस्तु विष्णवे मुरारिवारजिष्णवे ।
द्विषन्निराकरिष्णवे धराभरासहिष्णवे ॥ ३४ ॥

त्वमेक एकदेवहे सृजस्यहो जगत्त्रयम् ।
ततो बिभर्षि हर्षितस्ततोऽप्यमर्षितोऽसि च ॥ ३५ ॥

त्वमेव वेद वेदज्ञस्त्वमेव शास्यशासकः ।
त्वमेव भोज्यभोजको विना न किञ्चनास्ति ते ॥ ३६ ॥

इतिस्तुतिं यथातितां क्षमापति विधाय च ।
न्यवेदयत्ततो नुतं निजं मतं मनोगतम् ॥ ३७ ॥

विभो चराचरेश्वर स्वभृत्यकार्यतत्पर ।
तथाऽधुना विधीयतां यथा भवे नवोत्सवः ॥ ३८ ॥

ज्वलत्यहो न चानले धरातले विनाज्ञया ।
दिवाकरः करोति किं सरोजषण्ढमण्डनम् ॥ ३९ ॥

अयं जनोऽधुनावनीतलेऽजनि समेत्यसे ।
कुतो विना कया नवोत्सवे मतिं करिष्यति ॥ ४० ॥

तदस्य विश्वनाथ भो निजस्य किंकरस्य ते ।
भवेद्यथा मनोगतं तथा विधातुमर्हसि ॥ ४१ ॥

इदं निवेद्य भूपतिः प्रहृष्टमानसो भृशम् ।
जगाम कामविग्रहो निजं किलार्य्यमार्यधीः ॥ ४२ ॥

इति नरपतिसिंहः श्रीनृसिंहक्षितीशो
निजनगरमुदारं प्राप्य हृष्टान्तरात्मा ।
सपदि स खुरुधाख्यां स्वां पुरीं गन्तुकामो
निजमनुजमवोचत्कामधामाभिरामम् ॥ ४३ ॥

धरणिवलयसारः कार्यभारः सुघोरः
कलय समुपगन्ता सर्वसन्तापहन्ता ।
तदनघनिजसद्म श्वः श्रयिष्येऽनुकूले
पुरहरपदमूले कोऽनुकूलं विधत्ते ॥ ४४ ॥

तदिह गुरुणि कार्य्ये कार्यजातं विचार्य्य
स्वहृदि पथि निकार्यारम्भणे मौलवर्यान् ।
भृशमुपदिश यात्रा सज्जिता शेषपत्रा
सफलसकलनेत्रा श्वो भवित्रीत्यवश्यम् ॥ ४५ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवमहाकाव्ये
यात्रानिर्णयो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः

यात्राहेतो[1] रथनरनाथः प्रातश्चक्रे गतिमभीरामाम्[2] ।
कुन्दस्मेरोजिततनुमारोऽमन्दानन्दो निजनगरीं ताम् ॥ १ ॥

भृत्याभर्त्तुः पुरत उदाराः मस्त्रुस्तूर्ण्णसुखपरिपूर्ण्णाः ।
हस्तन्यस्तोज्वलविपुलोद्यन्माङ्गल्यास्ते शुचितरवेशाः[3] ॥ २ ॥

सिद्धार्थाज्याक्षतदधिदूर्वाशङ्खादर्शायुघमधुमीनाः ।
मुस्तागोरोचनफल वीणासिद्धान्नालंकरणसुमानि ॥ ३ ॥

भृङ्गाराम्भोरुहगजवाजिप्रोद्यद्बह्लचञ्चुशचमराणि ।
ताम्बूलाजव्यजनममर्त्यावासो यानासनकनकानि ॥ ४ ॥

रत्नं भद्रासननवशाकं रौप्यं ताम्रं ध्वजजलकुम्भौ ।
श्वेतछत्राञ्जनघनसारा वाचस्पत्यौषधिमदिराश्च ॥ ५ ॥

गोविट् चन्दनपशवोऽन्यद्यच्चापि यत्स्या[4] च्छुभमृषिदृष्टम् ।
तच्चैतच्चाखिलमतिशस्तं भव्याभव्येऽपि करणे यद्यत्[5] ॥ ६ ॥

दृष्टा स्पृष्ट्वा तदखिलमग्रे चक्रेक्षानं मदनतनुश्रीः ।
तत्संलापश्रवणविलोकस्पर्शो एषां क्रमतत दाराः[6] ॥ ७ ॥

नृत्यं वेदध्वनिरभिरामो गीतं वाद्यं श्रुतिसुखहेतुः ।
हृष्टो विप्रः शिशुरपि दिव्यन् रूपाजीवा शुचितरहावाः ॥ ८ ॥

मुग्धः स्निग्धः सुहृदपि वाजीभस्थः स्वस्थं शुचिवसनस्रक् ।
भुक्तो विप्रोऽकलि पथि राज्ञा यत्कार्याप्त्यै भवति सदैतत् ॥ ९ ॥

केचिन्मार्गे फलसुमहस्ता राज्ञोऽकस्मात् पुरत उदीयुः ।
एवं जाते विलसति यस्मात् सर्वा सिद्धिः करतलवद्धा ॥ १० ॥

---

१ । हेतौ
२ । गममभिरामामिति पाठः
३ । चतुर्भिः कुलकम्
४ । च्चापिस्या
५ । यत्
६ । युग्मकम्

रिक्तं भाण्डं किलजलहेतोर्धृत्वा जग्मुर्नृपमनु केचित् ।
लब्ध्वा तोयं यदिह कृतार्थास्तेस्युस्तद्वद्भवति च पान्थः ॥ ११ ॥

मार्गेऽपश्यन् शवमवनोशोऽयासोदाक्रन्दनरवहीनम् ।
तस्मिन् दृष्टे शुभमभिगन्तुः प्रत्यागन्तुर्विपदपि पार्श्वे ॥ १२ ।

इत्थं गच्छन् पथि नरनाथः क्रोशार्द्धेऽपि प्रवलवलाङ्गः ।
नैवादर्शि प्रतिपदहर्षोऽमाङ्गल्यं तद्विपदति हेतुः[1] ॥ १३ ॥

भस्माङ्गारौषधतुषकेशारज्जुः पङ्कगुड़लवणे च ।
विष्ठाकृष्णायसमतिदृष्टिरिक्तं भाण्डं निगड़वसाऽस्थि ॥ १४ ॥

तैलं चर्मार्गलतृणतक्रं कृष्णं धान्यं प्रतिमुखवातः ।
कार्पासाश्मवकरभुजङ्गाकाष्ठपिण्याकेध्मेऽशुभकरं[2] यत् ॥ १५ ॥

रोगा तैलाञ्जित रिपुनग्ना धावन्मुण्डोमलिनजटालौ ।
दीनोन्मत्तौ कलहविलापौ कृष्णाभस्रग्वसनविलेपाः ॥ १६ ॥

विछिन्नाङ्गोऽन्यजरतकेशग्रन्थिगर्भिण्यपि रजसार्द्रा ।
वराराव प्रधनविलोका यानाङ्घ्रि प्रस्खलनपलायौ ॥ १७ ॥

क्षुत्तृट् यामः खरतरभस्थो द्वाराघातः स्वधृतनिघातः ।
षण्णो द्वात्तौ तदपि शुभं नो यद् यच्चेतः सुखविमुखाय[3] ॥ १८ ॥

भूमीभर्त्तुं पुरत उदारा वीराः पश्चादपि धृतयोगाः ।
हस्ते न्यस्तो ज्वलदसिवल्ली चर्माणस्ते खरतरवेगाः ॥ १९ ॥

नित्याखेटान्तरपरिचर्या रक्तास्त्यक्ता हतगतपक्षाः ।
कक्षाभाजोऽमलकुलजाता नो संसक्ता विजितसमीराः ॥ २० ॥

एह्येहि द्राक् सरसर तूर्णं घूर्णद्धस्तोदरकरवालाः ।
इत्यन्योऽन्यं रटिति वदन्तः स्वासप्रोद्यत् कुटिलकटाक्षाः ॥ २१ ॥

---

१ । युग्मकम्
२ । त्रिभिः कुलकम्
३ । चतुर्भिः कुलकम्

स्वस्वाकाङ्क्षासमधिकवृत्तिग्रामाः पूर्वे वयसि समेताः ।
भोः भोः सभ्या रचितपरीक्षा लक्ष्मीवन्तस्तदनुविससुः ॥ २२ ॥

चेलुर्वोला अथ गजनाथा क्षान्तं कान्तं तमनुधरायाः ।
निर्यन्दाना निजनिजजात्या सन्तः सल्लक्षणगणयुक्ताः ॥ २३ ॥

तुल्यैरङ्गैर्धनुरिव वंशाभोगः स्थूलो मधुनि वदन्तः ।
जात्या भद्रः किटिसमजङ्घः शक्तो वृत्तायतकर उक्तः ॥ २४ ॥

स्थूलो यः पेचकजठराभ्यां लम्बग्रोवोदरवृषणश्च ।
पञ्चास्याक्षः श्लथवलयत्वग्वक्षः चक्षो भवति समर्थः ॥ २५ ॥

ह्रस्वश्रोत्रोदरकरशेफो लाङ्गुलाङ्घ्रि द्विजगलवालः ।
संस्थताक्षणे मृग इति दिष्टः संकीर्णस्यादनियतलिङ्गः ॥ २६ ॥

कृष्णं दानं ननु मृगजाते भद्रस्य स्यात् किल हरितं च ।
मन्दस्याङ्घ्रि प्रसरति गीतं संकीर्णस्यात् कलय विमिश्रम् ॥ २७ ॥

हस्ताः पञ्चोन्नतिरथ दैर्घ्यं सप्तानाहो भवति मृगेऽष्टौ ।
मन्दस्त्वेको न च परिवृषे भद्रो द्वाभ्यां प्रमितिकृतोऽन्यः[1] ॥ २८ ॥

मज्जच्चापाकृति ततवंशाः स्वासासप्तस्थिरपृथुपादाः ।
कर्णागानालिकहनुनाभी प्रोद्विस्तीर्णाश्चटकसमाक्षाः ॥ २९ ॥

कूर्माकारैर्द्विदशनखैर्वा युक्ता अष्टादशोभिरथो वा ।
तन्वैकैकायतकरराजत् सुस्निग्धो च प्रविततकेशाः ॥ ३० ॥

वृत्तप्रौढायतगलनाला दीर्घाङ्गुष्ठा रणितकरोग्राः ।
स्निग्धोदग्रायत इत दक्षोच्चोद्यद्दन्ताहि मदिन दानाः ॥ ३१ ॥

घ्राणप्राणायतमदगन्धाः शान्ता रेखा त्रयरतहस्ताः ।
एते भर्तुं विजयधनायुः कीर्तिं कुर्वन्त्यनिशमिभेन्द्राः ॥ ३२ ॥

---

१ । चतुर्भिः कुलकम्

दन्तच्छेदे विलसति येषां चिह्नं भृङ्गारकजलजानाम् ।
प्रोष्ठी[1] बालव्यजनश्रृणीनां चापि क्ष्माभृद्विजयकरास्ते ॥ ३३ ॥

दक्षे पार्श्वे स्फुरति च येषां सास्नासूक्तिस्त्वथफिटिका वा ।
तोऽमी नागा रणभुवि भर्त्रे यच्छन्त्यद्धा जनुजयलक्ष्मीम्[2] ॥ ३४ ॥

लक्षणैरेभिरहिताः कीर्त्यायुः श्रीसुखावहाः ।
यस्मिन्न तिष्ठन्ति गजाः प्रस्तावात्तावपि ब्रुवे ॥ ३५ ॥

मूढोऽपाहल्लसद्दन्तः कुदन्तारामकूटकः ।
अक्षस्पृक् च्चैव कूटश्च मत्कुणो वामनस्तथा ॥ ३६ ॥

कुब्जको विकटश्चैव पिण्डकश्चेति कुञ्जराः ।
सुशिक्षिता अपि त्याज्या एते द्वादश सूरिभिः ॥ ३७ ॥

दशां चतुर्थीं संप्राप्य वर्द्धेते यस्य न द्विजौ ।
स्थूला च नायतौ चैव स मूढाख्यो गजो मतः ॥ ३८ ॥

अपाहलो विशालेन दन्तैकेन च वारणः ।
अत्युन्नताभ्यां दन्तैः स कुदन्तः स्यादधो नतः ॥ ३९ ॥

वामदन्तोन्नतनागो रामकूट इति स्मृतः ।
दन्तावक्षिस्पृशौ यस्य सोऽक्षिस्पृक्कीर्त्तितो गजः ॥ ४० ॥

एकदन्तोभवेत्कूटो मत्कुणो दन्तवर्जितः ।
आनाहयामं सम्पूर्णो ह्रस्वो वामन ईरितः ॥ ४१ ॥

संक्षिप्तगात्रः पृष्ठान्ते क्रमेण च समुन्नते ।
हीनो मानैस्तथोन्नाभिः कुब्जो नाम्ना गजो मतः ॥ ४२ ॥

अरण्यभ्यधिकं यस्य विस्तारेण स्तनान्तरम् ।
विकटः सर्वनिर्दिष्टो गजागमकृतश्रमैः ॥ ४३ ॥

१। प्रोष्टी   २। जनुयलक्ष्मीम

पादयोः सन्निकर्षः स्यात्करणो यस्य गच्छतः ।
सपिण्ड इति विख्यातो भर्त्तुर्मरणमिच्छति ॥ ४४ ॥

ततो हया गतभयास्तत्तल्लक्षणलक्षिताः ।
मनोरया दया सिन्धोरस्यासस्रः समन्ततः ॥ ४५ ॥

रन्ध्रे द्वावुपरन्ध्रे द्वौ द्वौ शीर्षे द्वावुरस्यपि ।
प्रपाने च ललाटे च द्वावेव दश रोमजाः ॥ ४६ ॥

आवर्त्ता ध्रुवनामानः सूक्तयो वा प्रदक्षिणाः ।
अधिरोढूर्धनारोग्य-पुत्रसौख्यजयप्रदाः ॥ ४७ ॥

आवर्त्तो यस्य सुक्कस्थौ मुक्तीवापि प्रदक्षिणौ ।
तस्य भर्त्ताऽभीष्टमन्नं प्राप्नुयात्पुत्रपौत्रकैः ॥ ४८ ॥

ललाटे यस्य चावर्त्तौ समौ सुरुचिराकृतो ।
तद्गोप्ता पुत्रपौत्रैः स्वैः प्रधने विजयी भवेत् ॥ ४९ ॥

अग्निहोत्रनिभानैकाकृतयो यस्य मुक्तयः ।
तिस्रो ललाटे त्रैताग्निरिति नाम्ना सुदुर्लभः ॥ ५० ॥

ऋज्वायता समापंक्तिर्ललाटे यस्य दृश्यते ।
त्रिभिर्निश्रेणिका नाम तयारोहे द्विषां शिरः ॥ ५१ ॥

ललाटे यस्य चत्वारश्चातुरायः सुदुर्लभः ।
यथा यथाऽधिकावर्त्तास्तत्रातिशयदुर्लभाः ॥ ५२ ॥

मुकुलो वाऽथ वर्त्तिस्तु वेगो वैरिविनाशनः ।
आवर्त्तौ कर्णमूलस्थौ वृषभाविति कामगौ ॥ ५३ ॥

व्यूढ़ो निगालगोदेव मणिऋक्षातिकामदः ।
त्यक्त्वा ककुद्भवं दोषान् हरेत्कण्ठगतं तथा ॥ ५४ ॥

केशान्तयो द्वे शुक्ती जायते यस्य वाजिनः ।
तद्भर्त्ता विजयी भूयादाहवे वहुपुत्रवान् ॥ ५५ ॥

यस्य वक्षसि चत्वारो रोचमानः स घोटकः ।
हत्वारातीन् प्रतिदिनं दद्यात्क्षोणीमकण्टकाम् ॥ ५६ ॥

श्रीवृक्षकी पञ्चभिः स्यादावर्त्तैर्वशि संस्थितैः ।
सर्वार्थकामदेवाहस्त्रिभिः शत्रुविनाशकः ॥ ५७ ॥

वाहुजौ यस्य चावर्त्तौ शुक्ती वा मुकुलावपि ।
सोऽङ्गदीनाक्षभर्त्तारं भूषयेद्भूरिभूषणैः ॥ ५८ ॥

आवर्त्तौ रन्ध्रयोर्यस्य स्यातां वाप्युपरन्ध्रके ।
स मेखली नाम हयो वर्द्धते कोषमन्दिरम् ॥ ५९ ॥

आवर्त्तोऽर्द्धेन्दु वज्रार्कगदालाङ्गलयूपवत् ।
यस्योरसि ललाटे वा स देवाश्वः सुदुर्लभः ॥ ६० ॥

अष्टौ शिता यस्य शिरो वक्षपुच्छं मुखं खुराः ।
सोऽश्वोष्टमङ्गलो नाम भर्त्तुर्मङ्गलकृन्मुहुः ॥ ६१ ॥

श्वेतः शोणो हरिः कृष्णो वर्णाः शुद्धा हयेष्वमी ।
एतेऽन्योऽन्यं समेतान्य वर्णत्वं प्राप्नुवन्ति च ॥ ६२ ॥

हंसकुन्देन्दुनीहारहारक्षीरदरप्रभाः ।
श्वेतवर्णा इमे प्रोक्ता विपरीतास्तु मिश्रिताः ॥ ६३ ॥

शोणागुञ्जाजवाशोकलाक्षावालार्कसन्निभाः ।
हरिद्वर्णास्तु किञ्जल्कहेमकुङ्कुममञ्जुलाः ॥ ६४ ॥

कृष्णा भृङ्गाञ्जनघनजम्वुरिष्टेद्रनीलभाः ।
अप्यन्यवर्णाः सश्यन्ते ये स्निग्धाः सुप्रभासुराः[1] ॥ ६५ ॥

पृथुस्कन्धललाटाक्षिकटिवक्षस्थला तथा ।
ह्रस्व पृष्ठाण्डकर्णाश्च दीर्घग्रीवा सुपञ्जराः ॥ ६६ ॥

---

१ । त्रिभिः कुलकम्

दीर्घनिर्मांस जङ्घाश्च घनश्वेतरदास्तथा ।
सुगन्धाः कोमलतनुप्रोथजिह्वाः सफेर्हदाः ॥ ६७ ॥

सूक्ष्मत्वश्रोमवालाश्च शुक्लकेशरदाच्छदाः ।
मूर्द्धावर्त्ताः संहताङ्गा दुर्लभा भुवि वाजिनः ॥ ६८ ॥

भृङ्गभिन्नाञ्जनघनपक्वजम्बु समप्रभम् ।
आरोहति मृधे योऽश्वं तस्य वश्या जगज्जनाः ॥ ६९ ॥

यस्य विश्वाश्रयस्यैतद्दोषजातवशावशाः ।
सन्ति नैवावरुद्धानां प्रसङ्गात्तानपि ब्रुवे[१] ॥ ७० ॥

प्रोथगण्डासनकटभ्रूमध्योष्ठद्वयेषु च ।
श्रोतयुग्माग्रशङ्खाश्रुपातकुक्षिकलास्वपि ॥ ७१ ॥

सनासावहृविदुः क्रोड़पुच्छगलेषु च ।
जङ्घाप्रमाणवृषणकूर्चस्थूरा त्रिकेष्वपि ॥ ७२ ॥

कक्षोरुहनुसन्यासु मुकुला ऋषि भाषिता ।
आवर्त्ता वा तुरङ्गाणां दोषाय स्युर्न संशयः ॥ ७३ ॥

हीनाधिकच्युतश्यामासमैकाकारदन्तिनः ।
तथा काकसहृज्जानुककुदावर्त्तनश्च ये ॥ ७४ ॥

समुष्कदन्तजाताश्च दिनजाताश्च चित्रिणः ।
एकत्रिलम्बकीशाभचित्ररोमशमुष्किणः ॥ ७५ ॥

नकुलो लुककीशोतुकं कगुध्रनिरीक्षणाः (?) ।
एकपिङ्गेक्षणादग्धचर्मगन्धा करालिनः ॥ ७६ ॥

सीमन्तमिश्रजटिलाञ्जनकेशा नपुंसकाः ।
केशवालैर्विना जातास्तथा मूषलिनश्च ये ॥ ७७ ॥

---

१ । त्रिभिः कुलकम्

द्विगर्भा गौरखरवत्पृष्ठहीनाधिकाङ्गकाः ।
खराऽश्वगड़मार्जारपदाः प्रेताहृताशयाः ॥ ७८ ॥

प्रोथताल्योष्ठजिह्वार्ण्णसृक्कमेढ्रशिरोऽशिताः ।
अन्यवर्ण्णशिरः पुछा दीप्तपुछाश्चलो पुनः ॥ ७९ ॥

ललाटलिप्तत्रिकशौरिश्यामालासममुक्तयः ।
तत्र स्युः दोषाय महत्ते हयाः यत्नेन तास्त्यजेत्[1] ॥ ८० ॥

शृङ्गी त्रिकर्ण्णी द्विखुरी स्तनी पञ्चशफोजीनी ।
एते महादोषतमा राज्यं घ्नन्ति सराजकम् ॥ ८१ ॥

शरभस्मजवृत्तालशृगालाङ्गारसन्निभाः ।
धूम्रशूषिकभूदारतुल्यवर्णाहयाधमाः ॥ ८२ ॥

शोणं कर्ण्णं हरिचित्रपीतमर्द्धशितंश्चितम् ।
रागं सप्तविधं ज्ञेयस्तुरंगाणां च तालुनि ॥ ८३ ॥

रक्तं तेभ्योऽधिकं शेषारागानैव शुभावहाः ।
तद्गम्भीरं तनु स्निग्धं शुभाय विजयाय च[2] ॥ ८४ ॥

एतैर्लक्षणलक्षितैर्गजहयैर्वीरैश्च सोऽनुभुतो-
निद्राविद्रुतपुण्डरीकनयनो मार्गे निसर्गोज्वलो ।
मन्दं मन्दमुपेत चन्दनमरुत्किंचिच्चलत्तोरणे
रम्भास्तम्भविजृम्भितामृतलसत्कुम्भावलीसम्भूते ॥ ८५ ॥

पापप्रस्तुतशासनेषु वटुभिः प्रोद्गीर्ण्णकर्ण्णामृत-
प्रायाम्लायपदैर्गृहीतलिखितैः पूर्ण्णेषु विर्ण्णोज्जलैः ।
न्यञ्चत्केसरनारिकेलकदलीचूतावलीलालिते-
ष्वाशीर्वादमुदारधीः प्रतिपदं गृह्णन् परानिर्जरात् ॥ ८६ ॥

---

१ । तपिस्यु दोषायमहृते हया यत्नेन तास्त्यजेत् ।   २ । त्रिभिः कुलकम्

शृण्वन्कर्णसुखावहां सुविपुलां भोगावलीं मञ्जुलां
भ्राजन्मागधवन्दिसूतवदनाम्भोजन्मसंजृम्भिताम् ।
दूराद्वीक्षितहेतवे परिपतन्नानाजलप्रोल्लस-
न्नेत्रव्यूहवहं मुहुर्बहुविधं सम्पादयन् स्वां पुरीम् ॥ ८७ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये हरगौरीकः
पुरीप्रवेशो नाम षष्ठः सर्गः ।

सप्तमः सर्गः

अपश्यदस्या अथ विस्मयाकुलो विलोलमन्दस्मितसुन्दराननः ।
स सर्वतः पर्वतराजसन्निधि प्रवेशभाजः सुसमां समाहृतः[1] ॥ १ ॥

वनावली यत्र जगत्त्रयी मनोविनोदिनी प्रोन्मदशारिका पिका ।
विकासि सौरभ्य गभीरसुन्दरप्रसूनराजो परिपूरितोदरा ॥ २ ॥

दुरन्तसम्भोगरसावशात्मनां श्रमक्षये दक्षिणदक्षिणानिला ।
अवारमारव्यसनप्रदीपितप्रतोकभाजामपि शर्मकर्मभूः ॥ ३ ॥

निकुञ्जपुञ्जोदरमञ्जुगुञ्जितद्विरेफसन्दोहनिनादसुन्दराम् ।
अवालरागोज्ज्वललोलमञ्जुलप्रवालजाला कलिता विराजते[2] ॥ ४ ॥

जलाशया यत्र पवित्रदेहिना स्फुरन्ति सर्वत्र विसारि वारिजाः ।
सदाऽच्छमत्स्यावलिशालिशम्वरा वराङ्गना वारिविहारहारिणः ॥ ५ ॥

प्रतिक्षणं सौरभसंभ्रमभ्रमद्विरेफपुञ्जध्वनिमञ्जुलान्तराः ।
अमानसोपानपरस्परोत्तरा मरालकारणवनादवादिनः ॥ ६ ॥

गुणाकराश्चक्रधरा हितादरा दरारिचिह्नै विलसत्कलेवराः ।
प्रतिक्षणं तद् गुणगानतत्पराश्चरन्ति यत्र प्रतिवासरं नराः ॥ ७ ॥

न कृष्णकृष्णेति यतः प्रतिक्षणं श्रुतिः स्मृतिः प्रीतिकरी निवर्त्तते ।
मृषावचो नैव जनोवदत्यहो वृषाकपिन्यस्तमना मनागपि ॥ ८ ॥

अहो च हिंसा मनसापि देहिनां विधेहि तस्यां भविता कुतो रतिः ।
ददस्व वादः प्रतिवासरं यतः प्रतिक्षणं शाम्यति नैव सर्वतः ॥ ९ ॥

दयो दयो यत्र पवित्रचेतसां कदापि नो सर्पति सर्वतस्ततः ।
मुकुन्दपादाम्वुजदत्तचेतसां भयोदयस्तत्र कुतः समागतः ॥ १० ॥

---

१ । त्रिभिः कुलकम्   २ । युग्मकम्

अहो किमन्यत्कथनेन यत्र तु प्रतिक्षणं पक्षिगणैरराणि च ।
उपेन्द्रगोविन्दमुकुन्दकेशवक्षमाम्वुधे यादवमाधवेत्यपि[1] ॥ ११ ॥

नृपायनं यत्र तुरङ्गसंहतिः खुरक्षतिप्रोद्धूतधूलिधूसरम् ।
गलन्मदासारशनैः शनैर्व्रजद्गजव्रजोद्गर्जनतर्जिताखिलम् ॥ १२ ॥

अवारमारज्वरनुन्न चेतसां परस्परप्रेमभृतां विलासिनाम् ।
अलक्षविक्षेपकटाक्षवीक्षणक्षणश्रियाऽनुक्षणपूरितान्तरम् ॥ १३ ॥

निकामनानागमवादचातुरी परीतमध्यं विदुषामितस्ततः ।
अमानमानद्धपनादिवादनैर्घनैर्जनानन्दकरैश्च संभृतम् ॥ १४ ॥

क्वचिन्मनोजन्मकलाकलापभृत्कलावतीगानविलासलालसम् ।
अपण्यपण्यावलिशालिविस्मृतस्फुरन्निषद्योद्यतवादवादितम् ॥ १५ ॥

क्वचिन्महेन्द्रोपलनीलविस्फुरत् प्रवालजालाकुलवीथिकाशतम् ।
विराजते घोरतरैनसां[2] परिक्षयैकदक्षश्रुतिघोषभूषितम् ॥ १६ ॥

प्रशस्तकस्तूरीकया समाहृतो मधुव्रतो हस्तविधूननैरपि ।
नक्षत्रसाक्षाद्विररामवारितः कृतापराधः किमु जीवबान्धवः[3] ॥ १७ ॥

अयि प्रफुल्लैः किमहो महोत्पलैर्मनोऽधुना तत्कलिकायुगग्रहे ।
इतीव काञ्चिन्निजगाद सादरं निकामकामज्वरजर्जरीकृतः[4] ॥ १८ ॥

ममोपकण्ठं कुरु नारि सादरं किमऽन्यपुष्पैः किल चम्पकावलीम् ।
मनोविनोदक्षणमेव यद्भवेत्तदेव सर्वो हि जनोऽभिवाञ्छति ॥ १९ ॥

इतीतरोऽभात च मालिकावला दृगन्तखेला कवलीकृताशयः ।
प्रसूनजालानि विलोक्य तत्पुरो मनोजनुः खिन्नतनुर्मुहुर्मुहुः[5] ॥ २० ॥

१। पञ्चभिः कुलकम्
२। तरैनस्वाम्
३। किपुत्रीव वान्धवः
त्रिभिः कुलकम्
४। युग्मकम्
५। पञ्चभिः कुलकम्

अयि स्मरान्धेश रसोदितस्मितैर्न मल्लिकोल्लासमुपैति सर्वतः ।
तनुश्रिया कम्पितमेव चम्पकं जवा नवा भात्यधरश्रियाऽनया ॥ २१ ॥

न याति जातिस्तुतियोग्यतां पुनर्मुखारविन्दस्वसनैरनुत्तमैः ।
विसारिहारीक्षणशोभयाऽवलेऽवलेपशून्यं किल नीलनीरजम् ॥ २२ ॥

जहात्यहो कोकनदं मदंकरं समीक्ष्य कुन्दान्यपि दन्तशोभया ।
तथाऽरविन्दं वदनेन्दुशोभया भयाभिभूतं वत निष्प्रभं प्रिये ॥ २३ ॥

कुतोऽस्य शातोदरि शाधिवाधितं प्रसूनवृन्दस्य च विक्रयो भवेत् ।
यदीन्द्रियाणां सुखकारि जायते तदेव बाले किल सर्व इच्छति ॥ २४ ॥

इतीव धूर्त्तः किल जातकौतुकं विसारिमारज्वरभारभारितः ।
निगद्य मन्दस्मितसुन्दराननो मनोस्तनोराशु जहार यत्र तु ॥ २५ ॥

जहीहि मार्गं न हि याहि सत्वरं पुरो द्विरेफः प्रवरोऽधिरं तव ।
अदभ्रसौरभ्य रसावशीकृतः पिपासुरेतोत्यवदत्परस्परम् ॥ २६ ॥

निधाय कुम्भौ सुधयातिसम्भृतौ हृदि प्रयास्यम्बुकृते कथं पुनः ।
सुधातितृप्तस्य जलं न शीतलं सुखाय भूयादिति कोपि कामपि[1] ॥ २७ ॥

जहीहि मार्गं न हि याहि सत्वरं पुरः करो वीक्ष्य तव स्तनौ घनौ ।
प्रतीभकुम्भावितिसम्भूताक्षमः समेति पश्यास्य कटं महोत्कटम् ॥ २८ ॥

गताऽसि शातोदरि जीवसंशयं हृतैकरत्नं विधिनाऽधुना जगत् ।
ममोपकण्ठं कुरु नारि सत्वरं करद्वयं त्वां परिरभ्य निर्भरम् ॥ २९ ॥

इतो गमिष्यामि भवत्कृते पणीकृतासुरुत्तुङ्गघटोभटस्तनि ।
इतिति कश्चिन्निजगाद सादरं मुहुः शपे यत्र भगातुरां पराम्[2] ॥ ३० ॥

निकार्यतः कार्य्यवशादुपेयुषो विधीच्छया लोचनमार्गमीयुषोः ।
अमुद्रसमोदसमुद्रमज्जतोः परस्परस्नेहरसावशात्मनोः ॥ ३१ ॥

---

१ । त्रिभिः कुलकम् २ । युग्मकम्

यतस्तु यूनोर्जनताभयोदयात् परस्परालापसुखान्यगच्छतोः ।
अपारमारव्यसनालिशालिनोर्मनो न गन्तुं वलते निवर्त्तितुम् ॥ ३२ ॥

करान्तरा प्राप्तसरोजकुट्मलं नखैरजस्रं लिखति प्रिये प्रियाम् ।
विलोक्य मन्दस्मितसुन्दरानना करोदरं स्वे चिकुरे निरास सा[1] ॥ ३३ ॥

अयीन्दुकुन्दस्मितसुन्दरानने गले किमेतद्घट एव पान्थ हे ।
किमत्र चास्ते वनमत्र नो नगाः पयोऽकगव्यं किमुमाहिषं भण ॥ ३४ ॥

न पुष्करं नात्र करीदरस्मिते न कं प्रिये कस्य शिरो निगद्यताम् ।
न जीवनं कस्य विधेहि नामृतं तवाधरे[2] नो कमलं किमम्वुजम्[3] ॥ ३५ ॥

अविकहे कानलवोऽपि नास्ति ते कबन्धमत्राङ्गममस्तमस्ति किम् ।
घृतं हविः किं न हि शोभने कुशं किमत्र कर्माङ्ग पवित्रमस्ति भो ॥ ३६ ॥

इतीव यत्रातिविदग्धचेतसां परस्परालापसुखं समेयुषोः ।
ऋतोर्निदाघस्य समागमे भृशं जपन्ति यूनोर्वचनानि तानि तु[4] ॥ ३७ ॥

नितान्तकान्तोऽसि कुतोऽध्वनि न यन्न कुत्रचिद्वस्तुनि ते मनोऽधुना ।
रुचिं विधत्ते भण हेतुरत्र को विशालनेत्रेऽतनुभागतो ननु ॥ ३८ ॥

हहामहानेष पराभवोऽभवत् किमत्र पथ्यं पथिकाशुकस्वताम् ।
मनोविनोदं रुचके फलेऽवले तनोति तत्केन करोदरे भवेत् ॥ ३९ ॥

अयत्नलभ्यं न हि पान्थ तद्भवेत्तवापि साधो कतमोऽस्ति वा श्रमः ।
इतीव साकूतवचोऽमृतं ततं ततान यूनोर्मनो विनोदनम्[5] ॥ ४० ॥

क्व यासि शातोदरि जातकौतुका कलावती सम्प्रति केवलाऽवला ।
समीक्ष्य साक्षादिदमेकसाधनं न लक्षसे स्नानकृते गतिर्मम ॥ ४१ ॥

सुखाति विज्ञातमिदं तथापि ते विना सहायैर्गमनं न शोभनम् ।
निकामकामज्वरवामचेतसां भवादृशां नो विपदः पदे पदे ॥ ४२ ॥

---

१ । चतुर्भिः कुलकम्
२ । चवाधरे
३ । कमाम्वुजम्
४ । त्रिभिः कुलकम्
५ । त्रिभिः कुलकम्

तदेहि याहि स्वगृहं प्रियेऽथवा सदायमासाद्य भजस्व काङ्क्षितम् ।
इतीव यूनोर्नयनान्तचातुरी परीतमेतद्वचनं व्यरोचत ॥ ४३ ॥

किमधिक कथनेन स्यादहो नीलशैला-
धिपतिरपि कदाचिद्यत्र मित्रेन्दुनेत्रः ।
विहरति सह रामः पिष्टपानां ललामः
सजलनवपयोदश्यामधामाभिरामः ॥ ४४ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये पुरीवर्ण्णनं नाम सप्तमः सर्गः ।

अष्टमः सर्गः

ययौ नरवरो वीरो धीरो नीरजलोचनः।
प्रविश्य नगरं देवमिष्टं द्रष्टुं तदालयम् ॥ १ ॥

नवतालमिता यत्र प्रतिमाः सन्ति सन्ततम्।
नानामूर्त्तिधरादोषैरस्पृष्टः पुष्टिदागतः ॥ २ ॥

एकतालमितं वक्त्रं ग्रीवा च चतुरङ्गुला।
तालेन हृदयं तस्मादभिनाभि तथाविधः ॥ ३ ॥

ख्याततारायतैः सैकाङ्गुलास्यान्मोहनावधि।
एकस्तालस्ततो द्वाभ्यामुरुर्जानुः शिरोधिवत् ॥ ४ ॥

द्वाभ्यां जङ्घाऽथ चरणं चतुरङ्गुलसम्मितम्।
मौलिरिन्द्राङ्गुलः सर्वांशोर्ध्वमानमितीरितम् ॥ ५ ॥

अथास्य दैर्घ्यमानं तद्विशिष्य च विविच्यते।
वेदाङ्गुलं ललाटस्यादुच्चा नासा तथाविधा ॥ ६ ॥

अर्द्धाङ्गुला भवेद्भोजी प्रणालसदृशी तथा।
उत्तरोष्ठस्तु मानेनार्द्धाङ्गुलः समुदीरितः ॥ ७ ॥

एकाङ्गुलोऽधरः प्रोक्तो द्यङ्गुलं चिवुकं मतम्।
इत्थमाननमानं स्यात्तिर्यङ्मानमथोच्यते ॥ ८ ॥

अष्टाङ्गुलं ललाटं स्यात्तावन्मात्रे भ्रुवौ मते।
अर्द्धाङ्गुला भ्रुवो रेखा मध्ये धनुरिवोन्नता ॥ ९ ॥

त्र्यङ्गुलाऽक्षि स्थली द्वे द्वे नेत्रे चैकैकविस्तृते।
क्रमादुन्नतमध्येते रक्तान्ते तत्त्रिभागतः ॥ १० ॥

तारका मसृणा कृष्णा दृष्टिस्तत्पञ्च भागभाक् ।
नासामूलं भ्रुवोर्मध्ये द्व्यङ्गुलं त्वग्रविस्तृतिः ॥ ११ ॥

एकमस्याः पुटयुगं तथार्द्धार्द्धाङ्गुले विले ।
निष्पावसदृशो नासापुटच्छद उदाहृतः ॥ १२ ॥

सृक्कणी ज्योतिषातुल्ये कर्ण्णमूलात् षड़ङ्गुले ।
गण्डौ वेदाङ्गुलौ तद्वत् कर्ण्णमूलाद्विनिःसृतौ ॥ १३ ॥

हन्वग्रमङ्गुलं तस्य विस्तारो द्व्यङ्गुलो भवेत् ।
कर्ण्णौ तु भ्रूसमौ ज्ञेयावूर्ध्वं तु चतुरङ्गुलम् ॥ १४ ॥

द्व्यङ्गुले कर्ण्णमूले तु मात्रा चैकेन विस्तृतौ ।
षट्त्रिंशदङ्गुलः प्रोक्तः परीणाहः शिरोगतः ॥ १५ ॥

केशान्ताद्धनुका तद्वदङ्गुलानि त्रयोदश ।
इत्थमाननमानानि विज्ञेयानि विपश्चिता ॥ १६ ॥

ग्रीवामध्ये परीणाहश्चतुर्विंशतिकाङ्गुलः ।
अष्टाङ्गुलं च तन्मूलं पृथुत्वेन विशिष्यते ॥ १७ ॥

एकतालं स्तनग्रीवान्तरं तु स्तनयोरपि ।
मध्यं व्रध्नाङ्गुलं नेत्राङ्गुलं मण्डलमेतयोः ॥ १८ ॥

चुचुके नावमात्रे स्याद्द्वितालावक्षसायतिः ।
कक्षे षड़ङ्गुले प्रोक्ते बाहुमूलस्तनान्तरे ॥ १९ ॥

चतुर्द्दशाङ्गुलौ पादावङ्गुष्ठस्तु त्रिरङ्गुलः ।
तर्जन्यङ्गुष्ठसदृशी मध्या हीना कलांशतः ॥ २० ॥

हीयतेऽनामिका चाष्टभागेनापि कनिष्ठिका ।
पर्वत्रयेण चाङ्गुल्यो द्विपर्वाऽङ्गुष्ठ ईरितः ॥ २१ ॥

परीणाहे तून्नताग्रोऽङ्गुष्ठः पञ्चाङ्गुलः स्मृतः ।
तर्जनी त्र्यङ्गुला चान्या हीनाः स्युर्वसुभागतः ॥ २२ ॥

अङ्गुलेनोच्छ्रितोऽङ्गुष्ठस्तदर्द्धेन तथेतराः ।
नखोऽङ्गुष्ठस्य तुर्यांशहीनमङ्गुलमीरितः ॥ २३ ॥

परीणाहस्तु जङ्घाग्रे अङ्गुलानि चतुर्दश ।
तन्मध्येऽष्टादश प्रोक्तो जान्वन्तश्चैकविंशतिः ॥ २४ ॥

जानूच्छ्रायोऽङ्गुलं तस्य मण्डलं चाङ्गुलत्रयम् ।
उरुमध्ये परीणाहस्त्वष्टविंशतिरङ्गुलः ॥ २५ ॥

एकत्रिंशत्तन्मूले च वृषणस्तु त्रिरङ्गुलः ।
परीणाहे च दैर्घ्ये च तथा मेढ्रः षड़ङ्गुलः ॥ २६ ॥

मणिबन्धो यथाकोषे रेखाऽपि च तथा मता ।
मणिकोषपरिणाहौ वेदाङ्गुल उदीरितः ॥ २७ ॥

भवेद्विस्तारतस्तावत्कटिरष्टादशाङ्गुलम् ।
नाभीमध्ये परीणाहो द्विचत्वारिंशदङ्गुलः ॥ २८ ॥

कट्यास्तु पञ्चपञ्चाशत्स्याद्धौं प्रोक्तौ षड़ङ्गुलौ ।
अष्टङ्गुलौ च विस्तारो ग्रीवा च द्वादशाङ्गुला ॥ २९ ॥

भुजायामस्तु कथितो द्विचत्वारिंशदंगुलः ।
कार्यं तु बाहुशिखरप्रमाणे षोड़शांगुलम् ॥ ३० ॥

बाहुपर्वं यदूर्ध्वं तु तन्मदष्टदशांगुलम् ।
एकांगुलोज्झितं पर्व द्वितीयं परिकीर्त्तितम् ॥ ३१ ॥

बाहुमध्ये परीणाहो भवेदष्टदशांगुलः ।
षोड़शाऽत्र प्रवाहोः स्याद्द्वादशाऽग्र करो मतः ॥ ३२ ॥

सप्तषड़दीर्घताराभ्यां तलं मध्या शरांगुला ।
अनामिका मध्यमायाः सप्तभागेन हीयते ॥ ३३ ॥

तस्यास्तु पञ्चभागेन कनिष्ठाऽथ प्रदेशिनी ।
शरांशतो मध्यमाया अङ्गुष्ठस्तर्जनी समः ॥ ३४ ॥

अधस्तन्मूलतो जातः स चानाहेर्नवाङ्गुलः।
शेषाणामङ्गुलीनां च भागभागेन हीनता ॥ ३५ ॥

मध्यमा मध्यपर्वस्यादङ्गुलद्वयमायतम् ।
यव यवोस्तु सर्वेषां तस्यास्तस्याः प्रहीयते ॥ ३६ ॥

अङ्गुष्ठपर्वमध्यं तु तर्जन्याः सदृशं भवेत् ।
यवद्वयाधिकं त्वग्रपर्वपर्वार्द्धतो नखात् ॥ ३७ ॥

निम्नं पृष्ठं भवेन्मध्ये पार्श्वतः कलयोस्थितम् ।
तथैव केशबन्धस्तु स्कन्धोपरि दशाङ्गुलः ॥ ३८ ॥

अथ दुर्गादयोदेव्यस्तत्र तिष्ठन्ति सन्ततम् ।
ताः कार्या आर्यमतिना स्तनोरुजघनाधिकाः ॥ ३९ ॥

चतुर्दशाङ्गुलायाममुदरं तासु निर्दिशेत् ।
द्वाविंशति परीणाहे कटीभान्वङ्गुलौ कुचौ ॥ ४० ॥

किञ्चिद्दीर्घं मुखं नेत्रं चतुर्भागेन चाधिकम् ।
नासाग्रीवाललाटं स्यादासां सार्द्धत्रयाङ्गुलैः ॥ ४१ ॥

अर्द्धार्द्धाङ्गुलविस्तारादधरोष्ठौ मनोरमौ ।
ग्रीवावलिश्च कर्त्तव्या किञ्चिदर्द्धाङ्गुलोच्छ्रयः ॥ ४२ ॥

एवं नारीषु सर्वासु देवताप्रतिमासु च ।
नवतालमिदं प्रोक्तं लक्षणं पापनाशनम् ॥ ४३ ॥

दशतालोच्छयो रामो वराहो नृहरिस्तथा ।
वामनः सप्ततालस्तु मत्स्यकूर्मौ यथा रुचिः ॥ ४४ ॥

अङ्गुष्ठपर्वाभ्यधिकदशतालावसानिका ।
शक्त्युच्छ्रायानुग स्वस्वलक्षणे यत्र लक्षिताः ॥ ४५ ॥

दोषैरुपद्रुता यत्र न च तिष्ठन्ति देवताः ।
तास्तु प्रसङ्गतो वक्ष्ये संक्षेपण यथा मतिः ॥ ४६ ॥

करालास्या तथाङ्गेषु न्यूना स्वामीविनाशिनी ।
कृशार्थनाशिनी नित्यमधिका शिल्पघातिनी ॥ ४७ ॥

निर्मांसा धनधान्यघ्नी दुर्भिक्षाभा कृशोदरी ।
दुःखाय वक्रनासा तु क्षिप्राक्षी तु भयङ्करी ॥ ४८ ॥

अनेत्र नेत्रनाशाय चिपिटा दुःखशोकदा ।
पाणिपादकृशा हीनानना चैवातिदुःखदा ॥ ४९ ॥

हीनाङ्गी या भ्रमोन्मादकरी शुष्कानना पुनः ।
कटीहीना तु भूपघ्नी हीनवक्षःस्थला तु या ॥ ५० ॥

पुत्रकादिविनाशाभा पत्पाणिभ्यां विहीनया ।
क्रियते मरकं जानुरुभ्यां चारातिमङ्गलम् ॥ ५१ ॥

द्वारष्टांशस्य हीनास्य सौधेयोऽशस्तृतीयकः ।
पिण्डिका तत्प्रमाणा स्यात् प्रतिमा द्विगुणा ततः ॥ ५२ ॥

वीतिहोत्रेन्दुमित्राक्षो पत्रास्तल्लक्षणोज्झितः ।
तत्तल्लक्षण संयुक्तो रुद्रोविद्रावकोऽघसाम् ॥ ५३ ॥

लिङ्गवृत्तासमानं यद् तादृग्दैर्घ्यं त्रिधा तु तत् ।
मूले वेदास्रमपरमष्टास्रं वृन्तमग्रतः ॥ ५४ ॥

चतुरस्रं धरागुप्तं मध्यंस्यात्पिण्डिकावृतम् ।
वृत्तं यदपरं तत्तु दृश्यत्वेन व्यवस्थितम् ॥ ५५ ॥

कृशदीर्घं तु देशघ्नं क्षत्रमस्त्रविनाशकृत् ।
पुरनाशाय नित्यं स्याल्लिङ्ग पार्श्वेक्षतं यदि ॥ ५६ ॥

तदनु सदनमध्ये तत्र मित्रार्जितश्रीः
सुरनिकरमुदारं वीक्ष्य लक्ष्मी निवासः ।
कृतनतरतिनम्रः कामकम्रकृपालु-
र्बहिरभवदुदीर्णस्तेत्र जातस्तुतः सः ॥ ५७ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये
देवालयप्रवेशो नाम अष्टमः सर्गः ।

नवमः सर्गः

गोत्राधिनाथोऽथ पदानि सत्पथे
तथा विधेहीति[1] निकेतनस्य सः ।
आविश्चकारावर जैरनुद्रुते
विनिद्रनीलोत्पललोललोचनः ॥ १ ॥

सुकान्ति भो देव जयेति सन्ततं
स तानि तानि प्रतिहार रक्षिणाम् ।
शृण्वन् ययौ मङ्गलवादमादरा-
द्धरासुराणां च मनोविनोदनम् ॥ २ ॥

आसाद्य तत्तारतरं धरेश्वरः
स तानि सद्रत्नलसत्सरूणि च ।
युक्तानि तैस्तैर्निजलक्षणैः क्षणं
ददर्श हर्षाकुललोललोचनः ॥ ३ ॥

पञ्चाशता खड्गलताऽनुताङ्गुलै-
र्युताथ दोषै रहिता चिताङ्गनैः ।
मत्स्यायुध-स्वस्तिक-वर्द्धमानक-
ध्वजातपत्राम्वुज-कुण्डलप्रभैः ॥ ४ ॥

चण्डातवंशोज्वलपत्रसन्निभा
शुभावहा गोरसनानिभापि वा ।
गन्धोऽपि कुन्दोत्पल कुङ्कुमाज्यवत्
सुवर्ण्ण-वैदुर्य्य-तड़ित्-प्रभापि भा ॥ ५ ॥

युक्ताऽङ्कनैः कङ्कबन्धवृश्चिका-
त्म घोषरक्षः कृकलाससन्निभैः ।
दोषाय ह्रस्वा स्फुटिता च कुण्ठिता
तथाऽस्वना स्यान्नयना सुखानि च ॥ ६ ॥

---

१ । विधेहेति

गोमूत्रजं वालक कूर्मशोणिता-
मिषास्थिकक्षारसमानगन्धभृत् ।
दुःखानुसन्धानपरा सुवल्लरी
भवेदतोऽन्या यदि मङ्गलप्रदा ॥ ७ ॥

खड्गे स्वयं प्रक्वणिते मृतिर्मता
भवेज्जयी प्रज्वलिते मुहुर्मुहुः ।
कोषाद्बहिर्गच्छति युद्धमारितं
भवेज्जयोऽतो न बहिः समुद्यते ॥ ८ ॥

पश्येन्मुखं नात्र वृथा न चालये-
दकारणं नैव च तं प्रकाशयेत् ।
मूल्यं वदेन्नो न च देशमस्य वा
स्पृशेदशुद्धो न च दैवतं यतः[1] ॥ ९ ॥

पुत्रप्रणाशोऽर्वचितिर्घनक्षति-
र्घनं न बन्धुश्च सुतागमः कलिः ।
हस्त्यागमः पुत्र मृतिर्धनोदयो
विनाश कान्ताप्तिधनक्षयो दयाः ॥ १० ॥

हानिर्महिलावधवृद्धयोमृतिः
सुखाप्तिवित्तक्षतिहाटकाप्तयः ।
अस्वास्थ्य हेमागममृत्युसम्पदो-
ऽसुखं प्रभुत्वं मरणं च राज्यकम् ॥ ११ ॥

एकाङ्गुला त्रिंशदभिव्रणैरिति
स्मृतं फलं तत्परतः शिरोऽवधि ।
वाच्यं फलं नैव परे पुनर्जगुः
शुभाशुभं तत्तु समासमांगुले ॥ १२ ॥

पारावताख्योः स कृता विमिश्रिते
हूड़स्य शृङ्गोत्थमसीचितेऽर्कजे ।
क्षारेऽस्तमभ्यङ्गचितं सुगायितं
करोति घातं विततं शिलास्वपि ॥ १३ ॥

---

१ । त्रिभिः कुलकम्

क्षारे कदल्या स्वरसेन सम्भूते
दिनोषिते पायितमायसं तु यत् ।
नो तस्य लोहेऽपि दृषद्यपि च्युति-
र्भवेदपामार्गरसोऽपि तादृशः ॥ १४ ॥

स्यात्तालगर्भे झषपित्तरोहिषा-
श्ववस्तदुग्धे करिहस्तकृत्तये ।
षड्विन्दु कीटान्वितनीलमक्षिका-
त्तूलिप्त शस्त्राहतितो व्रणे कृमिः[1] ॥ १५ ॥

तालस्य भागौ करवीर लाङ्गली
भागास्त्रयः पञ्चहलाहलस्य च ।
अष्टौ च चुं चुन्दुर गेह गोधयो-
स्तथाऽशितालेः सरटस्य वावसा ॥ १६ ॥

मर्कटच गौरोरग शीर्षयोश्चत-
त्पिप्पल्य भल्लातरसेन चैकतः ।
सिद्धेन कल्यो न च लिप्तविग्रहैः
शरैर्नरो विद्धतनुस्त्यजेदसून् ॥ १७ ॥

युक्ता विशाखा बहुला यदाऽथवा
भौमे च तस्मिन् घटना शुभास्यतु ।
चर्माऽथ शर्माय च षोड़शाङ्गुला-
यतं द्विहस्तोन्नतमुत्तमं मतम् ॥ १८ ॥

मासे नभस्ये शशिनि त्रुटिं गते
तमाहरेत्प्रांशुमुदग्रकीचकम् ।
ग्रन्थिर्न दूरो निकशेन यामलो
न यस्य मूलं फणिनः फणाकृति ॥ १९ ॥

वंशात्तथांशत्रयतामुपेयुषो
दशाङ्गुलस्थूलतमाच्च मूलतः ।
हित्वैकभागं वसुतालमाचरेत्
परेण भागद्वितयेन कार्मुकम् ॥ २० ॥

---

१ । युग्मकम्

सार्द्धेषु हस्तैर्ननु दैवतं धनु-
र्नृणां प्रमाणे न च कौशिकं मतम् ।
कोदण्ड इत्यङ्गुलि मानतां गतैः
करैश्चतुर्भिः प्रवदन्ति पण्डिताः ॥ २१ ॥

उत्तारये सात्रममुष्य वक्षस-
स्त्वचं न पृष्ठा त्वचिसार एव यत् ।
यत्नेन कुर्याच्चिपिटं तथा टनी-
द्वयं तदा ग्रन्थ्यरुणारुणाङ्गुलम् ॥ २२ ॥

मध्ये तयोः श्रीसदनं त्रिपर्व चेत्
वसुप्रदं मार्गण पर्वसर्वतः ।
स्यात् सप्तपर्वाऽखिल धर्मशर्मदं
षड्ष्टपर्वाऽघविधायकं नृणाम् ॥ २३ ॥

चेद् वेदपर्व द्रविणापनुत्तये
द्विपर्व मृत्युप्रदमेव केवलम् ।
त्रिस्त्यङ्गुलं कोटियुगं तदग्रयोः
शुभं समं चम्पककोरकाकृति ॥ २४ ॥

स्यातां च शङ्खौ तदधः सकर्णिणकौ
समौ चतुर्भिश्च चतुर्भिरङ्गुलैः ।
स्कन्धौ तथा ग्रन्थि निजाख्ययाऽकिंतौ-
तयोरधः पञ्चकपञ्चकाङ्गुलैः ॥ २५ ॥

स्याल्लस्तकोऽर्काङ्गुलकोऽस्य जित्विके
त्रयं त्रयं सोपि च मध्यपर्वणः ।
मध्ये शुभोऽधो वलितो यतोऽर्थहा-
भवेत्सदोर्ध्वं वलितस्तु मृत्युदः ॥ २६ ॥

मध्येऽस्य चिह्नं प्रविधाय धन्वनः
शुभं त्रिभागीकृत लस्तकं ततः ।
दत्वा द्विभागं तदधस्तदूर्ध्वतो
विधाय चैकं परिवेष्टयेद्गुणैः ॥ २७ ॥

एवं च मुष्टेरुपरीषु वर्त्तनी
भवेदथोलस्तक संगतस्य च ।
स्थौल्यं शरासस्य च चेन्नरस्तथा
यथाऽष्टभिः संपरीमीयतेऽङ्गुलैः ॥ २८ ॥

स्नायुं गुणं ब्राह्म्यमुषन्ति हारिणीं
लुलापजां रौद्रमथार्जुनी भवाम् ।
स्याद् वैष्णवं मौरटमुष्कजं शर-
भवं तथाऽर्कं त्वपि पट्टसूत्रकम् ॥ २९ ॥

स्थूला न मौर्वी न च वा कृशा भवे-
त्तथा प्रविन्दस्त (?) गुणे शरासने ।
मध्येनयोरन्तरमर्यमाङ्गुलं
विधाय मौर्वी विनिवेश इष्टदः ॥ ३० ॥

स्यान्मार्गणोऽरत्नियुगेन कीर्त्तितः
समः कनिष्ठाग्रमितो द्रुतो नवः ।
सोऽपीह किञ्चित् वदनेऽधिकः शुभो
भवेद् विनाशाय यदास्य हीनता ॥ ३१ ॥

पक्षास्तु दाक्षाज्यककङ्कबर्हिणा-
त्मशोषकक्रौञ्चशितच्छदा द्विजाः ।
पञ्चास्यपत्राणि च तानि कोषजैः
प्रवेष्टयेत्सन्धिषु पक्ष्मणां गुणैः ॥ ३२ ॥

पुंखास्य वेदाङ्गुलसम्मता मता
गजाङ्गुलं स्यात्किलपक्षवन्धनम् ।
सत्वानुरूपं सकलं नियोजयेद्-
यतः शरांस्युर्वरमध्यमाधमाः ॥ ३३ ॥

एषां प्रभेदा बहवो बहुश्रुतै-
र्मता यतस्तेऽवयवैर्मुखैरपि ।
सचिह्नितास्तानपि नामतोऽधुना
निरीक्ष्य वक्ष्ये वचसांपतेर्मतम् ॥ ३४ ॥

चक्रं खुरप्रः शरचक्रगारुड़ौ
शलाक-गोकर्णिकपत्रमार्गणाः ।
गोदन्त भल्लो वथ कर्णपुष्करौ
त्रिवक्र सर्पावपिभल्लवावलौ ॥ ३५ ॥

स्यादर्द्धचद्रोऽप्यथगांगधारक-
स्तथा त्रिकण्टोऽसमकर्णिगकोऽपि च ।
शूरीशूरो दुष्कर कर्णदोलकौ
त्रिशूल शृंगावपि कूटमार्गणः ॥ ३६ ॥

पादो न बाणोऽपि च गुप्तमार्गण-
स्तथा गजानर्द्धशरोऽर्द्धसायकः ।
आहो महाकालकतद्वलावमौ
यदन्यदप्यस्ति च पुस्तकेषु तत् ॥ ३७ ॥

शल्यं सुवृत्तं किल सप्तपञ्च वा
समन्वितं पर्वभिरेव सर्वतः ।
भव्याय नव्यं प्रवदन्ति सन्ततं
बुधाः सुधासारगिरेऽष्टतालकम् ॥ ३८ ॥

स्याद्धिर्द्वितालो दशतालसम्मितो
नुतोऽथ कुन्तोऽपि तथाविधो मतः ।
ताला तथाष्टौ किल शूलतोमरौ
तथा शतघ्नी ननु शक्तिरेव च ॥ ३९ ॥

वक्रं चतुस्तालमथार्यमंगुलं
वदन्ति चक्रं त्रिगुणस्ततो मतः ।
पाशस्तु तद्वत्किल पट्टिशो मत[1]-
स्तथा[2]विधा मगलदा गदा सदा ॥ ४० ॥

चेत् खेटकं पक्षयुगांगुलं भवे-
त्तदा द्वितालेति वदन्ति तद् विदः ।
स्याद्धेमदण्डोऽपि तथाविधो मतः
परेऽस्य च व्यासभिया न चोदिताः ॥ ४१ ॥

---

१ । पट्टशोमतो   २ । तथा

नरपतिरथ वीरो नीरजन्मायताक्षः
क्षयितशतविपक्षः पालिताशेषपक्षः ।
कृतनभरतिवेलं स्तोत्रमुच्चार्य्यवर्य्या
बहिरभवदुदारान्मन्दिरान्मन्दमन्दम् ॥ ४२ ॥

तदनु मदनदूनो भूसुराणां विचित्रं
कलुषकुलविदारि स्तोत्रजातं पवित्रम् ।
अपि गणकगणानां वाग्विभंगीं समंगी-
कृत विततनुतोद्यन्मंगलद्रव्यजाताम् ॥ ४३ ॥

प्रमदमदनभाजां हारिजालान्तचारि
क्षितिपमुखविहारि गौरवारोक्षणानाम् ।
सरभसपरिरम्भारम्भविश्रम्भभाजां
अपि सुखदमुलुलुध्यानमन्तः पुराणाम् ॥ ४४ ॥

जय जय जयदेव श्रीनिर्धेविप्रभाव-
क्षितिवरमणिमेति व्याहृतिं चाग्रगानाम् ।
प्रतिपदमिति शृण्वन् कुन्दमन्दार हासे
व्यवहरणनिकेताभ्यासमास क्षितीशः ॥ ४५ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये शस्त्रलक्षणं
नाम नवमः सर्गः ।

दशमः सर्गः

अथ पाथोरुहनेत्र प्रमुदित मित्र क्षमापतिः सुतनुः ।
सहसा महसां निलयो व्यवहरणतलं तदलंचक्रे[1] ॥ १ ॥

यत्र तु मित्रसमाभाः सन्ति जनास्ते[2] षड्उन्नता महिताः ।
सक्ता भूभृति रक्ताः सप्तभिरेव त्रिविस्तीर्ण्णाः ॥ २ ॥

अनपाः पञ्चसु दीर्घाः षञ्चसु सूक्ष्माधरातले साराः ।
ह्रस्वाश्चतुर्भिविश्वाधारा वीरास्त्री गम्भीराः ॥ ३ ॥

कक्षाक्षि कुक्षिवक्षो घ्राणललाटैः समुन्नताः षड्भिः ।
तत्पाणि तालुजिह्वाऽधरनखर विलोचनैरक्ताः ॥ ४ ॥

त्रिभिरेतैर्विस्तीर्ण्णा मस्तकवक्षस्थलालिकैः सुरुचिरैः ।
त्वगंगुलिपर्वकुन्तलदशननखैः पञ्चभिः सूक्ष्माः ॥ ५ ॥

वाहुदृगन्तरनासाहनुस्तनमध्यैः पञ्चभिर्दीर्घाः ।
गलजघर्नालिंगपृष्ठैर्ह्रस्वाएतैश्च चतुर्भिश्च ॥ ६ ॥

गम्भीरास्त्रिभिरेभिः स्वरनाभीकुहरसत्वैः सुरुचिरैः ।
पूज्या भवन्ति वर्या यस्माद् विश्वाश्रयायेते ॥ ७ ॥

एते परेऽपि यस्मिन् सन्ति जना अलक्ष्यगणपरिहीणाः ।
तत्तल्लक्षणयुक्ता भक्ता भूमीभुजि रक्ताश्च ॥ ८ ॥

विशिरौ स्निग्धौ रक्तौ पादौ कूर्माकृती श्रिये ।
स्वेदसिरालौ वक्रौ फणिसूर्यसमाकृती विपदे ॥ ९ ॥

यस्य कनिष्ठा दीर्घा सुवर्ण्णशतभागिनं वितनुते सा ।
अंगुष्ठादधिका चेत्प्रदेशिनी लभते स्त्रीभोगम् ॥ १० ॥

वक्रैः शुष्कैर्दीर्घैरंगुष्ठैरति विपदार्त्ताः ।
पृथुलैर्भोगविहीना विकृतैरध्व श्रमाक्रान्ताः ॥ ११ ॥

---

१ । युग्मकम् २ । जना ··· पाठः कीटदष्टः

गजगति केकिवृषाणां गतिरति भोगविवर्द्धनाय भवति ।
चक्रांग सरभस सा चेन्नृपतिज्ञः सर्वलोकेशः ॥ १२ ॥

गमनं जलोर्म्युलूकव्यालसमं दुःखशोकभयदायि ।
श्वखरोष्ट्र-महिषशूकरसदृशं[1] यत्तत्तु दुःखाय ॥ १३ ॥

यस्य च शब्दविहीनं प्रस्थानं सोपि चेशिता भूमेः ।
वायसहंसशुकानां तुल्या यस्योद्गतिर्भूपः[2] ॥ १४ ॥

लाक्षानिभैः करतलैर्धरापतिः कपिशदृशकरा धनिनः ।
संवृतनिम्नैरपि तथा प्रोत्तानकराश्च ता दाराः ॥ १५ ॥

पितृधनहीना हस्तै निम्नैर्व्याघ्रोपमैर्दुराचाराः ।
पीतैरशम्यशक्रा निःस्वा विषमैश्च रुक्षैश्च ॥ १६ ॥

दीर्घांगुलि पर्वाणश्चिरायुषो वलितांगुलयः सुभगाः ।
सूक्ष्मांगुलयः सुधियो धनभाजोऽपि च भानांगुलयः ॥ १७ ॥

स्थूलांगुलयो निःस्वा शस्त्रहताः स्युः समुन्नतांगुलयः ।
विरलांगुलयोर्दीनाः क्लेशाधीना विकृतांगुलयः ॥ १८ ॥

इ ··· [3] पनिभैर्नगरैः गंगावर्त्तप्रतीकाशैर्भूपः ।
वृत्तोन्नतैश्च ताम्रैरैश्वर्य्यं पुष्पितैरपि सत् ॥ १९ ॥

अपि नखरैस्तु सदृशै क्लीवत्वं स्यात् विवर्णितैः कुनखैः ।
परतः ज्ञानाश्चर्पटैः स्फुटितैः श्वेतैश्च दौर्विध्यम् ॥ २० ॥

कर्मविना घनहस्तः पान्थोऽपि च कोमलचरणः ।
द्वयमपि यस्य तु स स्यादखिलपतिः पटुर्मतिर्नृपतिः ॥ २१ ॥

करतलोपगता रेखास्तिस्रो मणिबन्धसमुत्थिताकारा ।
झषयुगचिह्नितहस्तो नित्यं सत्रप्रदो भवति ॥ २२ ॥

कुलिशाकारा धनिनो विद्याभाज शुम्भस्य पुच्छनिभाः ।
गजवाजिसरोजसिविकाशङ्खातपत्रनिभा नृपतेः ॥ २३ ॥

---

१ । सूकरसदृशम/गमनं   २ । यस्याद्गतिर्भूषः   ३ । , इ ··· पाठः कीटदष्टः

कलसमृणालपताकाश्रृणिसन्निभा निधिपतेः करतलयोः ।
दामसमाशानकुलवतां स्वस्तिकरूपास्तथेशानाम् ॥ २४ ॥

असि-परशु-तोमरशक्ति-शरासन-कुन्तमन-प्रभारेखाः ।
सेनापतेः करगता धर्मजुषां च त्रिकोणाभा ।। २५ ॥

ध्वजकरगोष्ठागाररुचिराधनलासुलूखला कृतयः ।
यज्वनां ब्रम्हतीर्थे वेदिनिभाऽग्निहोत्रिणा कथिता ॥ २६ ॥

कनिष्ठा मूलरेखा प्रदेशिनी मूलगता शतायुषाम् ।
हीना प्रकल्पनीया अरेखा अतीव निस्वाः स्युः ॥ २७ ॥

अङ्गुष्ठयवैर्धनिनो विद्वांसश्च मूलपर्वैवित्तसुतवन्तः[1] ।
एतस्य मूलरेखाः स्थूलाः पुत्राः स्त्रियः सूक्ष्माः ॥ २८ ॥

आभिर्बहुभिः क्लेशः स्वल्पाभिर्धनहीनता निगदिता ।
सर्वा निम्ना रक्ता भूत्यै ततोऽन्यथा विपदे ॥ २९ ॥

मृदुविरलरोमवृत्ता जंघाः श्रियेतोऽन्यः स्याद्विपदे ।
जानुभिरपि निर्मांसैः पत्यु[2]र्मृत्युः प्रवासे स्यात् ॥ ३० ॥

नैःस्वं विकटैरल्पैः सौभाग्यं स्त्रीविनिर्जितो निम्नैः ।
राज्यं मांसोपचितैर्महद्भिरायुर्विवृद्धिः स्यात् ॥ ३१ ॥

लिंगे स्थले नैःस्वं धनवानल्पे शिराचितेऽल्पसुतः ।
दक्षिणवक्रे पुत्रा वामे पुत्रे घानते दुःखम् ॥ ३२ ॥

कोषनिगूढे भूयो दीर्घे भुग्ने च वित्तपरिहीणः ।
स्थूलग्रन्थिर्निधनवान् मृदुनि च मेहाद्दिवा मृत्युः ॥ ३३ ॥

रक्तैराद्यमणिभिर्निर्द्रव्याः पाण्डरैश्च मलिनैश्च ।
स्निग्धोन्नतैर्धनवनिताभाजो निम्नैसुता पितरः ॥ ३४ ॥

मूत्रे सदैकधारे शब्दविहीने नृपः खनिते स्यात् ।
स्तिग्धे द्विधारे बलवानस्निग्धेऽधमो बहुधारे ॥ ३५ ॥

---

१ । मूलपर्दैवित्तवन्तः   २ । त्पत्युं

निःस्वोऽतिस्थलस्फीतकमांसकं स्वित्कधनसंयुतो भवति ।
व्याघ्रात्तोप्यर्द्धस्फितक मण्डुकस्फितक भुवनाधिपतिः ॥ ३६ ॥

परिमण्डलविस्तीर्णोन्नता यदि शर्मप्रदा तदा नाभी ।
स्वल्पा त्वदृश्यनिम्ना सा चेत्क्लेशावहा भवति ॥ ३७ ॥

बलिमध्यगता विषमा स्थला वाधां करोति नैःस्वात् ।
शाठ्यं वामावर्त्ता करोति खेधां प्रदक्षिणा चेत् ॥ ३८ ॥

पार्श्वायता चिरायुषमुपरीष्ठादीश्वरं गवास्वं मध्यः ।
शतपत्रकर्णिणकाभा नित्यं मनुजेश्वरं कुरुते ॥ ३९ ॥

शस्त्रान्तं स्त्रीभोगिनमाचार्य्यं बहुसुतं यथासंख्यम् ।
एकद्वित्रिचतुर्भिवलिभिद्वान् नृपं त्वावलिम् ॥ ४० ॥

विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः ।
ऋतुवलयः सुखभाजः परदारद्वेषिणश्चापि ॥ ४१ ॥

समजठराभोगभुजो विषमोदारा भवति मायापराः ।
सर्पोदरादचित्रा भवन्ति बह्वाशिनश्चापि ॥ ४२ ॥

मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्त्तलोमभिर्भूपाः ।
विपरीतैर्निद्रव्याः सुखपरिहीणा परप्रेष्याः ॥ ४३ ॥

समवक्षसोऽर्थवन्तः पीनैः शूरा अकिंचना स्तनुभिः ।
बिसमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च ॥ ४४ ॥

विषमा विषमैर्जतुभिरथ विहीना अस्थिसन्धिनिचितैः ।
अभ्युन्नतैर्भोगभुजः पीनैर्द्धनिनोऽधना निम्नैः ॥ ४५ ॥

चिपिटाः सशिरा ग्रीवा विपदे शस्त्राहतो वृषग्रीवः ।
कम्बुग्रीवोऽराजा लम्बग्रीवोऽतिभोक्ता स्यात् ॥ ४६ ॥

निर्मांसौ रोमचितौ भंगावल्पौ च दुःखिनः स्कन्धौ ।
विपुलावछिन्नौ सुश्लिष्टोऽसौ जोवि भवताम् ॥ ४७ ॥

करिनरसदृशौ वृत्तावाजान्वलम्बिनौ समौ पीनौ ।
बाहू पृथिवीशानामध्वगलानां लोमशौ ह्रस्वौ ॥ ४८ ॥

अतिकृशदीर्घैश्चिवुकैर्निद्रव्या मांसलैर्धनोपेताः ।
विम्वोपमैरवक्रैरधरैर्भूपा स्तनुभिरस्वाः ॥ ४९ ॥

ओष्ठैः स्फुटितविखण्डितविवर्णरुक्षैर्धनैः परिहीणाः ।
स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः ॥ ५० ॥

क्ष्माभृत्कलायुगदशनो भोगी चैकेन चेद्भवति हीनः ।
त्रिंशद्दशनो मर्त्यो नित्यं दुःखाकुलप्रेष्यः ॥ ५१ ॥

धन्यो हंसवत्कण्ठो क्रौञ्चस्वनोऽतिधनो नृपो भोगी ।
गजचक्रदुन्दुभिकुम्भसम्भृतकण्ठाधनासाराः ॥ ५२ ॥

पद्मपलाससमाना जिह्वा दीर्घा सुशोभना सूक्ष्मा ।
दीर्घायुर्यदि तन्वि कृष्णा नित्यं परप्रेष्या ॥ ५३ ॥

स्थूला विस्तृतिशीला विशदे श्वेताऽन्यसेवया निता ।
स्निग्धा ह्रस्वा रक्ता यदि निखिलशास्त्रप्रवक्ता स्यात् ॥ ५४ ॥

आस्यं हास्यपरितं वृत्तममलं श्लक्ष्णं च भूपानाम् ।
विपरीतं क्लेशभुजां महासुखं दुर्भगानां स्यात् ॥ ५५ ॥

स्त्रीमुखमनपत्यानां शाठ्यवतां मण्डलं परिकेयम् ।
दीर्घं निद्रव्याणां भीरुमुखाः पापकर्माणः ॥ ५६ ॥

चतुरस्रं धूर्तानां निम्नं वदनं च तनयरहितानाम् ।
कृपणानामत ह्रस्वं सम्पूर्णं भोगिनां कान्तम् ॥ ५७ ॥

अस्फुटिताग्रं स्निग्धश्मश्रुशुभं मृदु च संहतं राका ।
चौराणां रक्तपुरषमल्पं मया विना ज्ञेयम् ॥ ५८ ॥

अमांसैः कर्णे पापमृत्यवश्चर्पटैश्च सुबहुभोगाः ।
क्रूराः शिरावनद्धैर्व्यालम्वैर्मांसलैः सुखिनः ॥ ५९ ॥

लोमशकर्ण्णा दीर्घायुषो महाभोगिनो विपुलकर्ण्णाः ।
कृपणाश्च ह्रस्वकर्णाः शङ्कुश्रवणाश्चमूपतयः ॥ ६० ॥

भोगीत्व निम्नगण्डो मन्त्री सम्पूर्ण्णमांसनिचितगण्डः ।
सुखभुक् शुकसमनासश्चिरजीवी शुष्कनासः स्यात् ॥ ६१ ॥

हस्त्यश्वसिंहवृषभनासा वाणिज्यदा कथिता ।
भोगी स्यात्तनुनासो ह्रस्वनासो धर्मशीलश्च ॥ ६२ ॥

छिन्ना निरुपया स्यादगस्यगामी दीर्घया तु सुभगः ।
आकुञ्चितया चौर स्त्री मृत्युर्घोणया चिपिटया ॥ ६३ ॥

धनिनोऽग्रवक्रनासा दक्षिणवक्रः प्रभक्षणाः क्रूराः ।
ऋज्वी स्वल्पछिद्रसुपुटा नासा सुभाख्यानाम् ॥ ६४॥

पद्मदलाक्षा धनिनो रक्तान्तर्विलोचनाः श्रियोभाजः ।
मधुलोचना महान्धा विड़ालहंसलोचनाः पापाः ॥ ६५ ॥

व्याघ्रेक्षणा मण्डलविलोचना जिम्हलोचनाश्चौराः ।
क्रूराः केकरनेत्रा गजसदृशदृशश्चमूपतयः ॥ ६६ ॥

ईशा क्रोटरनेत्रा नीलोत्पललोचनाश्च विद्वांसः ।
अति कृष्णतारकाणामक्ष्णामुत्पाटनं भवति ॥ ६७ ॥

मन्त्रिणः स्थूलनयना विपुलस्निग्धदृष्टयो भोगभुजः ।
दीनदृष्टयो निःस्वाः कर्कशाक्षाः कलिप्रियाः स्युः ॥ ६८ ॥

अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरतिसुखिनः ।
विषमभ्रुवो दरिद्रा वालेन्दुनतिभ्रुव सधनाः ॥ ६९ ॥

दीर्घा संसक्ताभिर्धनिनः खण्डाभिरर्थपरिहीणाः ।
मध्यविनतभ्रुवो ये ते शक्ता स्त्रीष्वगमासु ॥ ७० ॥

विषमेन ललाटेन निःस्वो राजा चन्द्रदृशेन ।
विपुलेनाचार्यकता धर्मरहिताः स्यात् शिरालेन ॥ ७१ ॥

उन्नतशिराभिराढ्याः स्वस्तिकाकारपरिसंस्थिताभिश्च ।
त्रिशूलखड्गाकृतिभी राजा भोगी यशोविषदः ॥ ७२ ॥

निम्नेन वधबन्धनभाक् क्रूरकर्मरतो भवति ललाटेन ।
अत्युन्नतेन च भूपः कृपणः स्वल्पेन मर्त्त्य स्यात् ॥ ७३ ॥

हसितं शुभदमकम्पं सम्मिलितलोचनं च पापस्य ।
दुष्टस्य हसितमसकृत् सोन्माद स्यात्स नृपान्ते ॥ ७४ ॥

तिस्रो ललाटलेखाः शतजीविनामायताः समस्थितयः ।
चतसृभिरवनीशत्वं नवतिश्चायुः सपञ्चाद्वा ॥ ७५ ॥

विछिन्नाभिरगम्यगामिनो न व्यतिरायुष्यरेखेण ।
केशान्तोपगताभी रेखाभिरशीतिवर्षायुः ॥ ७६ ॥

पञ्चभिरायुः सप्ततिरेकाग्रावस्थिताभिरपि षष्टिः ।
ब्रह्मरेखेण शतार्द्धं चत्वारिंशद्भ्रूवक्राभिः ॥ ७७ ॥

त्रिंशद्भ्रूलग्नाभिर्विंशतिरपि वामदेशे वक्राभिः ।
क्षुद्राभिरल्पायुषोल्पनाभिरतोऽन्तरे कल्प्यम् ॥ ७८ ॥

परिमण्डलैर्गवाढ्याः छत्राकारैः शिरोभिरवनीशाः ।
चिपिटैः पित्तृघाः करोटिशिरसां चिरान्मृत्युः ॥ ७९ ॥

घटमूर्द्धा मार्गरुचिर्द्विमस्तः पापकृच्छनैः परित्यक्तः ।
निम्नशिरोति महतापति निम्नमनर्थदं भवति ॥ ८० ॥

एकैक भवैः स्निग्धैः कृष्णैराकुञ्चितैरभिन्नाग्रैः ।
मृदुभिर्नचातीबहुभिः कैशै सुखभाक् नरेन्द्रो वा ॥ ८१ ॥

बाहुमूलविसमकपिलप्रस्फुटिताश्रीः पुरुषह्रस्वाश्च ।
अतिकुटिलाश्चातिघना ननु चिकुरा वित्तपरिहीणाः ॥ ८२ ॥

एकैकं यदि कूपे रोम क्ष्माभृद्विचक्षणो द्वे द्वे ।
त्रिभिस्त्रिभिरपि दरिद्रो मिश्रैर्मिश्रं फलं भवति ॥ ८३ ॥

अशनदशनस्निग्धं चक्षुः स्निग्धं त्यजति न सौभाग्यम् ।
अंघ्रि स्निग्धं यानं त्वग्स्निग्धं चापि पर्यङ्कः ॥ ८४ ॥

भोगो मूर्द्धविशालं उरसि विशालं यज्यता त्यजति ।
नैव विशालं कट्या सुहृत्सुतकलत्रता चापि ॥ ८५ ॥

नित्यं मांसोपचितं शर्म च रक्तेक्षणं सदा लक्ष्मीः ।
ऐश्वर्य्यं दीर्घभुजं नार्थः कनकपिङ्गलं त्यजति ॥ ८६ ॥

तदनु मनोजनिर्मूर्त्तिस्तानपि सर्वान् कटाक्षविक्षेपैः ।
त्यक्त्वा हासोल्लासैरवरोधान्तर्विबेशशु ॥ ८७ ॥

यत्र तु सन्ति नितान्तकान्तास्तान्ता मनोजतुर्विशिखैः ।
तत्तल्लक्षण लक्ष्याः सिञ्चितकक्षाः सरोजाक्ष्यः ॥ ८८ ॥

स्निग्धो नतताम्रनखौ मृदुलतलौ सुप्रतिष्ठितौ धरणौ ।
मत्स्यध्वजातिमुद्रामुद्रितश्लिष्टाङ्गुली यासाम् ॥ ८९ ॥

अस्वेदिनौ चरणौ विशिरे जंघेऽलोमशे वृत्ते ।
जानुयुगं सममस्फुटसन्ध्यनुवृत्तौ घनावूरु ॥ ९० ॥

विपुलं गुह्यं श्रोणी श्रोणी युगमपि कूर्मोन्नतं मणिगूंढः ।
मांसलविशालनितम्बौ नाभी च प्रदक्षिणा निम्ना ॥ ९१ ॥

मध्यमरोमाऽविषमौ कठिनौ वृत्तौ तथा कुचौ रुचिरौ ।
ग्रीवा च कम्बुसममांसलरक्तरदच्छदनम् ॥ ९२ ॥

कान्तादन्ताः समघनां वचनमपि सस्मितं कोमलं स्वल्पम् ।
नासा समासम गुणभेदविहीना दृशौ रुचिरौ ॥ ९३ ॥

नो सङ्गतं भ्रूयुगलं नातिविशालं नो नितरां पृथुलम् ।
न नतं न तुङ्गमलिकं लोमविहीनं सदा विमलम् ॥ ९४ ॥

कर्णौ मांसलमृदुलौ तुल्यौ मृदुनीलघनैकजाः कुटिलाः ।
स्निग्धाः केशाः शस्ता मस्तकमपि समन्ततस्तुल्यम् ॥ ९५ ॥

निम्नौ नैव न तुङ्गौ मृदुलविशालाङ्गुलि सदा देव्याः ।
निश्चरदतरमणिवन्धौ तरुणि सरोजारुणपाणी ॥ ९६ ॥

गजवाजिध्वजवारिजकुण्डलमालाङ्कुशायुधप्रमुखैः ।
चिह्नैरेभि हृदये पाणौ पादेऽथवा राज्ञः ॥ ९७ ॥

अल्पस्वेदाऽल्पनिद्राभोजनवचनाऽङ्गना नित्यम् ।
पीनस्तनगण्डपृष्ठा शश्वद्भोगानवाप्नोति ॥ ९८ ॥

पृष्ठे वाप्य मध्ये यस्या रोमप्रदक्षिणावर्त्तिः ।
पुत्रपवित्रकीर्त्ति सूते पृथ्वीपतिं देवी ॥ ९९ ॥

यस्या मृदुपदतले नन्दावर्त्तप्रभा परिस्फुरति ।
सा नृपपत्नी पुत्रैर्मित्रैर्भृत्यैः सदा जयति ॥ १०० ॥

यस्या ललाटदेशे त्रिशिखाकारा शिरा परिस्फुरति ।
सा स्वामिनी विलसति मध्ये तरुणीसहस्राणाम् ॥ १०१ ॥

ईदृशलक्षणहीना यत्र न सन्ति स्त्रियो यतः पापाः ।
प्रस्तावादथ तासां लिङ्गं संक्षेपेण वक्ष्ये ॥ १०२ ॥

यस्या चरणौ धरणौ न सङ्गिनौ दीर्घनखौ च सा विधवा ।
विरलाङ्गुलिर्दयितजनार्जितकनकं नाशयति भवने ॥ १०३ ॥

अङ्गुष्ठा च कनिष्ठा गमने यस्याः क्षितिं न वा स्पृशति ।
सा कान्तं हति पुरतो देवरमणी दुःखिता तदनु ॥ १०४ ॥

यस्या उच्चा नासा सा योषाऽतिकलहप्रिया कलिता ।
यदि न स्पृशति कनिष्ठा भूमितलं पतिव्रता न च सा ॥ १०५ ॥

स्यादुच्चा ननु मध्या यस्याः सा स्यात्परप्रिया प्रमदा ।
सा चेन्न स्पृशति क्ष्मां पतियुगलं द्राग्भवेत्तस्याः ॥ १०६ ॥

यस्याः प्रदेशिनी स्याद्दीर्घा कान्तं निहन्ति तरसा सा ।
तदनु च देवरमवलाश्वश्रुं पुत्रं च तातं च ॥ १०७ ॥

जंघा युगमतिमांसं लोमशशुष्कं शिराकुलं विपदे ।
स्वल्पनिम्नं गुह्यवामावर्त्तं च दुःखाय ॥ १०८ ॥

तिष्ठन्ति ननु कान्ताभङ्गुरजानुद्वया यदा भवति ।
गच्छति शीघ्रं शीघ्रं तां वर्जयेत् पुरुषः ॥ १०९ ॥

स्थूलावलग्नपादां बहुतरकथनभोजनासनशयनाम् ।
मण्डुककुम्भपिचिण्डां चण्डां वर्जयेत्तरसा ॥ ११० ॥

रक्तविलोचनयुग्मा लम्बपिचिण्डा पीवरजंघा या ।
अष्टौ तस्याः पतयो भवन्ति सत्यं न सन्देहः ॥ १११ ॥

मलिनोल्वणावुरसौ लोमशविषमौ सदैव दुःखाय ।
पतितौ कुचौ च यस्याः पुनरपि च समुत्थितौ विधवा ॥ ११२ ॥

ग्रीवा ह्रस्वा नैस्वा दीर्घा यदि सा कुलविपदं तनुते ।
स च यदि प्रथिता प्रचण्डता स्यात्तदा युवतेः ॥ ११३ ॥

श्यामं पिङ्गयस्याः केकरमप्यक्षि सा च दुःखशीला ।
पारावताक्षी विधवा त्वचि कर्कशा व्याघ्रवदना च ॥ ११४ ॥

कुलनाशं पृथुनासा कुरुते वक्रा यदि सा भवेत् विधवा ।
गण्डौ कूपाकारौ यदि हास्ये वर्द्धिता विधवा ॥ ११५ ॥

लम्बिन्युदरे श्वशुरं देवरं मलिनैश्च तौ पतिं हन्यात् ।
कर्णौ रोमरामेतौ विषमौ वा सा भवेद्विधवा ॥ ११६ ॥

स्थूला विरला विषमा दशना विपदे नीलस्थूलपलला ।
अभ्युन्नतोष्ठपृष्ठा परुषकचाग्रा तनोति कलहम् ॥ ११७ ॥

काकवककङ्कपेचकवृश्चिकसमचिह्नचिह्नितौ विषमौ ।
शुष्कौ शिरापरिचितौ हस्तौ सुतविभवनाशाय ॥ ११८ ॥

यस्याः स्थूला वला रक्ता वा रोमसम्भृतश्चोष्ठः ।
पार्श्वौ रोमसमेतौ वक्षोजौ वा भवेद् विधवा ॥ ११९ ॥

अतिगौरमति कालीमतिरुष्णकलेवरामतिस्थूलाम् ।
अतिह्रस्वामति दीर्घां कपिलां चातिनीलवालां च ॥ १२० ॥

हीनाङ्गीं विषमाङ्गीं मध्यमाङ्गीं कृष्णतालुकां वालाम् ।
कृषसदनवसनदन्तां कृष्णरसज्ञां त्यजेत्कान्ताम् ॥ १२१ ॥

काकसदृश करचरणा श्वशुरं काकस्वना हरति दयितम् ।
देवरमपि काकवर्णा न कूपकण्ठी हितं तनु ते ॥ १२२ ॥

तदनु मदनकायो नित्यनिर्द्धूतमायो
नरपतिरतिहासोल्लासकेलिविलासैः ।
शशधर करवार त्रस्त घोरान्धकार
ननु रजनि मनैषीत्तत्र तां चित्रकर्मा ॥ १२३ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवमहाकाव्येऽन्तःपुर
प्रवेशो नाम दशमः सर्गः ।

एकादशः सर्गः

अथ[1] प्रगे विरचितनैत्यकक्रियः
श्रियःपतेः पदकमले कृतस्तुतिः ।
महीपतिर्नवमहसम्पतन्मतिः
कृतो जवाद्व्यवहरणं समेत्य तत् ॥ १ ॥

निजानुजं वृजिनसमुज्झितं नुतं
स्वमतुलं गुणगणभूषणं च तम् ।
तथा परान् प्रकृतिवरान् दरातुरां-
स्त्वरान्वितः सपदि समानिनाय सः ॥ २ ॥

ततस्तु तानधिकृतसंप्रवेशितान्
कृता नतीन् समभिमतां वरः पुरः ।
इति स्मितस्नपित नुताननो मनाक्
जनार्दने निहितमना अभाषत ॥ ३ ॥

नवोत्सवो ननु निकटोऽधुनाजनि
प्रतिक्षणं तदथ रथे मनोऽमनाक् ।
विधीयतां यदसुवसुप्रतीक्षका-
नतद्यशोभरमवरा भजन्ति ते ॥ ४ ॥

जनो मनागपि वसुविक्रमासुभि-
र्गुणै विलैरपि सकलैर्दमैश्च[2] यः ।
यशोभर किमपि न रक्षति क्षितौ
जनुः परं ननु जननो विपत्तये ॥ ५ ॥

इति समाधिपतिसुभाषतं ततं
जगद्धितं वुधजनसम्मतं नुतम् ।
निशम्य ते नयकुशला नवोत्सवो
विधीयते द्रुतमिति भो प्रभोऽब्रुवन् ॥ ६ ॥

१। युग्मकम्   २। सकलैर्महिमैश्च

ततस्तुते नरपतिना समाहृता
समुष्टिताः प्रवरसुदारुसंभृताः[१] ।
सुचेतनान् सरभसलब्धवेतना-
न्निजान्मनान्प्रमदघनान्नयोजयन्[२] ॥ ७ ॥

अनन्तरं सकलधरानकातरान्
गुणोत्करान् स्थपतिवरांस्त्वरान्विताः ।
नवैर्जवै स्वपरिजनैः समन्ततः
समानयन् प्रविततजातभारवः ॥ ८ ॥

प्रवेशितान् सपदिकृतानतींस्ततः
सम्रूचिरे गिरमधुरां च तानिति ।
जनादिनातिशय महोदय श्रुति
प्रतिक्षणं प्रविततजातकौतुकान् ॥ ९ ॥

अहो महानहह महीपतेः श्रमो
नवोत्सवप्रभवविधौ सुधामये ।
ततो यथा शृणुत शताहतो रथा
भवन्ति ते सपदि[३] तथा विधीयताम् ॥ १० ॥

इतीरिता गुणगण भूगणैस्तदा
मुदा सदा चरमपदाम्बुजोत्सवे ।
मनोद्यधस्तदनुरथे शुतेनुता
समगता गुणविदिताद्दिशो भृशम् ॥ ११ ॥

धरापतिस्तदवधिवाधिताखिलः
प्रतिक्षणं वसुवसनादिवृष्टिकृत्[४] ।
नवोत्सवाकुलत मनागपि क्वचि-
द्रतिं न वा मतमवतांवराभजत् ॥ १२ ॥

१। संभृतौ
२। घनायोजयन्
३। समदि
४। वस्तुववसनादि वृष्टिकृतु

ततो गते कतिपयवासरे नराः
पुरीं परां परिवृतकार्यतत्पराः ।
समेत्य ते प्रवरसुदारुसंचयै-
र्महोदयैरतिविदिता समागताः ॥ १३ ॥

नरोत्कगस्तदनु मनोविनोदिनीं
गिरं परां स्वपरिवृते सम्रूचिरे ।
निशम्यतां नृपतिरपि प्रपीड़ितो-
ऽभवत्तरां प्रमुदितमानसो भृशम् ॥ १४ ॥

ततो मुहुः स्थपतिगणा विदुषणा
रथे मनः करकृतहेमकङ्कणाः ।
यथाविधि प्रधि विनिवेश कोविदा
मुदा गदाग्रजमवलम्ब चक्रिरे[१] ॥ १५ ॥

मुहुर्मुहुर्मुरहरवाद आदरात्
विटोत्करप्रकटविचेष्टितानि च ।
द्विजावलो परिकलित श्रुति स्मृती-
तरेतर-प्रवल-विवादवागपि ॥ १६ ॥

प्रयच्छ मे जहि जहि गच्छ सत्वरं
प्रतीच्छ चामर नितरामिति श्रुतिः ।
प्रतिक्षणं कररणितोरुकङ्कणा
रवोऽपि वा न च विरमन्ति यत्र तु ॥ १७ ॥

नृपोऽचलत्प्रवलवलाङ्गसम्भूतः
कृपोदधिर्निवस यत्र सन्ततम् ।
प्रतिक्षणं तदभिनियोगिनो जना-
न्विनोदयन् वसनविभूषणादिना ॥ १८ ॥

१। युग्मकम्

गते ततः कतिपय वासरे तथा
यथाविधि विधि विहिता विरेजिरे ।
महीभृतो[1] नयन मनोविनोदिनो
घनाजनादिनवहन क्षमा यथा[2] ॥ १९ ॥

सुखे सुखं कलय मुखं गरुत्मतो
महानहो प्रविततपक्षरुक् चयः ।
किमुच्यते विपुलकपोलमण्डलों
तथा नसो नहि सदृशोऽस्ति भूतले ॥ २० ॥

अहो महत् प्रधिपरिवेशकौशलं
वरुथजापि च सुमहा मनोरमा ।
युगन्धर सहचरि पश्य कस्य नो
मनोमुदं प्रवितनुते तनूदरि ॥ २१ ॥

अवस्कराः स्थपति सदा यशस्कराः
पटीयसा विधुमुखि शाधि धूरपि ।
प्रहर्षदः स्फुरदनुकर्ष एष नो
जगत्त्रये शशिमुखि पश्य कस्य वा ॥ २२ ॥

महीयसा द्वितिरपि चक्र चक्रजा
प्रभाऽक्षजा क्षपयति किं भण क्षणम् ।
न पिण्डिना कलयति कस्य कथ्यतां
मुहुर्मुहुर्वहुसुखभाजनं मनः ॥ २३ ॥

अणिप्रभा धरणिसुखाय मन्महे
महे महेशितुरतुला कलावति ।
अरावली द्वितिरपि दृश्यतां धरा
विलोचनातिशयमहप्रदायिनी ॥ २४ ॥

---

१ । महिभूतो

२ । सप्तभिः कुलकम्

अहो ध्वजे नटति जगत्त्रयि मनो-
विनोदिनी वसनलता ततात्मता ।
हयावलीमपि कलयातिमञ्जुला
स्फुटं नटत्खुरपुटदारिता चलाम् ॥ २५ ॥

वितेनिरे विततदीक्षणक्षण-
प्रतिक्षणोत्कलित समीक्षणव्रजाः ।
प्रजालयो वचनमितीतरेतरं
करे करं तदनु विधाय सावरम् ॥ २६ ॥

चक्रैः षोड़शभिर्युतं रथमथो रुद्रद्विहस्तोच्छ्रितं
वेदीमण्डपमण्डितं नरपतिर्द्वारैश्चतुर्भिवृतम् ।
पीनाङ्केन च रक्तचन्दनभवेन्नास्तीर्य्यपक्षौ हरे
स्तर्येण स्फुरतास्य द्व्यष्ट भुजगे नासीदितं केतुना ॥ २७ ॥

रामस्यापि रथाङ्गकैर्मनुमितैर्युक्तं हलेनोज्ज्वलं
चित्रं सप्तदलोद्भवेन तदनुभ्राजिष्णुना केतुना ।
भद्राया अपि पद्मकाष्ठरचिताम्भोजध्वजेनाचितं
चक्रैर्द्वादशभिस्ततः परिवृतं दृष्ट्वाऽति हृष्टोऽभवत् ॥ २८ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये रथघटनं
नाम एकादशः सर्गः ।

द्वादशः सर्गः

यात्रां पवित्रामथ सर्वलोकलोकालिनेत्रावलिशर्मदात्रीम् ।
श्रुत्वा त्रिलोकी तरसा रसद्राद्रागीक्षितुं तत्र समुत्सुकाऽभूत्[1] ॥ १ ॥

पुत्रैः पवित्रैश्च तथा कलत्रैर्मितैर्वयस्यैश्च निजैः परीताः ।
स्व स्व प्रयाणोचित वस्तुभूषा पत्रातिमात्रग्रहणप्रवीणाः ॥ २ ॥

चेलुर्जनाः शर्मघनास्तदानीं नव्योत्सवं भव्यविधानहेतुः ।
लक्ष्मीपतेर्वीक्षितुमक्षिलक्षं प्रतिक्षणं तत्सफलं च जन्तुः ॥ ३ ॥

कान्तास्ततोऽनन्तपदारविन्दद्वन्द्वोत्सवं नव्यमिति प्रतीतात् ।
आकर्ण्य कर्णोत्सव हेतुभूतं तूर्णं ययुः स्वामिसुतैः समेताः ॥ ४ ॥

काचित्तनुजं दयितं तथैकं वालं परित्यज्य जगाम नामा ।
आलीं तथा कापि च धूलिकेलीमारभ्य जातप्रणयप्रसाराम् ॥ ५ ॥

काचित्प्रियं कामकलाकलापदक्षं समक्षं परिहाय भव्या ।
नव्योत्सवाया कलितालि वाचो भङ्गी कुरङ्गीनयना चचाल ॥ ६ ॥

काचिद्गुरूणां वचनानि तानि तीव्राण्यनादृत्यकुलावलाऽपि ।
काचिद्विपक्षावलि दोषलक्षं साक्षादनादृत्य चचाल बाला ॥ ७ ॥

क्षोणीन्द्रजोऽपि क्षितिमण्डनं तं नव्योत्सवं चारमुखात्परीत्य ।
धन्यं जनुर्नो ननु सर्वदास्तु कात्वेति चेलुः स्वकलत्रपुत्रैः ॥ ८ ॥

चेतोरया हन्तहयाः समन्ताद् भीमोदया वीतभयास्तदानीम् ।
स्वं स्वं प्रभुं संपरिवृत्य वाढं सस्त्रुद्ढा गाढ़मगादरुढाः ॥ ९ ॥

चेलुर्गलद्दानजला विशाला आस्तीर्णदर्णोत्तमकम्वलाढ्याः ।
कण्ठोपकण्ठागतजातरूपकक्षाः सपक्षा इव पर्वतेन्द्राः ॥ १० ॥

गच्छ प्रतीच्छेति च वाचमुच्चैरुच्चारयन्त[2]स्तरसाऽथ बीराः ।
हस्तप्रविन्यस्तविसारिहारि चर्मोल्लसत्तुत्तर वारिघोराः ॥ ११ ॥

---

१ । युग्मकम् २ । रुच्चारन्त

मार्गे पुरा निर्गतमात्ममित्रैः पश्चात्स्थितं कापि सुतं प्रतीत्य ।
आगच्छ वत्सेति च युक्तकण्ठी प्रोद्बाहुयष्टिर्मुहुराजुहाव ॥ १२ ॥

शृङ्गाटके कापि कुलावला स्वं विप्रोषितं कान्तमुदीक्ष्य साक्षात् ।
अक्षिक्षरद्वारिभरा यथाभूत्तद्वेद सावाऽथ मनोजनुर्वा ॥ १३ ॥

पश्चात्स्थितं कार्य्यवशाद्धृशार्त्ता अग्रे गतं कापि पतिं प्रतीत्य ।
वाला भुजामूलगलद्दुकूला लोला जगन्नाथमुखी व्यधावत् ॥ १४ ॥

पीनस्तनोरुद्वयभूरिभारं वोढुं न शक्ताऽथ विवोढुरंशम् ।
आलम्ब[1] मन्दस्मितसुन्दरास्या मन्दोदरी कापि जगाम मन्दम् ॥ १५ ॥

भीमश्रमान्मार्गतरुं मरुस्थमासाद्य विद्यानिधिमध्वनीनम् ।
तत्रैव पुत्रं प्रसमीक्ष्य साक्षादर्थं निसन्तोत्सवमाप कोऽपि ॥ १६ ॥

आलोक्य कश्चिन्न निजं समाजं तत्रैव वभ्राम समागतोऽर्वाक् ।
कण्ठोपकण्ठागतवाचमुच्चैरुच्चारणेऽध्वश्रमतो न शक्तः[2] ॥ १७ ॥

काचिद्[3]घनोरुस्तनभारखिन्नां वालां भुजामूलगलद्दुकूलाम् ।
यत्रैव कालागुरुशालिभालां वालां कलानाथमुखीं समीक्ष्य ॥ १८ ॥

कान्ते क्व यासि क्व च वा गृहं ते कुत्राऽद्य वासो भविता तवेति ।
आसीद् विटानां प्रकटातिवाचां भङ्गी समङ्गीकृतविस्तरार्थाम् ॥ १९ ॥

कश्चित् घने वाजिगजप्रकाण्डैर्द्दृष्टावने नैव निजं समाजम् ।
अध्वश्रमध्वस्तवलोऽतिवेल-मुद्बाहुकाण्डो मुहुराजुहाव ॥ २० ॥

कान्ते श्रवन्ती पुरतो विभाति कूपोऽप्यनुपोऽपि च वर्त्ततेऽग्रे ।
कच्छोऽपि चाच्छोदनमस्ति पार्श्वे तूर्णं तदर्णोजसुखि प्रयाहि ॥ २१ ॥

त्वज्जीवन तन्विसमागताऽसौ यस्मिन् प्रतीक्षा तव कम्वुकण्ठि ।
तस्मादकस्मात्कुरु नो विलम्वं यामो निकामं सखि सन्निवेशम् ॥ २२ ॥

---

१ । आलम्ब्य   २ । युग्मकम्   ३ । काञ्चिद्

अग्रे करी सर्पत दर्पितोऽसौ तूर्ण्णं तदर्ण्णोजमुखव्रजेति ।
आभाष्य मन्दस्मितसुन्दरास्या काचित् स्तनौ तच्चरमे निरास[1] ॥ २३ ॥

वत्स प्रतीच्छ प्रिय गच्छ यच्छ तोयं दया वारिनिधे निधेहि ।
कान्तेऽति तान्तासि समेहि याहि तूर्ण्णं दयार्ण्णो निधि शाधि किं तत् ॥ २४ ॥

वाले चल प्रेमनिधेवधानकुन्दस्मिते मन्दगतेर्न कालः ।
आगच्छ धत्स्वेति दिवानिशं तु वाचो न यत्र प्रशमं समीयुः ॥ २५ ॥

ब्रम्हेन्द्रचन्द्रादिसुरासुरारेर्नव्योत्सवप्रेक्षणदत्तचित्ताः ।
पदं दधु[2]र्भूमितलाय लोला वालावलीभिस्तरसा तदानीम् ॥ २६ ॥

धाताऽथ साक्षादवलक्षपक्षलक्ष्यीकृतो यानवरं समेत्य ।
यात्रां पवित्रीकृतसर्वनेत्रां द्रष्टुं निवासाद्बहिरासदासैः ॥ २७ ॥

मन्दारकुन्दस्मितसुन्दरास्यः संक्रन्दनो नन्दन नन्दनोऽथ ।
ऐरावण रावणमुत्कटानामारुह्य याने स मनो वितेने ॥ २८ ॥

कालोऽपि लोलः खरसैरिभस्थो दण्डं प्रचण्डं तरसा करान्तः ।
कृत्वाऽथ नत्वा मुरवैरिपादवन्द्यं निवासाद्बहिराविरास ॥ २९ ॥

पञ्चाश नूनाः पवनाश्च विश्वे देवा दशद्वादश सिद्धसंहाः ।
अहो महाराजिक नामधेयास्ते द्वे शते विंशतिरित्युवीर्ण्णा ॥ ३० ॥

आभास्वराश्चापि रदद्विसंख्या षट्त्रिंशसंख्यास्तुषिता मताश्च ।
स्व स्व प्रयाणोचित वेशभूषा यानासना द्राग्बहिराविरासुः ॥ ३१ ॥

यक्षेश्वरोऽपि क्षितिपक्षतां तं लक्ष्मीपतेर्वीक्षितुमात्तचित्तः ।
नारं विमानं तरसाविरुह्य दासेरुदासै प्रससारधीरः ॥ ३२ ॥

ज्वालावली प्रज्वलिताखिलाशो द्रागज्वालमालीप्रचरालललोलः ।
मेषावली लालितयानसारमारुह्य रज्यत्तनुवल्लरीकः ॥ ३३ ॥

१। युग्मकम्   २। विधु

अन्येऽपि गीर्वाणगणाः क्षणं तमाकर्ण्य कर्णावलिशर्महेतुम् ।
स्व स्व स्फुरत्प्राणसमासमेताः समायजुश्चार्द्धनभप्रदेशम् ॥ ३४ ॥

पुत्रै पवित्रैश्च तथा कलत्रै पुत्रैर्वयस्यैश्च समानवेगैः ।
दासैरशेषैर्भृतकैरनेकै स्वस्वोचितैर्वस्त्रविभूषणैश्च ॥ ३५ ॥

भेजुस्ततोऽन्योऽन्यत एव हुताः पाताललोकप्रथिताः क्षणेन ।
लक्ष्मीनिवासं क्षणवीक्षणाय लोकैरनेकैः क्षितिपृष्ठदेशम् ॥ ३६ ॥

इति भुवनपतेः श्री श्रीपतेः श्रीवसन्तोत्सवमभिनवमारादक्षिलक्षं विधातुम् ।
अप परिघविघातग्रावसंघातं घातं तदखिलमतिशातव्रातदातुश्चचाल ॥ ३७ ॥

इति श्रीवसन्तोत्सवे महाकाव्ये यात्रिकप्रस्थानं नाम द्वादशः सर्गः ।

त्रयोदशः सर्गः

अथो ऋतूनां निबहो मुरारेर्यात्रां पवित्रीकृतसर्वनेत्राम् ।
निरीक्षितुं भूमितले विशाले पदं व्यधत्तात्तजिजाङ्घ्रिपश्च ॥ १ ॥

ततो दिदीपे प्रवलप्रतापमनोजतुस्तापभृतोरतीव ।
एतु प्रतोकाय वियोगभाजोर्यूनोरुदारः शिशिरप्रचारः ॥ २ ॥

इन्दीवरं कुन्दलतानिदेशं प्रसूनभासाहितभिन्नवेशम् ।
मरुल्लुलत्पववेल्लनेन निरास जारं किमहो करेण ॥ ३ ॥

हिमागमप्रान्तवसन्तलक्ष्मीप्रारम्भशंसी शिशिरप्रचारः ।
चराचराणामपि सख्यकस्य मनोविनोदाय वभूव नैव ॥ ४ ॥

कण्ठोपकण्ठागतमात्मवादं न कोकिलोन्मीलयितुं शशाक ।
दुरन्तमारज्वरपातजातमनोऽभिलाषं कुलजा वलेव ॥ ५ ॥

रसालमाला किल रम्यमूर्त्तिरसन् प्रसूनावलिशालिशाखा ।
एषा तु केषां न सुखाय शौरिपादारविन्दात्तमना इवासीत् ॥ ६ ॥

निरास कासद्वितधृष्टभावं भीमं हिमं नास्ति समं क्रमेण ।
विवेकिसंसर्गमवाप्यनित्यमसङ्गराणामिव चित्तवृत्तिः ॥ ७ ॥

समाजगाम स्मरसार्वभौम भौमप्रगाढ़ोदयहेतुभूतः ।
वसन्तकालोऽथ नितान्त कान्त कान्ता दुरन्ते ग्रहभेद विद्वान् ॥ ८ ॥

निकुञ्जगुञ्जोदरमञ्जुगुञ्जद्भृङ्गालिरम्यध्वनिपावमान्या ।
असौ रसाद्रोऽभिषिषे च मित्रं साम्राज्य एवाम्वुजकोषकुम्भैः ॥ ९ ॥

विलासिनीलोत्पललोलनेत्रा सौरभ्यगर्भाम्वुजचारुवक्त्रा ।
रणद्द्विरेपांवलिदुष्टराढचा सौरभ्यनिस्कम्पितचम्पकाङ्गी ॥ १० ॥

कङ्केलिलोलप्रवलप्रवालपत्पाणिका तत्कलिकाङ्गुलीका ।
सूजात किंशु प्रसवाधरौष्ठा पदाति तेने विपिने मधुश्रीः ॥ ११ ॥

प्रालेयजालप्रवलप्रतापमुक्तो विवस्वान्विरराज सद्यः ।
संसारदुर्वारतरप्रचारषड़ूर्मिपीड़ारहितो यतीव ॥ १२ ॥

रतान्तखेदोद्यतखेदवाला संभद्रसर्वाङ्गकृताभिमर्षः ।
श्रीखण्डशैलादरविन्दगन्धबन्धुर्ववौ दक्षिणगन्धवाहः ॥ १३ ॥

इतस्ततोऽभृग्जलमास सज्जुर्मधुव्रतानामपि गुञ्जितानि ।
नवां श्रियं प्राप्य यथाधमानां मनांसि कंसारिपराङ्मुखानाम् ॥ १४ ॥

न केतकीं कण्टकितां सुगन्धां भोक्तुं न मोक्तुं च शशाक भृङ्गः ।
अमानमानव्यसनप्रदीप्तां रक्तां पुरन्ध्रिमिव जीवितेशः ॥ १५ ॥

कामो निकामं तमुदीक्ष्य मित्रं पवित्रकीर्त्ति कृतकृत्य आसीत् ।
कौतस्कुतपाणि गतं दरिद्रो जनैरदृष्टं किमु रत्नकुम्भम् ॥ १६ ॥

मुहुर्मुहुः प्रादुरभूत्पिकानां कुहुकुहुर्वागिति सर्वतोऽपि ।
अवारमारज्वरभारभाजां वियोगभाजामिव चित्तवृत्तीः ॥ १७ ॥

निशम्य कुञ्जेषु वचोऽलिनीनां मानं विधातुं न च पारयन्ती ।
देहं ददौ मानवती प्रियाय विश्रम्भभाजामिव दूतिकानाम् ॥ १८ ॥

त्यजन्तु मानं दयितान् भजन्तु समेति राजा मधुनाऽधुना तु ।
इतीव चेलुर्मधुपाः समन्ताद् दूता इवाप्ताः स्मरभूमिभर्त्तुः ॥ १९ ॥

मन्दं वहद्दक्षिणवातपातप्रोद्भूत चुताङ्कुर रेणुजातम् ।
ददाह देहानह हाध्वभाजां निकामकामाग्नि कणावलीव ॥ २० ॥

लता सुरम्या सनतासुतासुस्तवैकयोग्यान् स्तवकान् दधौ सः ।
यः पान्थकान्ताऽमितशोकदाता नाम्नाप्यशोकक्रियया स शोकः ॥ २१ ॥

काष्ठा प्रदुष्टाः पिक उत्सुकोऽभूद्यूनोरतिः पुष्पवतोश्च भूतिः ।
वसन्तकालोखिलशर्मणेऽभूत्परंतु दुःखाय वियोगभाजाम् ॥ २२ ॥

अहो ऋतूनां निवहो महीयान् तथापि रागः सुरभौ स्मरस्य ।
यतः शरानेष तनोति साक्षान्नितान्तकान्ताग्रहभेददक्षान्[१] ॥ २३ ॥

१। युग्मकम्

मयि प्रदीप्तेऽपि नितान्तकान्ता कान्तादुरन्तग्रहभेददक्षे ।
अवारमारज्वरभारभाजां नितम्बिनीनामधुनापि चित्ते ॥ २४ ॥

नमानराशेः कृशतालवोऽभूदहो महानेष पराभवो मे ।
इतीव किं केतककोषकुन्तानाविविधौ हन्त वसन्त एषः ॥ २५ ॥

समागते हन्त वसन्तवाते लौल्यं गता निर्गतरागिणोऽपि ।
इति बलिं कोकनदं मुदाहो लौल्यं दधावम्भसि सम्भृतश्रीः ॥ २६ ॥

अथोष्णकालः किल देवदेवसेवाविधौ सन्ततदत्तचित्तः ।
आत्मानमानन्दरसावशं स्वप्रकाशयामास भृशं समन्तात् ॥ २७ ॥

कुतोऽसि राजात्वमहो ऋतूनां न यत्र यात्रा त्वयि गुण्डिचाख्या ।
इतीव पुष्पोज्वलमल्लीवल्लीमिषा वसन्तं हसतीव साक्षात् ॥ २८ ॥

जगत् विजित्य स्मरसार्वभौम यत्रास्ति खेदव्यथितोऽधिशेते ।
पाटीरपङ्काङ्कित वामनेत्रा वक्षोजगोत्रान्तरभूमिभागम् ॥ २९ ॥

छायापि आगच्छति दुर्निवारातपातितप्तेव तलं पदस्य ।
श्यामास्तनद्वन्द्वतटी समेति पाटीरपङ्कोऽपि च शीतशीताम् ॥ ३० ॥

दैवाकरास्तत्र करोत्करास्ते महोदयं प्रापुरहो क्रमेण ।
परापकारं रहिताः सवृत्ताः परात्परे पुंसि च दत्तचित्ताः ॥ ३१ ॥

विचार्य्य कालस्य विपर्ययं तं निकाममूकोऽथ पिको वभूव ।
क्रमेण संसारसमस्तसारं यतीव संन्यस्तकलत्रपुत्रः ॥ ३२ ॥

सुपाटला पाटलि कुट्मलाली दिशो निनायाति विकाशमाशु ।
कामाग्निकालावलिकेव पान्थ मनोवनोद्याहकरीति घोरा ॥ ३३ ॥

सूनेशवे हन्त वसन्तदत्ते शैतेन्दुते धन्य निजातकुत्सः ।
इतीव किं तद्धनुषे[1] ननु स्वं शिरीषपुष्पं विचकार घर्मः ॥ ३४ ॥

निःशङ्कमङ्केऽपि मृगा मृगारेर्द्राक् शेरते पिच्छतले च सर्पाः ।
सर्पाहितस्यापि विशीर्णवैरं नैतद्विचित्रं तपसि प्रदीप्ते[2] ॥ ३५ ॥

---

१ । तद्धनुक्षे   २ । युग्मकं

ततोऽचिरद्योतलताविलासविसारि[1] हारिन्द्रसरासभूषा ।
आबन्धुरोदार पयोधराभ्या धारागलन्माल्यवराऽसुलभ्या ॥ ३६ ॥

वज्राशनिप्रोत्कटतत्कटाक्षघोरान्धकारायतकेशभारा ।
नवोत्सवे वीक्षितुमीशमेषा प्रावृज्जजृम्भे वत सम्भूतश्रीः ॥ ३७ ॥

विशृङ्खला: सम्प्रति केकिकेका विचेरुरे कान्तमहो महीध्रे ।
अतिस्तुतिभूतिमवाप्य सद्यो यथा हि माना मतयोद्‌जगत्याम् ॥ ३८ ॥

शम्यालिकिञ्जलकाभृतां पयोदनीलाम्वुजानां गगनाद्‌विमध्ये ।
निर्घोषभृङ्गारविभूषितानां रेजुर्मृणाला इव वारिधारा: ॥ ३९ ॥

शम्पाङ्गना सम्प्रति जातकम्पा पाथोदनाथं कुरु गात्रयष्टि: ।
दृष्ट्वाऽतिदूरागतमाततान तदङ्क एवात्म विचेष्टितानि ॥ ४० ॥

नेयं घनाली द्विरदावलीयं धारानवारामियमेव शुण्ढा: ।
नोचेत्कथं मानवनीघनापि निपातनादेव लयं प्रयाति ॥ ४१ ॥

समाजगामोक्त्यभिचारसूक्तैर्द्राक् संप्रभुक्तैर्द्विजनीलकण्ठ: ।
प्रतिक्षणं यत्र मुदा मदान्धः कृतान्ततामेति वियोगभाजाम् ॥ ४२ ॥

एकत्र याहीति नृपाङ्गजाज्ञा वियोगभाजां निधनं परत्र ।
इतीव किं मालतिलालित: सन्मन्दं ववौ वारिधर: समीर: ॥ ४३ ॥

इषद्‌विकासप्रसरातिवृत्तकदम्वकक्षारकदम्वकानि ।
विरेजिरे भूमिधराजिरेषु स्मरस्य राज्ञो गुलिकावलीव ॥ ४४ ॥

प्रयोदकाल: किल मालतीनां निकुञ्जगुञ्जन्मधुपालिगीतै: ।
घनस्वनाङ्कच्चध्वनिनामयुतान्विनोदयामास धराजिरेषु ॥ ४५ ॥

त्यक्त्वाऽखिलं पार्श्वमुपागतो मे माहंकुरुष्वेति शीलीन्द्रभृङ्ग: ।
कालो वलीयान् किल पश्य यस्य दत्ते पदं मूर्द्ध्नि न सोऽपि सेव्य: ॥ ४६ ॥

---

१ । विलासहासविसारीति पाठः

घनाघने स्वानविनीतमाना भेजुः स्वयं मानधना अपीष्टम् ।
धन्या जनुस्तस्य ननु प्रतीमो विरोधिनामैक्यविधौ पटुर्यः ॥ ४७ ॥

तन्मालतीसौरभलोभतोऽसौ मधुव्रतो हन्त न गन्तुमीशः ।
सा योषिते ति प्रवदन्ति पश्य यस्याः स्वयं स्याद्दयितोऽतिवश्यः ॥ ४८ ॥

अपः प्रशान्तोऽथ रजोऽपि नष्टं हृष्टं युतां वारिधरे प्रवृत्ते ।
नैतद्विचित्रं महता महो यन्महोदये के पुनरात्ततापाः ॥ ४९ ॥

अहो महे सम्प्रति संप्रवृत्ते कदम्बपांशुर्दिश आससार ।
घनागमे मानविधिस्तु साधूनिमानि नामिति कथं ब्रवीतुम् ॥ ५० ॥

पिकोऽतिमूको मुदमाप भेकः खद्योत आसीत् द्वितिमान्न ताराः ।
शिखी सुखी निष्प्रतिभोऽंशुमाली नैतद्विचित्रं जड़भूतिकाले ॥ ५१ ॥

समीक्ष्य कालस्य विपर्ययं तं हंसाः सरो मानससाशु जग्मुः ।
विहायसं सारमुखं न सारं यथावनान्तं समहेमलोष्ठः ॥ ५२ ॥

न रुदितः कन्दल इत्यनन्या प्रसिद्धिरेषा भवतोऽर्थतस्तु ।
वियोगी शीर्षं दलतीति यस्मादर्थः स्वयं स्फुर्ज्जितयोगिकोऽयम् ॥ ५३ ॥

वियोगिविध्वंसविधेर्विधिज्ञैः पुष्पैर्नवो यः कूटजः प्रफुल्लः ।
परोरुदुःखानि समीक्ष्य साक्षाद् ये दुःखिनस्तज्जनुरेव धन्यम् ॥ ५४ ॥

क्वणन्मरालावलि पादभूषा शरत्पतिं नेत्रशतं विधातुम् ।
मुदा तदा पाण्डुपयोधरश्रीः पदं ददौ भूमितलेऽखिलेऽस्मिन् ॥ ५५ ॥

घनाघनैश्चन्द्रमसं विमुक्तं कुमुद्वतीं वीक्ष्य सजीवनाभूत् ।
प्राणेश्वरं प्राङ्गणसीम्नि दूरात्प्रत्यागतं[1] प्रेक्ष्य कुलावलेव ॥ ५६ ॥

रराज राजा महसा तदानीं घनाघनेभ्यः सहसा विमुक्तः ।
असज्जनोद्गीतवृथापवादमतीतसत्यैरिव धारचेतः ॥ ५७ ॥

---

१ । प्रत्याशतमिति पाठः

कुम्भोद्भवं सम्भूतमाकलय्य ज्वलन्तमस्यां दिशि दक्षिणस्याम् ।
सद्यः प्रियात्यन्तवियोगभीत्यानद्यः समन्तात्तनिमानमापुः ॥ ५८ ॥

मधुव्रतैर्भुक्त मधुप्रतानो यत्रासनो दृष्टि तनुर्बभूव ।
विद्वानिव प्रत्यहमर्थं सार्थभुक्तातिरक्तद्रविणप्रचारः ॥ ५९ ॥

चक्राङ्गवाग्भङ्गभरं भुजङ्गभुजोऽतिमूका अभवन्निशम्य ।
गुणाधिकं वीक्ष्य पुरः स्फुरन्तं प्रकाशये पौढिमयत्रपाङ्कः ॥ ६० ॥

शरन्न वाचा निजवाशयश्रीर्वाणेक्षणा वारिजसुन्दरास्या ।
एषा तु केषामपि कासवासा योषेव धत्तेन मनोविनोदम् ॥ ६१ ॥

उर्ज्जद्वीपे स्फुर्जितदानगन्धसप्तच्छदोद्यत्कुसुमातिगाढे ।
मनस्विनी मानधना घनापि भिन्ना यदासान्नतु तन्न चित्रम् ॥ ६२ ॥

नभस्वतस्तन्नलिनीविलाससौरभ्यगर्भस्य शरद्धृतस्य ।
समागमं दामदृशोविशेषं न सेहिरे मार्गजुषां भृशार्त्ताः ॥ ६३ ॥

प्रकाशयामास नितान्तपान्थकान्ताकृतान्तोऽथ तनुवनान्ते ।
प्रालेयकालः किलदेवदेव सेवाविधौ सम्भृतचित्तवृत्तिः ॥ ६४ ॥

शीतातिपातव्यथितप्रतीको यत्राऽतिमात्रं ननु हृत्शयोऽपि ।
यूनोर्घनाश्लेषमिषेण वक्षो निशारयुग्मं किमु सीव्यति स्म ॥ ६५ ॥

प्रालेयजालैरखिलं सुशीतं कुर्यामिति त्वन्महिमा मृषोद्यः ।
यतोवताक्षीक्षरदम्भ एव शैत्यं न नीतं पथिकाङ्गनानाम् ॥ ६६ ॥

प्रालेयवाताहतलोध्रजातपरागभारः प्रससार दिक्षु ।
कृतापराधेऽपि धवेऽधुना तु क्षमेव योग्येति निवेदितुं किम् ॥ ६७ ॥

जना अनादृत्य च गांधनाशा विदेशमेष्यन्ति यदा तदेषाम् ।
एषा दशा स्यादिति शीतकालस्तेने वने द्राग्लवलीफलानि ॥ ६८ ॥

फलिन्यलीनां मधुनाभिलाषं तनोसि नूनं सफलं सदैव ।
वियोगभाजां वत जीवितं तत्कथं विधत्से विफलं विधेहि ॥ ६९ ॥

लवङ्गिकासङ्गतिलालितोऽयं प्रालेयवातः प्रियवत् प्रियायाः ।
निचोलमाकर्षति वक्त्रविम्वं चुम्बत्यहो वेपथु मातनोति ॥ ७० ॥

ऋतुगणमथ काले दामतापातितप्ता
युगपदुपगतं[1] तं ते समुद्वीक्ष्य साक्षात् ।
प्रमदमदनमाद्यत्कामिनीभिः परीता
घनविपिनविहारे दत्तचित्ता वभूवुः ॥ ७१ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये षड्ऋतुवर्ण्णनं
नाम त्रयोदशः सर्गः ।

---

१ । युगपगतमिति पाठः

चतुर्दशः सर्गः

अथो नृपाः कामकृपा समुज्झिता नुताभिराभिः प्रमदाभिरावृताः ।
वने वने पुष्पफलैरलङ्कृते कृते विहारस्य ययुर्मुदा तदा ॥ १ ॥

नगो भवे वीक्ष्य नगे नगे नवां परां विभूतिं फलपल्लवो भवाम् ।
नु तेषु[1] तेषु स्वगृहेषु ते तदा स्पृहां नचक्रुर्गृहिणो गृहैर्युताः ॥ २ ॥

अथ स्फुरद्गुल्मलताततें वने मनोज्ञवल्ली द्रुमविद्रुमैर्घने ।
समं प्रियैः कामकला महोज्वला वितेनिरे द्राक् प्रियमात्मनोऽवलाः[2] ॥ ३ ॥

परिक्वणत्पादविभूषणं ध्वनिप्रसवत्काञ्चीरवपूरितान्तरः ।
परस्परप्रस्तुतहासमाधुरी परीतनिर्लक्ष्कटाक्षसुन्दरः ॥ ४ ॥

कलाकलापाकुलशारदस्फुरत्कलाधिनाथो ज्वलवक्त्रमण्डलः ।
परस्परोत्पीड़ितहस्तपल्लवः पदं ददौ भूमितलेऽवलाजनः ॥ ५ ॥

फलप्रसूनाऽति घने वने वने मुदा तदार्त्ता विविशुर्भृशं स्त्रियः ।
इमानि सूनानि फलान्यमुनि हे समेहि देहिति कृतायतग्रहाः[3] ॥ ६ ॥

अयि प्रमाद्य द्विरदस्फुरद्गमे समेहि तूर्णं फलपूर्णमग्रतः ।
अनोकहं सुन्दरि पश्य विस्मितं स्मितं प्रभालज्जितसूनसम्पदम् ॥ ७ ॥

तदेहि सम्भावय कुम्भसम्भूतस्तनित्वमेनं तरसा रसाम्बुधेः ।
पराभितापं सहते न यो जनः स एव धन्योऽवनी मण्डलेऽवले ॥ ८ ॥

इतीव काञ्चित्तरुणोऽरुणोत्पलज्वलत्पदां व्यग्र समागमाक्षमाम् ।
घनस्तनप्रोद्भटभारधारिणीं निनाय दोर्भ्यां परिरभ्य कश्चन ॥ ९ ॥

हितं सयोग्यं ननु सूनमीक्षणक्षणप्रदं देहधवेति निश्चिता ।
विलम्बमानं दयितं रुषो मिषान्नितम्बबिम्बेन जघान काचन ॥ १० ॥

स्वयं विधाय स्रजमालकौतुकाद्विभूषयन्ती प्रियमौलिमादरात् ।
गलद्दुकूलस्फुटकक्षरक्षितस्तनी ततानासुसमेक्षणं क्षणम्[4] ॥ ११ ॥

१। नुतेसु
२। युग्मकम्
३। त्रिभिः कुलकम्
४। त्रिभिः कुलकम्

इतस्ततः किं कुसुमोच्चिचीषया प्रयासि शातोदरि जातकौतुका ।
इतोऽपि रम्यो ननु सूनसंचयः पुरः स्फुरत्यम्बुरुहाक्षि दक्षिणे ॥ १२ ॥

तदेहि यामः सखि कामभूभृतो जगज्जयामोघशरे पुरोऽधुना ।
गुणाधिके यस्य मनोविनोदनं स एव धन्योऽवनिमण्डलेऽवले ॥ १३ ॥

इतीव नानाविधवादबोधनैर्मनो ददातीतिशयैकसाधनैः ।
निनाय काञ्चित्कल काञ्चिनिर्जनं वनं मनोजन्मशरातुरोऽपरः ॥ १४ ॥

प्रफुल्लकं केलिकुठाङ्गसङ्गता स्फुरत्यसौ जोवनमाधवीलता ।
तदङ्गसङ्गीतनिधे विधेहि मे तयोः प्रसूनैर्ननु माल्यमुज्वलम् ॥ १५ ॥

अये दयाम्भोनिधि शाधि दूरगं कुतोऽस्य पश्य ग्रहणं भविष्यति ।
तदद्य दोर्भ्यां परिरभ्य निर्भरं समुत्क्षिपामि क्षितिभूषणे क्षणम् ॥ १६ ॥

इतीव धूर्त्तः किलजातकौतुकं तनुसमुत्फुल्लतनुमुदासताम् ।
स्तनौ घनौ पाणियुगेन पार्श्वयोरधः प्रविष्टो न निधाय कश्चन[१] ॥ १७ ॥

इतः प्रसूनानि मनोविनोदनक्षमाणि साक्षात् प्रसरी सति च हे ।
तदेहि यामः सखि काममात्मनः प्रसाधयामो विजले वलेऽधुना ॥ १८ ॥

इती प्रकामो विजनं निनीषयाऽपरोऽपरां चारु जगाद सादरम् ।
मनोभवाब्धौ[२] विगतावधौ वुधोऽप्यसारसारं किमु वेत्ति तत्वतः ॥ १९ ॥

सरोरुहेन्दीवरकुन्दमल्लिकामुखप्रसूनप्रकरैकविग्रहाः ।
तदालयोर्द्दष्टचरीर्विलासिनीर्निरीक्ष्य फुल्ला अपि तत्यजुर्लताः[३] ॥ २० ॥

अयि प्रसीद प्रमदे पुरःसरं प्रियं प्रयाहि प्रणयैकजीवनम् ।
अकारणं मानममुं समुत्थितं जहीहि शातोदरि जातकौतुका ॥ २१ ॥

अहो ऋतूनां युगपन्महामहे विहाय का नायकमेकिकाऽकति ।
वृथा कृथा मानधनेऽधुना मनोव्यथां हि सर्वः समये विराजते ॥ २२ ॥

---

१ । युग्मकम्   २ । मनोभवाधौ   ३ । पञ्चभिः कुलकम्

मनोजनुभूमिभृतो ननु स्तनौ प्रयाणमाङ्गल्यघटो घटस्तनी ।
कलाभृतस्तत्करपल्लवं विना वृथेति गाथां कथयन्ति तद्विदः ॥ २३ ॥

तदेहि देहि प्रमदे प्रियाय ते निरन्तरालिङ्गनमङ्गनेऽधुना ।
कुरु स्तनौ तन्वी घनौ फलान्वितौ हहा विना तेन न निष्फलं जनुः ॥ २४ ॥

इति प्रवोध्याकुलकाञ्च काञ्चनप्रियां कथंचिद्दयितान्तिकं सखी ।
निनाय सा तद्विहितागसां मुहुर्मुहुः स्मृति प्रस्फुरदोष्ठपल्लवम् ॥ २५ ॥

अवालसालोज्ज्वलमौलिलालितप्रसूनजालाकुलपाणिपल्लवा ।
पराभुजा मूललसत्पयोधरा जहार चेतो वत जीवितेशतुः ॥ २६ ॥

प्रकम्पितं चम्पकमाल्यकल्पनाक्षमं समोक्षाऽसुममं रुषो मिषात् ।
त्यजेत साकूतमितस्मिता प्रियं घनस्तनेनाथ जघान काचन ॥ २७ ॥

अमूनि मूकानि घटोद्भटस्तनि प्रतीच्छ वैराख्ययेति चोदिता ।
कटुं कटाक्षं गलदश्रुदुर्दिनं परानिराशे दयिते मुहुर्मुहुः ॥ २८ ॥

भुजङ्गमद्विट् पिकशारिकाशुकद्विरेफचक्राङ्गवचो विभङ्गभृत् ।
वनं लसत्पुष्पफलोत्करैर्घनं व्यधत्त केषां न मनोविनोदनम् ॥ २९ ॥

अहो महानेष पराभव स्त्रियां विपक्षनामग्रहणं समक्षतः ।
अपि प्रसूनैर्दयिते नता चिता तदोयनाम्ना च तमूच्छिता यतः ॥ ३० ॥

विहारखेदव्यथिताङ्गनाजनप्रतोकपातोज्झित एष मारुतः ।
प्रयाति पाटीरमहाभृतस्तटी विनिर्गतः सन्नरविन्दबान्धवः ॥ ३१ ॥

स्वयं विधाय प्रणयाद् घनस्तने प्रियेण दत्ता स्रगमिलसन्निधौ ।
मलीमसाऽर्द्धग्रथिताऽसमापि सा वभार हाराशतगौरवं तनौ.[1] ॥ ३२ ॥

अहो तुलाकोटिरदायि यत्पदे तदन्यदानेन तनोः क्षतिः कुतः ।
इतीव मत्वा भ्रमरः प्रयात्यसौ तवाधरोद्यन्मधुपानलोलुपः ॥ ३३ ॥

१ । युग्मकम्

तदद्य विद्यैकनिधे न वारय प्रतिक्षणं तन्वि भवत्परायणम् ।
सदार्थसार्थस्य मुखं सुखं जनो विलोकते यः स तु भूमिभूषणम् ।। ३४ ।।

मुमोच सूनानि घनस्तने नगः कयाचिदाधूतलतोऽतिकौतुकात् ।
मनोजसाम्राज्यविधौ सुधामये घटे नवे किं वरुणार्चनाविधौ ।। ३५ ।।

पदश्रियं वीक्ष्य मृगीदृशां भृशं तदाप्तिजातोत्कलिको धने वने ।
ततो विलुम्प्याथ लवं प्रवालकस्तदादितः पल्लवतामुपागतः ।। ३६ ।।

समीक्ष्य घोरास्त्वविपक्षपक्षतः प्रियं प्रिया नैव वनोत्सवे मनः ।
व्यधत्त यस्माज्ज्वलति स्वचेतसि क्रुधाऽतिशर्माऽपि भृशं कुशायते ।। ३७ ।।

कयाचिदुत्क्षिप्य भुजं निजान्तिके नखाङ्कमूलं धृततुङ्गसूनया ।
अभावि तस्मिन् स्मितभाजि यत्पुनस्तदेव सा वेत्ति मनोभवोऽथवा[1] ।। ३८ ।।

स्ववेदनावित्परवेदनाऽकहे घनस्तनक्रान्तगतिं पतिव्रताम् ।
विहाय दूरं न हि याहि सत्वरं यतो महानेष पराभवो नवः ।। ३९ ।।

न वेत्सि किं प्रेष्ठ घटोद्भटस्तनी प्रतिक्षणं प्रोद्वहनश्रमं तनोः ।
नितम्वविम्वोरुभरं च दुस्तरं तथापि विद्वन्न मनो दुनोति ते ।। ४० ।।

प्रतीक्ष्य तत्क्षोणिविभूषणां क्षणं क्षमानिधे प्राणसमां समं नय ।
इतीव कश्चिज्जगदे विपश्चिता सुविस्मितः सस्मितया वयस्यया ।। ४१ ।।

अहो महारण्य महामहोदये वतातपग्लानिमुपागता लताः ।
गुणाधिकास्तारसहासशालिनीः समीक्ष्य साक्षादिव सूनलोचनैः ।। ४२ ।।

अपूर्व आरण्यविहारकौतुके अपूर्वमासीदतिमन्मथेऽखिलम् ।
क्षणप्रभा क्वापि भवन्ति निश्चला इतस्ततो यान्ति पतन्ति यत् क्वचित् ।।४३।।

विनाम्वुना प्रोन्नतनालजालकः स्फुरत्यहो वारिरुहोत्करः परः ।
अवाङ्मुखो धावति कुत्रचित्क्षणं स्खलत्यहो कुत्रचिदेव तिष्ठति ।। ४४ ।।

---

१ । त्रिभिः कुलकम्

चलन्ति शैला अपि सर्वतो मुहुः प्रसारिनिःश्वासभृशावशात्मनः ।
कलाकलापाकलितः कलानिधिर्हसत्यहो क्वापि च शाययत्यपि ॥ ४५ ॥

तमः समन्ताच्चलति क्वचित् क्वचित्सनालपाथोजधृतं सदञ्चति ।
अखर्वतः पर्वततोऽपि सर्वतः सुपर्वसिन्धुः शतपत्रमर्वति ॥ ४६ ॥

असिभ्रमात् क्लान्तिमुपागतायते क्षणे क्षणं मत्करगोचरी भव ।
इति प्ररुतस्मितसुन्दरानना मनाग्विलोलाञ्चललोचनोऽधृत ॥ ४७ ॥

विहारखेदव्यथितास्मि कान्तहे न पारयेऽहं चलितुं करोमि किम् ।
इतीव लज्जात् प्रियवक्षसि क्षणं पपात दोषाय न धाष्ट्यमापदि ॥ ४८ ॥

अथातिवेलं रसहासकौतुकैर्गतागतैः सादमुपागतानुताः ।
नितम्बविम्बोद्वहनेऽपि चाक्षमाः समागताः प्राणसमावलम्बनम् ॥ ४९ ॥

प्रतिक्षणं तज्जघनस्तने घने समुन्नतौ सम्भृतभूरिमत्सराः ।
खरांशुतापप्रकरातुरा वनाद् वनाद्वितेरुस्तरुणीगणा क्षणात् ॥ ५० ॥

फलकिशलयपुष्पासारिसर्वर्त्तुहारि प्रपनवनविहारोद्गिरिवारिप्लुताङ्गाः ।
खरतरपरितृप्यद्भानु भानुप्रदीप्ता जलविहरणचित्ता योषितस्ता वभूवुः॥५१॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये चतुर्द्दशः सर्गः ।

पञ्चदशः सर्गः

अथ कथमपि जग्मुस्तास्तदा जातसादा
घनतरवनसूना दानसन्धानभाजः ।
अविरलजलपूरस्नानगानाहिताशा
अनुघनरसमिष्टेः संप्रहृष्टैः समेताः ॥ १ ॥

तदनुमदन बाणव्रातसंजातखेदा-
तिशयभरपरीता स्वान्तभाजा समन्तात् ।
जलनिधिमधिकृत्य व्यध्यमध्यमृताना-
मिति विविधविलासा हन्त तासां समासन् ॥ २ ॥

अयि दयित नहि द्रागयाहि याहि स्मराहि
प्रवलविषक्रुशाङ्गीमङ्गसङ्गी कुरुष्व ।
स्तनजघननितम्वा भोगभाराभिभूता-
मिति विविधविलासानापि कञ्चिज्जगाद ॥ ३ ॥

कनकशिखरिराजावन्धुराभ्यां कुचाभ्यां
दयितचरमदेशं क्लेशयन्ती समन्तात् ।
विपुलतरतदंशद्वन्द्वसंन्यस्तहस्ता
खरनरकरतापोत्तप्तमस्ता ससार ॥ ४ ॥

मिहिरकरकदम्वैः सम्भृतो वक्त्रविम्वो
गलदविरलघर्मा सारसिक्त. परस्याः ।
प्रियतमवसनान्तैः प्रोञ्छत सन्नरङ्गः
समजनि रिपुवध्वस्तद्विधोऽप्याहिताज्ञः ॥ ५ ॥

गुरुतरपरिखेदप्राप्तपादोरुसादा
प्रियतमर्मावलम्ब्या लम्बिसम्व्या न मन्दा ।
अयि दयित न गन्तुं हन्त शक्ता नितान्तं[1]
तदनघ नय मामित्यभ्यागादभ्यदोयम् ॥ ६ ॥

१। मितान्तम्

मदिरसुरुचिराक्षं वीक्ष्य साक्षाद्विपक्षं
प्रियतमवसनान्तैर्वीजितं कञ्चिदेव ।
अहह सपदि मूर्च्छामाप कापि प्रकामं
तदतिनुतजलार्द्रामन्दवाताहतापि ॥ ७ ॥

अनुतनुरिपुनारीपादसञ्चारिणं स्वं
प्रियतममवलोक्यात्यन्ततान्ताथ काचित् ।
प्रियकमुकुलजालस्थूलकीलालविन्दुः
स्वसनगलितपक्ष्मस्वाक्षिसख्यां निरास ॥ ८ ॥

सरभसरसहासारम्भविश्रम्भभाजा
यदतिनुतविलासाजत्किरे तन्न चित्रम् ।
नदमतिशयचित्रं ता यदम्भोजनेत्रा
अपि वनमपहाय द्राक्तदेवापुरेव ॥ ९ ॥

सततमृतुकदम्बैः सम्भृतोऽपि प्रकामं
पिकशुकनिकुरुम्बैः राम आराम एषः ।
अजनि सपदि ताभिः प्रोज्झितो निर्गतश्री-
र्न च नयनसुखाह्ये तु स्यादन्तं[1] हि सर्वम् ॥ १० ॥

अलसवलितचञ्चन्मञ्जुमञ्जीरनाद-
प्रतिगतगतिमासां श्वेतपक्षाः समीक्ष्य ।
विपुलसलिलमापुर्मानिनां मानहानौ
वत रमणमतो वा दूरदेशप्रयाणम् ॥ ११ ॥

धृतदयितकराग्रं मन्दमन्दं व्रजन्त्या
अभिजलधिनितम्बोदारभारं बहन्त्याः ।
पदगलदुपसंव्यानं नितम्बोरुविम्बा-
दपि दयिततमो वा तत्र हेतुः श्रमो वा ॥ १२ ॥

मुखकमलसमीरैराहतास्ते द्विरेफा
निजवनमपि हत्वा पङ्कजाक्षीषु पेतुः ।
किमपि नयनसौख्यं वीक्ष्य साक्षाद्बुधोऽपि
क्षणमपि न हि धत्ते हन्त चित्ते विवेकम् ॥ १३ ॥

---

१ । स्यादकान्तम्

अथ कथमपि कान्तासन्ततिः साऽतितान्ता
विपुलतर नितम्वा भोगभारैरुदारैः ।
प्रतिपदमतिवाधां पद्धतिं संव्यतीत्य
प्रियतमधृतहस्ता तोयराशिं विवेश ॥ १४ ॥

सरभसरसहासैः कौतुके संप्रवृत्तेऽ-
द्भुततरमपयातं चक्रचक्रैः समन्तात् ।
उरसिजयुगमासां वीक्ष्य साक्षाद्विलक्षा-
दिव भवसुखसिन्धूद्रेकताराधिबन्धु ॥ १५ ॥

अधिजलधिरनल्पे कल्पयित्वाऽल्पमम्भो
जलविहरणचित्तोत्पत्यमुक्त्वाऽथ काचित् ।
दयितमवललम्वे कातराभ्यालिदोर्भ्यां
सपदि विपदि धाष्टर्यं न स्थितेर्नाशकारि ॥ १६ ॥

जलधिरपि समीक्ष्याक्षीणचन्द्राननास्ता
गजकरपरिलूनैस्तैः प्रसूनैः कृता च ।
रुचिरतरतरङ्गैर्दोर्भिरालिङ्ग्य सद्यः
खगकुलकलरावैः कोमलं चाललाप ॥ १७ ॥

अथ नवनवयोषां वीक्ष्य मन्दाक्षभूषां
जलनिधिमवगातुं वाढमन्यस्तचित्ताम् ।
करयुगघटतोयैः कश्चिदभ्यालिविभ्यत्
कुचहरमतिवेलं स्नापयामास तस्याः ॥ १८ ॥

सरसि सरसहासैर्गाहमानेऽङ्गनाभि-
र्झटिति झषसमूहाश्चेरुराशा भृशार्त्ताः ।
रुचिरतरविलोलं मञ्जुकञ्जातिहारी-
क्षणयुगमिव तस्यां[1] वीक्ष्य वैलक्षहेतोः ॥ १९ ॥

अवरशफररूपापातजात[2] प्रकम्पा
प्रियतममभिवाला तत्क्षणं यद्वभूव ।
भुवनविदितसारान्मारतो वातिघोराद्-
वयस उत दराद् वा तन्तुसाप्येव वेत्ति ॥ २० ॥

---

१ । तास्याम् २ । शफररूपातापातजात

जयति जलविहारे केशपाशादयस्ते
लघव उदकपूरे सर्वं एव प्लवन्ताम् ।
इदमतिशयचित्रं यत् प्लवन्ते प्रकामं
दमनकतरुलग्ना पर्वताः सर्वतोऽपि ॥ २१ ॥

स्तनजघननितम्बैस्ताड़ितः कामिनीनां
स्थितिमथ जलराशि लङ्घयामास सद्यः ।
मदनदहनतप्ते यौवनेवः प्रदीप्ते
हृदि नुतकृतकृत्यं वेत्ति यः सोऽपि विद्वान् ॥ २२ ॥

अतुलजलविलासारम्भविश्रम्भहेतो
रसितजलरुहार्थं सम्ममज्जाऽम्भसि द्राक् ।
किमु मृगनयनानां वीक्ष्य लक्षेक्षणानि
प्रमदमदनवाद्यखञ्जनागञ्जनानि[1] ॥ २३ ॥

अयि सहचरी मानं मुञ्च मुञ्चानिदानं
परिसरसरसिस्थं हन्त कान्तं च तान्तम् ।
जलविहरणमेतन्नान्यपुण्ये न धन्ये
प्रियतममनुमान्ये लभ्यतेऽगण्यपुण्ये ॥ २४ ॥

तदखिलसुखशालिप्रेमसन्दोहबन्धो
ननु जनुरनुवेलं हन्त कान्ते कुरुष्व ।
अविरतपरिदूनं सूनबाणाग्नि लीनं
वचनचयसुखाभिः सेचयप्राणनाथम् ॥ २५ ॥

इति कृतनुतचाटुः प्राणनाथप्रणीत-
प्रबलविषममन्तुं क्षन्तुकामाप्यनीशा ।
चरणतलगतालीं वीक्ष्य साक्षान्मृगाक्षि
निकटगतविपक्षं चापि कापि प्रतस्थे ॥ २६ ॥

प्रियकरयुगकुम्भा सम्भृताम्भोऽभिषिक्ते
अहतयुवतिनामग्राहमाहो उरोजे ।
अपि जलमतिशीतं तत् पुनः प्रोज्वलार्चिच-
र्ज्वलनविपुलकीला कोटितामाप सद्यः[2] ॥ २७ ॥

---

१ । त्रिभिः कुलकम् । सखीवाक्यम्   २ । त्रिभिः कुलकम्

प्रवलजलविलासारम्भविश्रम्भभाजो
विपुलकमलभाजास्पष्ट गुर्वङ्गयष्टेः ।
भ्रमररुचिरनेत्रं हारिकिञ्जल्कदन्तं
नवदलकुलदन्ताच्छादनं रम्यरम्यम् ॥ २८ ॥

अपि लपनममुष्या वीक्ष्य साक्षात् किमेतत्
कमलसुतसुखं वा द्राग्विवेक्तुं न शक्तम् ।
दयितमविरतोद्यज्जातिचिन्ता तितान्तं
दिशि दिशि परिधावन्नेत्रवित्रस्तचित्तम् ॥ २९ ॥

अतिनिकटमटन्तं मन्दमन्दस्मितश्री-
स्नपितमुखसरोजा यच्चुचुम्बातिगूढम् ।
अमृतविततसेको वाऽधनस्याथ राज-
त्पुरटघटभृतिर्वा तद्द्वयं तत्तु वेत्ति ॥ ३० ॥

अमृतमपि बिषं स्यात् क्वापि हेतोः सकाशा-
दहितजलजनेत्र्या आख्ययोदीरितेन ।
प्रियतमकरयुक्ते काप्यभूज्जीवनेन
क्षणमपि परिसिक्ता कापि निर्जीवनेव ॥ ३१ ॥

जलधिरथ मृगाक्षीस्ता समेत्यातिरक्तो
यदि हृततरसा सामन्तरीयं समन्तात् ।
चिकुरनिकरमारादाचकर्षाऽतिहर्षात्
स्तनजघनविमर्षं वाऽकृतै तन्तुयुक्तम् ॥ ३२ ॥

झषवरपरिदष्टस्पष्टमस्पष्टनेत्रा
दरभरपरिनुन्ना सस्वजे कापि कान्तम् ।
सपदि विपदि दैवादागतायां ततायां
नहि नहि महिमघ्नं धारणालङ्घनं तु ॥ ३३ ॥

अहृतयुवतिवक्षोजद्वयं वीक्ष्य साक्षात्
प्रियकरपरिसिक्तं स्नापयामास काचित् ।
गुरुतरपरिखेदात्यन्ततान्ता नितान्तं
निजकुचयुगमक्षि प्रक्षरद्वारिपूरैः ॥ ३४ ॥

सरभसरसहासैर्नून हारामुदारां
प्रियपरिहितनालां काञ्चिदुद्वीक्ष्य बालाम् ।
परिगतपरितापश्वासखिन्नाऽथ काचि-
न्न च मणिगणभूषां तल्पवेनापि मेने ॥ ३५ ॥

तनुतनुरवासस्यम्बुना कम्बुकण्ठ्या
स्तनजघननिसक्ते दत्तनेत्रे च कान्ते ।
तरलतर दृगन्ताऽमन्दमन्दाक्षभाजो
भुवनमभुवनं चेत् का गतिः स्यात्तदानीम् ॥ ३६ ॥

झटिति रुचिरहारास्ता जहुः केलिलोला
स्तनघटतटलम्बान्यम्बुजाक्षोः समक्षम् ।
जलपरिचयभाजामन्तिकेनो भवन्ति
क्षणमपि हि सुवृत्ता वर्त्तितुं दत्तचित्ताः ॥ ३७ ॥

प्रवलजलविलासायासभाजां च यूनां
दृशि भृशमनुरागोद्रेक आसीत्तदानीम् ।
अनुजनुरफलं स्यात् कामिनां हा विना मा-
मिति वत कथितुं वा मारविश्रम्भभाजाम् ॥ ३८ ॥

अपि सलिलहृताङ्गोद्वर्त्तनास्ता विरेजुः
सरभसरसहासालूनभूषानिकामम् ।
किमिदमतिविचित्रं यन्निसर्गोज्जलानां
परिहृतपरिवर्हं सद्वपुर्भाति भाति ॥ ३९ ॥

प्रियकरधृतवारि प्रोक्षिते वैरिनारी
विपुलविमलवक्षोजाचले लोललोले ।
सपदि तत उदीर्णं कीर्णमर्णोरुहाक्षी-
ममृतमपि मृतां हा द्राक् रकारेव काञ्चित् ॥ ४० ॥

विपुलसलिलकेलीचञ्चलस्वान्तभाजः
प्रवलतरतरङ्गोद्गारि चीनांशुकायाः ।
हरिहरि हरिणाक्ष्या सम्वरं सम्वरं चे-
न्न च कथय तदानीं का गतिः स्यादमुष्याः ॥ ४१ ॥

अथ कथमपि कान्ताः प्राणनाथैः समं ताः
कुसुमशरदुरन्तापारसन्तापतान्ताः ।
परिगलदलकान्ताः किञ्चिदञ्चद्दृगन्ताः
कलुषतरसरोजा आविरासुः समन्तात् ॥ ४२ ॥

सपदि जलधिमध्यादुत्तरन्तीः सुमध्याः
सरभसरसहासैश्छिन्नभूषा समीक्ष्य ।
इति मतिरुदयासीत्कामिनां सत्यमाभि-
र्वत मणिगणभूषा भूषितानानयाताः ॥ ४३ ॥

प्रियकररुहलक्ष्मीं वक्षसि प्रेक्ष्य साक्षा-
दतिशय सुखसिन्धावन्धितास्ता मृगाक्ष्यः ।
अपि मणिगणराजभूषणे नो मनोऽदु-
र्युवतिषु पतिरागो भूषणं नान्यदेव ॥ ४४ ॥

सपदि तत इतस्तास्ताः स्रजोभङ्गसङ्गाद्
ययुरतिरतिहासैः कामिभिः संप्रमुक्ताः ।
ननु जनुरफलं स्यात् प्रोज्झितानां विधिस्तै-
रिति वत कथितुं वाऽत्यन्तविश्रम्भगात्रैः ॥ ४५ ॥

तदवधिरस एषा प्रादुरासीद् विशेषो
हरिहरि परिशङ्के दम्पतोनामतीव ।
किमिदमतिविचित्रं यन्मनोज्वालयानां
ननु घनरसभाजां युक्तमेतत् प्रकामम् ॥ ४६ ॥

झटिति गलितपाथो विन्दुसन्दोहरम्य-
मटविकटमटन्त्याः केशपाशो रराज ।
तम इव गलनालप्रान्तनान्तेरमुद्यद्-
विकटतररदालीदष्टविस्पष्टसोमम् ॥ ४७ ॥

स्तनजघननितम्वात्यन्तसंसक्तरक्तः
शिचय निचय आहो ताजहौ कष्टकष्टाम् ।
किमिदमतिविचित्रं यत्र योऽत्यन्तरक्तः
स तु भवति सदा च त्यक्तुकामः कदापि ॥ ४८ ॥

तदनुरुचिरवेशाधूपिताश्यानकेशा
धृतमणिगणभूषाः कुन्दमन्दारहासाः ।
विपुलविमलदोषा नाथवक्त्राः स्वभासा
विमलिततविततााशा रेजिरे तत्र योषाः ॥ ४९ ॥

ततो वालाः काला गुरुकलितभालाः सरभसं
ययुर्मन्दं मन्दं प्रमदमदनावेशविवशाः ।
समीचीनैश्चीनैः परिवृतनितम्बोरुजघना
घनानन्दाः कान्तैः स्मरविशिखतान्तैः सह गृहान् ॥ ५० ॥

निजे वासे वासे वररभसदासेयकगणैः
प्रणीतप्राग्वृत्तस्वविभवसमानोपकरणे ।
प्रविश्य स्वै स्वैस्ता सममसुसमैः प्रस्तुतरमै-
र्विलासिन्यो लोला अलमभिविलेसुर्मृगदृशः ॥ ५१ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये
जलविहारो नाम पञ्चदशः सर्गः ।

षोड़शः सर्गः

कुसुमशरशरावली वली च
प्रवरतनुः सतनुर्विलोक्य सद्यः ।
चरमगिरितटीं समाट तूर्णं
सदयमना इव भानुमांस्तदानीम् ॥ १ ॥

सपदि मदिरलोचनाऽतिदूना
मदनशरावलिपन्नगेन कापि ।
निधुवनविधिमाधुरीणा कर
कलिताननपङ्कजानि दध्यौ ॥ २ ॥

अथ कथमपि काचिदेव गत्वा
शशिवदना पवनायनान्तिकक्ष्माम् ।
कुसुमशरशरातुरान्तरालं
चरमशिरेस्तरणेश्च पश्यति स्म ॥ ३ ॥

भण दयित उपैष्यति क्षणेन
क्षणयुगलेन च वा घटीं विलम्व्य ।
इति नयनगलज्जलावकान्या
करटकृते वलिमाददौ तदानीम् ॥ ४ ॥

सहचरि हरितांपतिर्गतोऽसौ
चरमगिरिं कुरुमण्डनानि तानि ।
इति वत शुकसारिकारुतानि
श्रुतिसुखदान्यपि कापि नैव सेहे ॥ ५ ॥

दयितमथ समीक्ष्यमान दूनं
निजदयितां च सखीं विलम्ब्यमानाम् ।
वृतनयनजगलज्जलावलान्या
मदनशराकुलिता चिरं न दध्यौ ॥ ६ ॥

अथ चरमगिरेः शिरोऽन्तराले
सरभसमेष विवेश सुप्तसप्तिः ।
अतिशयरतिसम्पदे स्मरार्त्तिः
पुरटघटो वरुणार्चना कृतेव ॥ ७ ॥

वरुणदिगपि भानुमेत्य रक्ता
समजनि सोऽपि च तामुपेत्य रक्तः ।
उचितमिदमहो महीयसां य-
ज्जयतितरामितरेतरानुरागः ॥ ८ ॥

खरकरमथ वारुणीरतं स्व-
दयितममुं समुदीक्ष्य पूर्वकाष्ठा ।
सकलभुवनपावनैकदक्षं
खगनिनदैः परिरोदितीव साक्षात् ॥ ९ ॥

अहह स महसां पतिस्तदानीं
सरभसमीक्षणधृष्टतां जगाम ।
असुवसुरहितस्य पश्य यस्माद्
भवतितरां मतिरीदृशी जनस्य ॥ १० ॥

अधितटिनी रतो जगत्तदानी-
न्तन उरुकैरवषण्डगन्धबन्धुः ।
किमिदमगमनो मनस्विनीनां
द्रवमकृतामु समेषु शैलजोऽपि ॥ ११ ॥

हरि हरि हरिदश्वमात्मकान्तं
वरुणदिशातिवशं भृशं समीक्ष्य ।
मुकुलितकमलोदरालिमाला-
ध्वनिभरतिप्रसभं किमु ब्रवीति ॥ १२ ॥

शिव शिव रतिरीदृशी नितान्तं
भवति जने क्षणभङ्गुरानुरागे ।
रुचिरसुमकरं चिरं निरस्या-
पगत रुचिर्नलिनी जलान्तराले ॥ १३ ॥

अरुणमतनुकामिनी निकामं
वरुण दिशाऽम्बर रत्नमेत्य सत्यम् ।
यदकृत हृदये मुद्रा तदानी-
मुचितमिदं हि फलं गुणज्ञतायाः ॥ १४ ॥

अथ चरमगिरिर्दरीशयितं
सरभसमेष हरिं चकार रागी ।
विततगगनकाननान्तराले
दिवसमतीव भृणावशां भ्रमित्वा ॥ १५ ॥

अतिविततनभोङ्गणे भ्रमित्वा
सरभसमेष भृशावशो हि हंसः ।
अपरसलिलराशिमध्यदेशं
यदपतदाशु किमत्र चित्रमस्ति ॥ १६ ॥

अथ सरभसमेष सर्वलोका-
वलि कलितप्रवलस्तवप्रकाण्डम् ।
यद्रुदरगतमाततान रत्ना-
कर उचितं तदहो अनन्तरत्नम् ॥ १७ ॥

दयितविनिहितमृणालमास्ये
परिदधती महसोपपातचक्री ।
हरि हरि परिदायतं तदानीं
किमु स रणं बहिरर्गलामसूनाम् ॥ १८ ॥

अमृतनिधिमथोग्रभाधिनाथो
यदपतदेष भृशो शावस्तकाले (?) ।
उचितमिदमहो महीयसां य-
च्छिवमुभयत्र परोपकारभाजाम् ॥ १९ ॥

खगमहह खगानगानुगास्तं
रुरुदुरहो सहसास्तमाकलय्य ।
सपदि विपदि सख्युराततायां
वदवद को न विषादमेति मर्त्यः ॥ २० ॥

निजगृहमपि सन्ततं तदानीं
वत चलिता नलिनीं विहाय लक्ष्मीः ।
निजदयितसमुज्झिते जने द्राक्
जलमिलिते वद कस्य वा रतिः स्यात् ॥ २१ ॥

रविमथ दयितं समीक्ष्य साक्षात्
विविशुरहो ज्वलनं त्विषोभृशास्तम् ।
ननु जनुरफलं प्रियोज्झिताना-
मिति वत सन्ततमेव वा भणन्त्यः ॥ २२ ॥

अथ सरभसमाविरासंसन्ध्या
सकलजनावलि कल्पिताञ्जलीभ्याम् ।
कुसुमशर शर प्रतापशुष्य-
त्तनुवन कक्षपरिक्षयाय वार्चिः ॥ २३ ॥

रुचिरतरजवानवानुरागां
समजनि पश्चिमदिक् प्रभा तदानीम् ।
पथिकजनवधूसरोषरुक्षे-
क्षणकिरणावलीशीलितेव साक्षात् ॥ २४ ॥

तदनु तनुतमं तमः समन्तात्
प्रतिपदमीक्षणलक्षमोक्षहेतुः ।
सपदि गत रुचं धरान्तरालं
व्यतनुत मानसमङ्घसामिवौघः ॥ २५ ॥

इह तु ननु दुरात्मना गतिस्या-
दिति रजनी किमु मित्र सम्प्रणीतम् ।
सरभसमवलाप्य धत्त सत्यं
तिमिरपटे न जगद्विवेकमेका ॥ २६ ॥

अथ दिवसकरे भृशं विपन्ने
तिमिरभरो द्युतिमाततान सद्यः ।
उचितमिदमहो यतस्ततायां
विपदि सतां समता भवेद्विवृद्धिः ॥ २७ ॥

परिसरति निरन्तरेऽन्धकारे
गगनतलानि दरीविलानि चेत्य ।
सकल जनमनपसुभीतिरासीत्-
परमभिसारजुषां मृगी दृशां नो ॥ २८ ॥

अथ तिमिरनिचोलिनी त्रियामा
प्रवलमनो जनुरङ्गना तदानीम् ।
विधुमसुसममीक्षितु ं वभूव
प्रवणमनाः सहस्राभिसारिकेव ॥ २९ ॥

उदयशिखरिणः शिरोऽन्तराले
सरभसमिन्दुरुचां प्रकाश आसीत् ।
वसतिमुपगतं सुधानिधानं
स्मितमिव जिष्णुविशः समीक्ष्य साक्षात् ॥ ३० ॥

अथ हरि हरितो मुखे दिदीपे
रुचिरतरांशुकला कलाकरस्य ।
असुत रणकृते वियोगिनां किं
मदनकृताङ्कतरणिप्रवालवद्धा ॥ ३१ ॥

सदनुरागनमाप मन्दमन्दं
मृदुतरशैतकरी कला विशाला ।
विरहिवधविधानतोऽधुना स्या-
मिति किमु लक्ष्मरतातिभीतभीता ॥ ३२ ॥

सकल कलरवै क्रमेण सर्वौ-
षधिगणबन्धुरथेन्दुरात्तचित्तः ।
मदननृपमहाभिषेकहेतो-
रमृतहृतो वत पौरटो घटो वा ॥ ३३ ॥

वत विगतमुदीक्ष्य तं क्षपेशं
घनतरसंतमसं सन्ततोऽपि ।
विषद हृदिजने ननु प्रदीप्ते
कलय कुतः कलुषात्मना प्रवृत्तिः ॥ ३४ ॥

सपदि रजनिवल्लभा तदानीं
गलितहिमश्रुतिलोतकानि कामम् ।
तिमिरनिकरशोकमाजहौ-
द्रागतिशयजीवनबन्धुमिन्दुमेत्य ॥ ३५ ॥

जननयनसुखैकहेतुभूतोऽ-
तनुनृपमूलधनं तुषारभानुः ।
न भवसि वत वभौ तवासवाशा
मृगमदशालि ललाटरक्तभक्तिः ॥ ३६ ॥

तदनु रजनि वल्लभोऽनुरक्तः
सरभसमेष मनांसि रागवन्ति ।
अनवरतरतानि रागभाजां
यदकृत शाधि किमत्र चित्रमस्ति ॥ ३७ ॥

जलधिरपि विधुं समीक्ष्य साक्षा-
दतिशयमुच्छलितः समुल्ललास ।
अथ कथय समन्ततोऽतिपूर्णे
निज तनुजे ननु कस्य नोन्नतिः स्यात् ॥ ३८ ॥

अविरतरवितापखिन्नखिन्नां
निज दयितां सकुमुद्वतीं समीक्ष्य ।
अमृतकरभरेण सादरोऽस्या
मुखमसुखं सममार्जयत् प्रकामम् ॥ ३९ ॥

अथ मदनमहीपतिः स्वसेना-
पतिः रजनिपतिमागतं समीक्ष्य ।
भुवनतलविशालवीर्य्यमार्य्यं
रतिसहितः कृतकार्य आदिदीपे ॥ ४० ॥

विषदतनुरथो निशाधिनाथोऽ-
जनि सहसा महसाऽतिकुन्दभासा ।
प्रमदरजनि योषिदङ्गसङ्गात्
किमुतरसातिरसाङ्गताङ्गरागः ॥ ४१ ॥

न च तुहिनकरो न चास्य चिह्नं
गगनतलं विमलं चकार योऽसौ ।
किमु मदननृपस्य कालपुष्पा-
वलिललितं विमलं शितातपत्रम् ॥ ४२ ॥

न च सकलकलः कलाधिनाथो
वपुरपि चास्य कलङ्कसङ्करं न ।
किमु गगन सरोऽवगाहशीला-
मुखधृतशैवलवल्लिराजहंसः ॥ ४३ ॥

न च तुहिनकरः स्फुरत्यनन्तो
च खलु लक्ष्मलताततताऽस्य गात्रे ।
अशितजलजलालिता मृगन्त्यः
किमु चषकः किलराजतोऽमराणाम् ॥ ४४ ॥

न च हरिणशिशुर्नवो कलङ्को
न च धरणी प्रतिविम्बिता निशेशे ।
अतिशयरतिखेदिताधिशेते
किमु रजनीदयिता प्रियाङ्कदेशम् ॥ ४५ ॥

अथ हरिणदृशस्तास्ताः समीक्ष्य क्षपेशं
क्षयित तिमिरपक्षं विस्फुरन्तं करोघैः ।
सुमविशिखदुरन्तात्यन्तसन्तापतान्ताः
सरभसपरिकर्मोपात्तचित्ता वभूवुः ॥ ४६ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये चन्द्रवर्णनं
नाम षोड़शः सर्गः ।

सप्तदशः सर्गः

तं दिवः परिसरेऽथ चरन्तं वीक्ष्य पक्ष्मलदृशः क्षणदेशम् ।
हन्तकान्तचरणाहितचित्ता भूषणं विगतदूषणमाहुः ॥ १ ॥

सूनवाणपरिलूनतनूनां कान्तसन्ततविहारमतीनाम् ।
त्रस्त रोहितदृशां ननु कासां चिन्मनो न च विभूषण आस[1] ॥ २ ॥

जातरूपसुपरिस्कृतमुक्ताधार इन्दुहरिचन्दन भूमिः ।
निर्जरातिशय भोगनिदानं प्रोज्ज्वलस्त्वमहमप्यतिपीनः ॥ ३ ॥

इत्यनर्घजनुषो ननु कस्याश्चित् कुचद्वितयमाशु जहासा ।
तारहारवरवर्ण्णकवर्ण्णं सर्वतः कनकपर्वतलक्ष्मीम् ॥ ४ ॥

अन्वया सपदि काञ्चन काञ्चो किञ्चदञ्चितदृगञ्चलखेलम् ।
मोहपाश इव हारि नितम्बेऽकारि वारिजदृशा जगतोऽपि ॥ ५ ॥

काचने तिल चकार शरीरे सेन्दुचन्दनविलेपनलक्ष्मीम् ।
हन्तकान्ततनुसङ्गमजन्मानन्द एष न भवेत्परिरम्भे ॥ ६ ॥

अन्यया स्तनयुगेऽकृतरम्या पीड़नाय[2] तु दृशोऽतिरसेन ।
द्राग्विलोकनत एव जनानां पोड़्यते ननु मनो यदनेन ॥ ७ ॥

आलि वालिशमनाअलिमुक्ता हारमारचयतारतरं तम् ।
यद् विलोकनत एव हि मुक्ताहारचितमपि नित्यमुदेति ॥ ८ ॥

कापि काञ्चन जगाद तदानीमङ्गने कुरु कुचे शतयष्टिम् ।
जीवनायकमनोमृगयूनः कलनाय शतयष्टि विसृष्टिम् ॥ ९ ॥

अम्वलम्वनमिदं कलय द्राक् निष्प्रवाणिवसनां रसनां च ।
अद्य हारमपि सारतरं तं पारिहार्यमपि कामपि काचित् ॥ १० ॥

फालमालिरचया प्रपदोनं वालकराङ्कवविधौ नमनो मे ।
पीड़नं तनु तनौ च सजोङ्कं पूर्णनाभि शशिनोऽपि मुदे नो ॥ ११ ॥

१। युग्मकम्

२। पीड़या

एकयष्टिमवसुन्दरिदेवच्छन्द एष न सुखो न ललन्ति ।
कापि मारणरवारपरीताऽभ्यालिलोलनयनेति ललाप ॥ १२ ॥

तारहारमजुलापकुचश्रीः श्रोणिविम्बमपि काञ्चनकाञ्ची ।
हा सुवृत्तमपि तद्द्वयमध्यं वन्धनं हि जगताखिलमध्या ॥ १३ ॥

गण्डमण्डलतले प्रतिविम्वं निर्मले हिमकरः समवाप ।
द्राक् त्वया जित इति श्रुतिमूलेऽस्या सहं हि कथयन्निव तूष्णीम् ॥ १४ ॥

कापि दर्पणतले मुखविम्वं[1] वीक्ष्य तत् क्षणमथो शशिनं च ।
एतयोर्न हि समा सुसमेति द्राक् परीक्ष्य मुमुदे च तदानीम्[2] ॥ १५ ॥

साम्प्रतं सखि सखीजनदुःखं पक्ष्मलाक्षि न हि वेत्सि मतिर्मे ।
यत्तथाविधदशा भृशमेतां मामुदीक्ष्य च विलम्वमुपेता ॥ १६ ॥

कापि कामशरवारहुताशज्वालयाकलितमानसवृत्तिः ।
वीक्ष्य रुक्षवदनातिविलम्वादागतां प्रियसखीमिदमूचे ॥ १७ ॥

ताः सखीः स्वनिकटं समुपेता वीक्ष्य रुक्षवदना शशिनं च ।
प्रेरिता दृशा इवातिभृशार्त्ता योषितस्तदनु कान्तनिशान्तम् ॥ १८ ॥

आलिवालिशजनस्य च दोषे रोष एष विहितो न गुणाब्धिः ।
हा तवोदितमतीव हितं प्राङ् न श्रुतं श्रवसि मूतधिया यत् ॥ १९ ॥

हा कथं हतधिया वत कान्तः पादपङ्कजगतोऽपि निरस्तः ।
युज्यते तदिह दुःखमपारं यत् प्रियं परमदैवतमाहुः ॥ २० ॥

साम्प्रतं सखि सखिजनदुःखं तं न वेत्सि वत तेन विना यत् ।
इन्दुरेष ननु तिन्दुकशुष्मा हा क्षण युगति भारति हारः ॥ २१ ॥

दुःखश्रवणशुष्कमुखेन्दौ निर्गते सपदि जीवनबन्धौ ।
हा कथं हतधिया न धृतोऽसौ यत्सुखं न हि विधौ प्रतिकूले ॥ २२ ॥

१। सुमुखविम्वम् २। युग्मकम्

इत्युदीर्य्य गलदम्वुविनेत्रा स्वासखिन्नरदनच्छदनान्ता ।
सूनवाणपरिदूनशरीरा दुःखिता नतमुखी वत तस्थौ[1] ॥ २३ ॥

आलि तेन दयितेन हताऽहं विप्रलम्भमधिकं गमिताऽस्मि ।
किं न वेत्सि सुमुखि क्षणभिन्नप्रौढसौहृदरसेन दुराशा ॥ २४ ॥

तज्जनु ननु तनूदरि सत्यं व्यर्थमेव वत जीवितमेतत् ।
वज्रकीलपरिकीलितमासीन्नाधुनापि विगतं तनुतो यत् ॥ २५ ॥

केलि केतनमिदं तु तदानीं तेन हीनमतीलीनकृशेण ।
वीक्ष्य तत्क्षणमथो यदभूत्तदवेत्ति चित्तजड़ितत्वमहोवा ॥ २६ ॥

इत्युदीर्य्य विकृताधिकवाधागाधवारिनिधिमध्यगतां ताम् ।
दुःसहश्वसितजातविधूतात्यन्तदन्तवसनां नतवक्त्राम् ॥ २७ ॥

नोदितापि सपदि प्रतिपेदे वीक्ष्य कापि वत कान्तनिशान्तम् ।
कार्यमार्य्यमवधार्य्य वदेद् या सा निसृष्टमनुगच्छति दौत्यम्[2] ॥ २८ ॥

किं पुनः करसरोरुहलीनस्वानना ननु दुनोऽसि नितान्तम् ।
लोललोचनगलज्जलधारा क्षालितोन्नतघनस्तनयुग्मा ॥ २९ ॥

कान्त एष मदनाशुगवाधात्यन्ततान्तहृदयो ननु कान्ते ।
हा मद्दे निहित सन्ततचेता एष्यतीत सुजनाननवादः ॥ ३० ॥

तन्मनोऽजनि कुरुष्व दुरापं नाफलं ननु जनुस्तनमध्ये ।
जीवने च तपते तु कुतः स्यादीक्षणं सुखनिवासभुखस्य ॥ ३१ ॥

पश्य विश्वविसरद् गुणसिन्धो को जनो महमहो अतिगन्ता ।
भूरिसूनभरपूरित राजकोकिलावलिकलस्वनरम्यम् ॥ ३२ ॥

इत्थिमाकुलसखीवचनान्ते कापि कान्तवचनं वहिरेत्य ।
यद्वभूव तरसाऽतिरसात्तद्वेत्ति चित्त जनुरेव न चान्यः[3] ॥ ३३ ॥

१। इति कलहान्तरितापञ्चकम् २। इति विप्रलब्धापञ्चकम् ३। इति प्रोषितभर्तृकापञ्चकम्

आलिवालिशमना: किमनल्पं हन्तजल्पसि च कल्पय तल्पम् ।
साधु तन्निधुवनोचितमेतद् वासवेश्मपरिसंस्कुरु नारि ॥ ३४ ॥

धूपयाशुक च धोरणिमेतां हस्तयोश्च वलयं कलय द्राक् ।
मत्तनुं मलयजेन नितान्तं सेन्दुना च परिशीलयलोले ॥ ३५ ॥

चारुहारललितामपि कण्ठे धेहि मे सपदि किन्नरकण्ठि ।
जीवबन्धुरधुनैव विनोदी वासमेष्यति भृशं कृशमध्ये ॥ ३६ ॥

यद् विना ननु जनुर्विफलं मे येन साकमवले सफलं स्यात् ।
तस्य पश्य वदनं स्मितशालिप्रेमधामगुणगौरिनिकामम् ॥ ३७ ॥

इत्युदीर्य्य तरसाऽतिरसा द्राक् जोवनाथपथसम्भृतनेत्रा ।
लोलदृष्टिरवला सविलासं गुम्फति स्म विपुलां किल मालाम्[1] ॥ ३८ ॥

किं कयापि तव जोवितनाथो रुद्ध इन्धतरदैवतभाजा ।
हा मया प्रहितयाथतयाद् वा वीक्षणं क्षणपरिक्षतसेव ॥ ३९ ॥

आर्य्यवृत्तिभिरथो विधृतो वा कार्य्यगौरववशाद् सुशमेषः ।
नाधुनापि मदनाशुगवाधा विद्धमानसरसो यदुपेत: ॥ ४० ॥

किं विभूषणगणै रमणीयैस्तारहारमणिभिश्च मुवृत्तैः ।
जीवनेन मम किं वत तेनात्यन्तकान्तचरणाद्विमुखेन ॥ ४१ ॥

इत्युदीर्य्य नमिताननपद्मां स्वासनिः सहमुखों सुमुखीं ताम् ।
वोक्ष्य रुक्षवदनां मदनाधिव्याधिवारिनिधि मध्यनिमग्नाम् ॥ ४२ ॥

कापि तापि तमतीरतिबन्धोमार्गनिर्गमितलोचनपद्मा ।
द्रागयथौ दयित वेश्म हितार्था नोदितोऽपि च हतायत: (?) स्यात्[2] ॥ ४३ ॥

नान्यराशिरुचिराणि तनौ मे नैवहारलतिकापि च तारा ।
मञ्जुसिञ्जितमहो नहि पादे भूषणं विगतदूषणमेतत् ॥ ४४ ॥

१। इति वासकसज्जापञ्चकम्   २। इति विरहोत्कण्ठितापञ्चकम्

हास एष विषदो न मनोज्ञः केशपाशरचनापि तथा न ।
शोभना ननु न काञ्चन काञ्ची नैव चञ्चलतरो नयनान्तः ॥ ४५ ॥

आलि पश्य कुसुमाशुगकान्तः कान्त एष वदतीति तथापि ।
आननं गतकलङ्कशशाङ्कप्रौढविम्वरुचिरं तव तन्वि ॥ ४६ ॥

मन्द मन्दवहदाशुगयोगात् किञ्चिदञ्चदरविन्दसुचारु ।
हारि लोचनयुगं तव सत्यं चित्तजन्मनृपसञ्चयवित्तम् ॥ ४७ ॥

अत्र लोलशतपत्र सुनेत्र कथ्यतामहह किं करणीयम् ।
इत्यवोचत तदा तु कयाचित् काचिदायतदृशाऽतिरसेन[1] ॥ ४८ ॥

आलि दौत्यमधिगच्छति सत्यसर्वमेव किमतः परमस्ति ।
हा तथापि वनिता जनमेतं वक्तुकाममवले कलयाशु ॥ ४९ ॥

तेन तेन विधिनाऽनुनेयः साम्प्रतं सुमुखि जीवनबन्धुः ।
येन येन दयितो मम विद्यात् कुन्दहासिनि भृशं न स लौल्यः ॥ ५० ॥

मामपीदृशदशां भृशमेतां त्वत्त एत्य च यथा सदयः स्यात् ।
सूनबाणपरिलूनतनुः सन्नन्तिकं च मम तन्वि समीयात् ॥ ५१ ॥

तां वदन्ति वनिते ननु सन्तो दूतिकामति सदानतिभाजोः ।
कार्यजातमवधार्य्य वदेद् या तत् करोति तरसा चर सा त्वम् ॥ ५२ ॥

इत्युदीर्य्य परिवर्त्तितवैर्यां स्वां तनुकुसुमबाणविलूनाम् ।
वीक्ष्य च क्षणमथो सरसाक्षी लज्जया नतमुखी वत तस्थौ ॥ ५३ ॥

तास्तदा हृदि मुदाहित तत्तत्कार्यवर्यनिचया अथ नाथान् ।
भर्त्तुरुन्नतदुरुहतरार्थं व्यूहगर्भवचनोच्चयभाजः[2] ॥ ५४ ॥

कामधामरुचिराङ्कुशः सन्बाध्यते हि बलिभिनबलीयान् ।
सत्यमत्र नहि संशयलेशो यन्मनोजनुरनुक्षणतापः ॥ ५५ ॥

---

१ । इति स्वाधीनाभर्तृकापञ्चकम्   २ । इति अभिसारिकापञ्चकम्

सुन्दरे त्वयि कलीयसि किञ्चित् कर्त्तुमेषदरतोऽक्षम आसीत् ।
त्वत्पदाम्वुजरजोभरचित्तां तां दहत्यहह किं करणीयम् ॥ ५६ ॥

तत् प्रसादमदनोज्वलवालां पालयाशु कलयाशु दशां ताम्[१] ।
अग्रपल्लवगलज्जनलोले जीविते मृगदृशः प्रतिभूस्त्वम् ॥ ५७ ॥

नाधुनापि नितरां मतिरस्मादङ्ग तात् प्रियसमुद्विजिते ते ।
वारिजादटति यत्तटिनी द्राग्वानतोऽपि वद पर्वतकम्पः[२] ॥ ५८ ॥

तत् प्रसीद तरसा गुणसिन्धोर्मन्दिरं भज निजं तदवेहि ।
इत्युदीर्य्य वरकार्यधुरीणा कापि कान्तमनयत्कलकण्ठि[३] ॥ ५९ ॥

हा किमङ्ग कथनेन च विद्यावासवासगृहकृत्यभरस्य ।
यत्तले गलदनल्पजलाक्षी रक्षिता लुठति दुष्कृतदूना ॥ ६० ॥

मारवारगणतः प्रतिवेलं हृद्गतं किमु भवन्तमतीव ।
रक्षति क्षितिमहाकवचेन क्षोणिनाथमदारविदारात् (?) ॥ ६१ ॥

तत्तनुं ननु विनोदय नानावादकौतुकरसैर्गुणसिन्धो ।
इत्युदीर्य्य तरसा[४] सरसाक्षी कापि वासभवनाय निनाय[५] ॥ ६२ ॥

हा प्रभो गतरसे सति सत्यं सर्व एव हि तथाविधवृत्तिः ।
यन्मनोजनितनो करवारैस्त्वद् विनामृतकरोऽपि दुनोति ॥ ६३ ॥

तद्गुणाकरभवद्गुणसिन्धावन्धतां ननु तनुं परिगाहि ।
याहि वासभवनं दयितेति प्राह कापि तरसा सरसाक्षी ॥ ६४ ॥

सामदण्डविधिभेदनगर्भैर्भाषितैः सदयसां भृशमार्त्ताः ।
घोरसूनशरलूनशरीराः कामिनो ननु नुत समवापुः ॥ ६५ ॥

कापि हासकुसुमैरचितार्चा हर्षलोतकभरैर्निहितार्घा ।
सानुरागमवला भुजवल्लीमाल्यतल्लजमदात् प्रियकण्ठे ॥ ६६ ॥

---

१ । कलयाशुङ्ग दशाताम् ३ । त्रिभिः कुलकम् ५ । युग्मकम्
२ । व पर्वतकम्पः ४ । तरसाः

कोऽपि लोचनचमत्कृतिभिर्भाग् वारिताग्रगतसर्ववयस्य: ।
मन्दमन्दमुपगम्य कराभ्यामक्षिमञ्जु पिदधे मदिराक्ष्या: ॥ ६७ ॥

कश्चिदेत्य तरसाऽतिरसार्द्र: प्रोल्लसद् घनतरस्तनयुग्माम् ।
आधिवारिनिधिमध्यनिमग्नां सस्वजे दृढतरं प्रसरन्तीम् ॥ ६८ ॥

विपुलविमललक्ष्मीं वीक्ष्य साक्षात्क्षपेशं
नभसि परिचन्तं[1] तारकाभि: स्फुरन्तम् ।
प्रमदमदनबाधाव्याधिपाथोधिमग्ना
अतिशयरसलग्नास्ते तदा रेमुराभि: ॥ ६९ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये दूतीप्रस्थानो
नाम सप्तदश: सर्ग: ।

---

१ । न भवसि परिचन्तं

अष्टादशः सर्गः

ततो मृगदृशो मारशरदारकरालिताः ।
वीक्ष्याभिलेषू राजन्तं विधुं निधुवनं प्रियैः ॥ १ ॥

शशो मृगो वृषहयाविति जातिचतुष्टयम् ।
अमीषां लक्षणं वक्ष्ये संक्षेपेण यथायथम् ॥ २ ॥

शशः स्त्रीविजितः श्रीमान् गायकोऽतिसुखी कृती ।
उत्तमः स्थौल्यदीर्घाभ्यां षड़ङ्गुलिकमेहनः ॥ ३ ॥

मृगोऽल्पभुक् सत्यवादी रूपवान् धार्मिकः शुचिः ।
प्रियम्वदोऽष्टाङ्गुलकमेहनः स्थौल्यदीर्घयोः ॥ ४ ॥

वृषभः श्लेष्मकः कान्तावशस्तेजो वितानवान् ।
तथा दशाङ्गुलमितमेढ्रः स्यादुपकारकृत् ॥ ५ ॥

अश्वः स्यात् कुनखो लुब्धः कृपणश्चातिनिर्भयः ।
मिथ्यावाक् स्थौल्यदीर्घाभ्यां द्वादशाङ्गुलमेहनः ॥ ६ ॥

पद्मिनी चित्रिणी चेति शङ्खिनी हस्तिनी तथा ।
आसामपि च वक्ष्येऽहं लक्षणानि समासतः ॥ ७ ॥

पद्मिन्यम्वुजगन्धभृत् विधुमुखी लज्जावती मानिनी
तन्वी हंसगतिः षड़ङ्गुलभगा श्यामा सुकेशी शुभा ।
रक्तोपान्तविलोचना मृदुतनुः पीनस्तनी कोकिला-
वाणी ताम्रनखी विलोलनयना विम्वाधरा स्वल्पभुक् ॥ ८ ॥

चित्रिण्यल्पमनोजनुर्वरतनुर्माद्यन्मयूरस्वना
स्निग्धा श्रीफलमञ्जुलस्तनयुगा सङ्गीतविद्योज्ज्वला ।
लोला कामकलाकुलापललवद्गन्धा विशालोदरी-
स्यादष्टाङ्गुलपारमारसदना पद्मानना वत्सला ॥ ९ ॥

शङ्खिन्यस्थिरगामिनी लघुकुचाभोगामदावेशिनी
क्रुरा दीर्घकचोज्ज्वलाऽतिकुटलापाङ्गाकुला दुर्वला ।
निर्लज्जा सरुषादशाङ्गुलमितस्मारालया क्षारवद्-
गन्धा वाह्यरतप्रियाऽतिजघना पारावताराविणी ॥ १० ॥

हस्तिन्यानतकन्धरा पृथुकुचा स्थूलातिलोमाकुला-
पाङ्गादीर्घकचोत्तरा वहुतरा हारा वचोघर्घरा ।
कामार्त्ता मिहिराङ्गुलायतभगा कष्टैकसाध्या रते-
माद्यत् कुञ्जरगामिनो मदलसद्गन्धाऽतिलुब्धाशया ॥ ११ ॥

देवनागनरायक्षपिशाचकपिगर्द्दभाः ।
गन्धर्वश्चेति सत्वानि वक्ष्येऽमीषां तु लक्षणम् ॥ १२ ॥

भाविन्यम्वुजगन्धवन्धुरतनुः शश्वत्प्रसन्नावहु-
प्रेष्याच्छादनयानमानविभवा स्याद्देवसत्त्वाङ्गना ।
जृम्भासम्भरिताननाः स्वसनभृत्तृष्णाप्रियानुक्षणं
निद्रामुद्रितलोचना विकलहृत्सा नागसत्वा मता ॥ १३ ॥

नित्यं द्वन्द्वभरोपवाससहनादीनाऽर्थिसार्थातिना
संसक्ता सरलस्वभावकलिता सामर्त्यसत्वेरिता ।
रामा रामविहारयानगमनासक्ताविलज्जाशया-
रोगावेशभृशावशाति विरसा सा यक्षसत्वोदिता ॥ १४ ॥

शश्वद्विश्रुतरामिषासवपरा मानातिहोनाऽमना-
कृष्णाङ्गा च पिशाचसत्वकलिता वालाऽतिवेलाशना ।
व्यालोलेक्षणलक्षिता प्रविचलपत्पाणिद्वयी सेमुषी-
चित्ता नित्यगतानुरागविभवा स्यात्कीशसत्वेति सा ॥ १५ ॥

विद्वेशातिवशाशयाभृशमसह्योक्तिप्रसक्ता कलौ-
रवता गर्वितसत्वकेति कथिता नित्यं विटेषूत्कटा ।
सङ्गीतागमकामकेलिचतुराकर्पूर पूरोत्तर-
स्रग्गन्धाभिरताऽतिवेशरसिका गन्धर्वसत्वा मता ॥ १६ ॥

वाला षोड़शवर्षिकाऽथ तरुणी यावत् खरामाब्दिका
प्रौढ़ा चेन्द्रियबाण वत्सरमभिव्याप्यैव वृद्धा ततः ।
वालाप्राणकरो सदैव तरुणी तद्धारिणी च क्रमात्
प्रौढ़ा वोर्ध्वमथा तनोति तनु ते वृद्धामृतिं तत्क्षणात् ॥ १७ ॥

मेहनं द्विविधं प्राहुर्मुषलं च शरीरकम् ।
स्थूलं मुषलमाख्यातं दीर्घं चापि शरीरकम् ॥ १८ ॥

कूर्माकृतिः कुम्भिकुम्भशङ्खनाभसमप्रभौ ।
विशालो लोमरहितो मृदुः षट्सुभगा भगाः ॥ १९ ॥

गोजिह्वा सदृशोऽत्यन्त तप्तो लोमसमन्वितः ।
जाडचवानिति चादिष्टाश्चत्वारो दुर्भगा भगाः ॥ २० ॥

देशेदेशे कलौ काले संकीर्ण्णाः प्रायशोऽवलाः ।
पुरुषाश्च ततो यत्नाल्लक्षणानि परीक्षयेत् ॥ २१ ॥

अङ्गुष्ठे पदगुल्फजानुजघनेनाभौ च वक्षस्थले
कक्षे कण्ठकपोलओष्ठनयने कर्ण्णोऽलिके मस्तके ।
पुंसां दक्षिणभागगे मनसिजः पक्षेऽवलक्षे तथा
स्त्रीणां वामविभागगे विनिमयः स्यादस्य कृष्णे पुनः ॥ २२ ॥

यज्जङ्घोरुशिरः स्तनेषु च गले कर्ण्णे च कक्षान्तिके ।
घातं हारिनखक्षतं च वितरेन्नाभौ भगे मर्दनम् ।
ओष्ठे दन्तनिपीड़नं च हृदये पातं च मुष्टाऽलिके ।
गण्डे चक्षुषि चुम्बनेभिरवशः कामोऽग्निनाज्यं यथा ॥ २३ ॥

आलिङ्गनं चुम्बनदन्तघातनखाङ्कतच्चाटुकचग्रहाश्च ।
प्रहारनाड़ीद्रवमर्दनं च वाह्यं रतं स्यादधराभिमर्षः ॥ २४ ॥

कुचोपगूहनं वृक्षा रूढ़मूरूपगूहनम् ।
लालाटिकमथो दुष्यजलं च तिलतण्डुलम् ॥ २५ ॥

लतावेष्टनकं चैव जघनाद्युपराद्रकम् ।
अष्टावेते परीरम्भास्तथादौ सुरते मताः ॥ २६ ॥

वालानुरागसंयुक्ता कुचाभ्यां विशतीव यत् ।
दयितोरस्थलं प्रोक्तं तद्वक्षोजोपगूहनम् ॥ २७ ॥

एकं पदं पदे कृत्वाऽपरं चोरौ परिष्वजेत् ।
पृष्ठेऽस्यैकभुजं वृक्षारूढं कक्षे परे यदि ॥ २८ ॥

उरुभ्यां पीड़येदूरू दयितो दयिताऽपि वा ।
उरूपगूहनं तत् स्यात्कण्ठासक्तभुजायुगम् ॥ २९ ॥

परस्परं समालिङ्ग्य हन्यते चेन्मुखे मुखम् ।
ललाटं च ललाटेन तल्लालाटिकमुच्यते ॥ ३० ॥

अङ्गभङ्गमनादृत्य यद्जातालिङ्गनं मुहुः ।
परस्परानुरागेण तद्दुग्ध्यजलमुच्यते ॥ ३१ ॥

शयानं वा शयानां वा भूजोरूभ्यां निरन्तरम् ।
संवेष्टच पीड़ये द्रागात्तद्भवेत्तिलतण्डुलम् ॥ ३२ ॥

तिष्ठन्तं पुरुषं दोर्भ्यां लतावृक्षमिवाङ्गना ।
संवेष्टच यन्मुखं चुम्वेत्तल्लतावेष्टनं विदुः ॥ ३३ ॥

आक्रम्य जघनं भर्त्तुरुपविष्टा यदाऽवला ।
लम्वते चुम्वनार्थं तज्जधनस्योपगूहनम् ॥ ३४ ॥

एते पशुपरीरम्भा मूलमङ्गं रतस्य तु ।
पशवोऽपि विना येन रतं नेच्छन्ति किञ्चन ॥ ३५ ॥

संपूर्णं वलितं जिह्वाभ्रामणं पीड़ितं ततः ।
स्फुरितं पीड़ितं चोष्ठपीड़नोन्नामिते तथा ॥ ३६ ॥

उद्घृष्टकं तथैवोष्ठसमुद्गक इति क्रमात् ।
चुम्वनानि दशैतानि यूनो रति रति श्रिये ॥ ३७ ॥

परस्परास्यसंयोगे यज्जिह्वाभ्रामणं भवेत् ।
तत् सम्पूर्णमिति ज्ञेयं रागातिशयसूचकम् ॥ ३८ ॥

नासाललाटसंयोगे यत् प्रियावन्दनं प्रियः ।
तिर्यक् चुम्वति लोभेन वलितं नाम तद्भवेत् ॥ ३९ ॥

जिह्वास्ये भ्राम्यते यत्र तज्जिह्वाभ्रामणं मतम् ।
मुखादावधरोष्ठाभ्यां पीड़नं पीड़ितं तु तत् ॥ ४० ॥

किञ्चित्सम्पर्कमासाद्य यत्रौष्ठयुगलं द्वयोः ।
प्रकम्पते ससीत्कारं स्फुरितं नाम तद्भवेत् ॥ ४१ ॥

वक्त्रं भ्रमरवत्तिर्यगावर्जितमतिग्रहः ।
विचुम्वति ससीत्कारं भ्रामरं नाम तद्विदुः ॥ ४२ ।

तदोष्ठपीड़नं प्राहुरोष्ठमोष्ठनिपीड़नात् ।
उन्नामितं तत्पाणिभ्यामुत्तोल्यास्यं विचुम्वनम् ॥ ४३ ॥

उदरं च समाक्रम्य प्रियोष्ठं च कृतध्वनिः ।
कचार्पितकरे चुम्वेद्भवेदुद्घृष्टकं तु तत् ॥ ४४ ॥

इतरेतर संयोगे मुखं यत्रोभयोरपि ।
ओँकारजल्पनाकारं भवेदोष्ठसमुद्गकः ॥ ४५ ॥

शिरोललाटाक्षिकपोलवक्षोग्रीवास्तनोरूदरनाभिदेशे ।
वराङ्गदन्तच्छदने च दद्याच्चुम्व तथाऽन्येष्वपि देशरीत्या ॥ ४६ ॥

विन्दूत्सूनकखण्डाभ्र गूढ़मूत प्रवालकम् ।
क्रोड़चर्वितकं विन्दुमालाष्टौ रदनव्रणाः ॥ ४७ ॥

विन्दुप्रभा भवेद्बिन्दूरुस्वनमधिकोन्नतम् ।
खण्डाभ्रं तत्तु कथितं यदीषत् खण्डितं मतम् ॥ ४८ ॥

अलक्षितं भवेद्गूढ़ तद्धि योषित् सुखावहम् ।
लोहिताकृति मूढं स्यात् प्रवालं चोन्नतारुणम् ॥ ४९ ॥

क्रोड़चर्वितमित्याहूर्यद्दीर्घस्यादरक्तकम् ।
विन्दुमाला हि सा ज्ञेया विन्दुमालेव या भवेत् ॥ ५० ॥

नाड़ीमूलनितम्बदन्तवसनोरुद्वन्दकक्षद्वयी
वक्षोजे शशिरः स्तनेषु वितरेत्षड्दन्तघातान् पतिः।
गण्डद्वन्द्व गलस्थले समदनस्ता बिन्दुमालां पुन-
र्विद्यात् क्रोड़विचर्चितं तु कुचयोः सर्वत्र सर्वाणि वा ॥ ५१ ॥

शशप्लुतं मण्डलकं मयूरपदार्द्धचद्रास्फुरितं च रेखा।
अष्टौ तथा व्याघ्रपद वदन्ति नखव्रणा उत्पलपत्नकं च ॥ ५२ ॥

शशप्लुत पञ्चनखैः समं विद्धं यदा भवेत्।
तत् स्तने जघने पृष्ठे पार्श्वयोरतिशोभनम् ॥ ५३ ॥

परस्पराभिमुख्येन नखत्रयनिवेशनम्।
क्षत्तन्मण्डलकं योनिनितम्बोरुसुसुन्दरम् ॥ ५४ ॥

विरलैर्नखरैर्विद्धं चतुर्भिश्च कनिष्ठकैः।
तन्मयूरपदं शस्यं कपोले स्तनमण्डले ॥ ५५ ॥

अर्द्धचन्द्रं निगदितं यदर्द्धेन्दुसमप्रभम्।
तद्दीयते स्तनतटे ग्रीवाक्षां कक्षयोरपि ॥ ५६ ॥

स्यादाच्छुरितकं पञ्चरेखा पञ्चनखैस्तु यत्।
तत् योनौ च स्तने गण्डे नितम्बे कक्षयोरपि ॥ ५७ ॥

दीर्घैतरेखा रेखास्यात् वक्रा खर्वा च सा यदि।
तद्व्याघ्रपदमिच्छन्ति द्वे पृष्ठोरुकुचेषु च ॥ ५८ ॥

यदुत्पलदलाकारं तत्स्यादुत्पलपत्नकम्।
तत्कुचोपरिपृष्ठे च जघनं च प्रशस्य ते ॥ ५९ ॥

नखाङ्कसदृशं किञ्चिन्नास्ति स्त्रीप्रीतिदं रते।
तत्कलावांश्चरेद्धीरं जघनोरुस्तनादिषु ॥ ६० ॥

अव्यक्तरेखनखरैर्गलावधि मुहुर्मुहुः।
रोमाञ्चहेतु सुखदं नखचाटुसमाचरेत् ॥ ६१ ॥

स्फोटमुष्टिप्रहरणपूर्वकं कचकर्षणम् ।
प्रहारोऽष्टविधः सोऽपि प्रधानाङ्गं रते मतम् ॥ ६२ ॥

अपहस्तः समतलो मुष्टिः सन्दशिका तथा ।
कुट्टितं विद्धकं चैव प्रसृतं शब्दकर्त्तरी ॥ ६३ ॥

सर्वाङ्गुली समाकुञ्च्य विनाङ्गुष्ठेन याहतिः ।
अपहस्तसमतलमुष्टी स्पष्टे प्रकीर्त्तिते ॥ ६४ ॥

समाकुञ्चोत्तरा मध्या तर्जनीभ्यां तु ताड़नम् ।
यत्तु सन्दशिकां प्राहुः केचन त्रोटिकामिति ॥ ६५ ॥

अङ्गुष्ठाग्रेण मध्याग्रं धृत्वा यत्तत्तु कुट्टितम् ।
मध्योन्नताभिः सर्वाभिर्युक्ताभिस्तद्धि विद्धकम् ॥ ६६ ॥

विरलाङ्गुलिमुष्टचा यन्मूर्ध्नि तत् प्रसृतं मतम् ।
ऋज्वङ्गुलिकराग्रेण शब्दकर्त्तरिकेति तत् ॥ ६७ ॥

स्तनमध्येऽपहस्तश्च मुष्टिः पृष्ठनितम्बयोः ।
तथा समतलं कटचाविद्धकं हृत् कपोलयोः ॥ ६८ ॥

शिरोऽलिनकपोलेषु कुट्टितं पार्श्वगण्डयोः ।
देय सन्दशिका शीर्षे प्रसृतं शब्दकर्त्तरी ॥ ६९ ॥

भगगर्भस्य मध्ये तु नाड़िका लिङ्गरूपिणी ।
मर्दिता साङ्गुलिभ्यां चेत् सूते कामजलं वहु ॥ ७० ॥

नासिकानाड़िकायाश्च वहिःस्था विवराश्रिता ।
तस्याः कुर्यान्मर्दनं चेद्भवेत्स्त्री कामवातुला ॥ ७१ ॥

स्तनयोर्युगलं चैव भगनासां च नाड़िकाम् ।
जघनोरुनितम्बांश्च मर्दयेन्मदकामुकः ॥ ७२ ॥

अधरौष्ठेन संपीडच नायको नायिकाधरम् ।
पिवेज्जिह्वोपचारेण संलग्नदशनं सुखम् ॥ ७३ ॥

शिश्नस्य वाऽथ योनेर्वा तुषणं लेपनं तु यत् ।
तदौपरिष्टकं नाम कुरुते गुरुरागतः ॥ ७४ ॥

यत्र स्त्रीलिङ्गमाकांक्षेत् पुरुषो रतिमन्दिरम् ।
लिङ्गे भगे मुखन्यासाद् भवेदुभयशीशकम् ॥ ७५ ॥

षण्डाश्च दाक्षिणात्याश्च कर्मैतद्रागवृद्धये ।
कुर्वन्ति तद्गर्हितत्वान्नो विविच्य प्रकाशितम् ॥ ७६ ॥

ऋतं च तत्र मत्तस्य दात्यूहस्यैव प्रावृषि ।
कपोतस्येव लावस्य पिकहारीतयोरिव ॥ ७७ ॥

पतत्येव दरस्येव जले प्रस्फुटतोऽनले ।
कीचकस्येव तुरगह्लेषितस्येव शस्यते ॥ ७८ ॥

समं नीचं नीचतरमुच्चमुच्चतरं तथा ।
वात्स्यायनेन मुनिना रतं पञ्चविधं मतम् ॥ ७९ ॥

सममुत्तममाख्यान्ति नीचमुच्चं च मध्यमम् ।
तथा च नीचमत्या च प्रथमं परिकीर्त्तितम् ॥ ८० ॥

समं नलिन्याः शशके रतमुच्चं मृगेवृषे ।
तथोच्चतरमाख्यान्ति हये वात्स्यायनादयः ॥ ८१ ॥

समं मृगे तु चित्रिण्या रतमुच्चं वृषे मतम् ।
तथोच्चतरमश्वे तु शशके नीचमुच्यते ॥ ८२ ॥

वृषे समानं शंखिन्यास्तथोच्चं तु हये रतम् ।
मृगे नीचं विजानीयात्परं नीचतरं शशे ॥ ८३ ॥

समं हये तु हस्तिन्या नीचं स्यात् वृषभे मृगे ।
तथा नीचतरं ज्ञेयं शशे निधुवनं ननु ॥ ८४ ॥

यदा न योषिता प्रीता[१] रतवैषम्यतः प्रिये ।
तदान्यं पुरुषं यान्ति वैराग्यात्तत्र तत्क्षणात् ॥ ८५ ॥

---

१ । प्रीति

तस्माद्बन्धविशेषैश्च कृत्रिमैः साधनैरपि ।
कचक्रीड़ादिभिस्तासां प्रीतिं कान्तः समाचरेत्[1] ॥ ८६ ॥

शीघ्रवेगो मध्यवेगश्चिरवेग इति त्रिधा ।
सुरते रज्यते नार्य्यं साम्याद्युत्सर्ग एष हि ॥ ८७ ॥

प्रायशश्चिरवेगे तु नरे नार्य्या नु रज्यते ।
क्षतश्चिरेण कण्डुतिस्तासां नाशं समेति च ॥ ८८ ॥

अवसाने साभ्यसूया शीघ्रवेगनरे स्त्रियः ।
प्रियस्तस्मादुपायेन सुरते चिरमाचरेत् ॥ ८९ ॥

प्रायः समरते नारी करोत्यूरुयुगं समम् ।
संघट्टयति नीचे तु उच्चैर्विस्तारयत्यपि ॥ ९० ॥

उरुश्लेषो मुहुर्मामाकारो हुंकृतीशीत्कृती ।
रोदनं स्तनितं नार्य्याः सुखसान्निध्यसूचकम् ॥ ९१ ॥

मूर्च्छनामीलनं चाक्ष्णोश्च्युतिकालस्य लक्षणम् ।
अङ्के स्वेदः श्लथत्वं च वृत्ते च्युतिमुखे भवेत् ॥ ९२ ॥

असमाप्तसुखा कान्तं हन्ति हस्तं धुनोति च ।
उज्झितुं न ददात्येव विधत्ते वा प्रतिक्रिया ॥ ९३ ॥

नातिस्थूलां च गर्भार्त्तां न बालां नातिदुर्बलाम् ।
नातिप्रसूतां वनितां प्रयुञ्ज्यात्पुरुषायिते ॥ ९४ ॥

प्रदीपहीने भवने बालां नवरतां भजेत् ।
नागरीं तरुणीं प्रौढ़ां वेश्यां दीपाद्यलंकृते ॥ ९५ ॥

अन्यासक्तमनाः कान्तश्चिरं नारीं दृढं भजेत् ।
अस्याश्च्युतिसुखं ज्ञात्वा निजं बीजं ततो वपेत् ॥ ९६ ॥

त्यक्तबीजोऽपि तां गाढ़मालिङ्ग्य भगमेहनः ।
तिष्ठेत्केलिकलालापैर्यावन्नोदेति तन्मदः ॥ ९७ ॥

---

१ । समाहरेत्

इत्थं यो रमते नारीं सा मृतापि न तं त्यजेत् ।
न तत्र मन्त्रभैषज्ये न धनं नापि सेवनम् ॥ ९८ ॥

मासैकसूता षण्मासगर्भिणी श्लथविग्रहा ।
नवरजोवती पुष्पस्नानाऽतिरतिसौख्यदा ॥ ९९ ॥

अथ कृत्रिमलिङ्गानि करक्रीड़ादिकानि च ।
व्यवाये मुख्यहेतूनि योषितां नात्र संशयः ॥ १०० ॥

नानाविधैः रतिशतैः स्त्रीणां नो जायते रतिः ।
तथा यथा भगान्तस्थनाड़ीभेदोपमर्दनात् ॥ १०१ ॥

तस्मात्कृत्रिमलिङ्गाद्यैस्तावत् क्षोभं समाचरेत् ।
यावत् कण्डूपशमनं स्त्रीणां नैव रते भवेत् ॥ १०२ ॥

चर्मणा दारुणावापि ताम्रलोहादिभिः शुभैः ।
श्लक्ष्णैः कृत्रिमलिङ्गानि योनितुल्यानि कारयेत् ॥ १०३ ॥

प्रोक्तः करिकरः पूर्वं फणिभोगः स्त्रीशूलकम् ।
मध्यन्यकं च कनकं करक्रीड़ा तु पञ्चधा ॥ १०४॥

सर्वाङ्गुल्यः समायुक्ता योनिमध्यकृतभ्रमाः ।
रुजुप्रवेशिता हस्तीहस्त इत्यभिधीयते ॥ १०५ ॥

अङ्गुल्यः संहतास्तिस्रः कनिष्ठाङ्गुष्ठवर्जिताः ।
फणिभोगा इति ख्यातो विरतस्तास्त्रित्रिशूलकम् ॥ १०६ ॥

तर्जनी मध्यमाक्रान्ता मध्यन्यकमिति स्थितिः ।
देशिन्येकैव कनकं नवोढ़युवतिप्रियम् ॥ १०७ ॥

अत्राद्य त्रितयं तावत् प्रौढ़ायाः प्रीतिवर्द्धनम् ।
मध्यन्यकं तरुण्याश्च वालायाः कनकं मतम् ॥ १०८ ॥

करणानि रते पञ्चभवत्युत्तानकं तथा ।
पार्श्वस्थमुपविष्टं च स्यादधोमुखमूर्ध्वकम् ॥ १०९ ॥

ग्राम्यं नागरकं चैव भग्नकं वेष्टितं तथा।
जृम्भितं सारितं कर्कटकं बेणुविदारितम् ॥ ११० ॥

पद्मासनं नागपाशः सम्पुटः कच्छपोऽपि च।
उत्तानकरणान्याहुर्द्वादशैतानि तद्विदः ॥ १११ ॥

उत्तानिताया युवतेरूरुकान्तोरुसन्धिगौ।
ग्राम्यं तदा बहिर्यातौ तदा नागरकं मतम् ॥ ११२ ॥

यदा श्लिष्योर्ध्वगौ योषिदुरूसंरमते पतिः।
भग्नकं तद्भुवेत्ताभ्यां वेष्टितो वेष्टितं मतम् ॥ ११३ ॥

पुंस्कन्धस्थं यदा पादद्वयं तज्जृम्भितं मतम्।
अनयोर्वैपरीत्येन भवेत् बेणुविदारितम् ॥ ११४ ॥

एकं यदा तत्र परं प्रियोरुस्थं तु सारितम्।
तौ यदा प्रियनाभिस्थौ कर्कटं परिकीर्त्तितम् ॥ ११५ ॥

तज्जानुमध्यविद्धाभ्यां दोर्भ्यां कण्ठतटं स्त्रियाः।
आलिङ्ग्य रमते कान्तः पद्मासनमितीरितम् ॥ ११६ ॥

स्वजानुमध्यविद्धाभ्यां दोर्भ्यां स्वं कण्ठमङ्गना।
श्लिष्येत्प्रियोऽपि तां श्लिष्येन्नागपाश इतीरितः ॥ ११७ ॥

मुखे मुखं यदा बाहू बाह्वोर्जंघे च जंघयोः।
वक्षोवक्षोजयोर्द्वाभ्यां रमते स तु कच्छपः ॥ ११८ ॥

यदा कान्तः स्वजंघाभ्यां स्त्रीजंघे सम्पुटे रते।
लब्धाभिरमते गाढ़ं स बन्धः संपुटो मतः ॥ ११९ ॥

परिघः परिघार्द्धं च परिघा द्रुतमेव च।
तथा सन्दशिका पार्श्वकरणं स्याच्चतुर्विधम् ॥ १२० ॥

द्विगुणीकृतजंघास्त्री तिर्य्यक् सुप्ता समुत्थितः।
जंघोरुमध्यगः कान्तो रमते परिघो हि सः ॥ १२१ ॥

क्षत्वैकचरणं नार्या रुजुकृत्वा परं नरः ।
द्विगुणीकृत्य हस्तेन रमते परिघार्द्धकम् ॥ १२२ ॥

कान्तायाः परिघे पादमेकं स्कन्धे निधाय च ।
पश्चाद्‌बाहु कृतालम्वो रमते परिघाद्ध ुतम् ॥ १२३ ॥

तिर्य्यक् शयानयोः स्यातां जंघे तिर्य्यक् प्रसारिते ।
कृतालिङ्गनयोर्यस्मिन् सा तु सन्दशिका मता ॥ १२४ ॥

भुजपञ्जरकं स्कन्धपल्लवं गलबन्धनम् ।
एकहस्तं चोपविष्टं करणं स्याच्चतुर्विधम् ॥ १२५ ॥

बहिः स्त्रीजानुयुगलं नरो जानुद्वयेन यत् ।
करोत्यन्योन्यमाश्लिष्य तदेव भुजपञ्जरम् ॥ १२६ ॥

स्कन्धे कृत्वा पदं चैकं पृष्ठेऽवष्टभ्य पाणिना ।
उपविष्ट स्त्रियं कान्तो रमते स्कन्धपल्लवम् ॥ १२७ ॥

नार्य्या जानुद्वयं वध्वा करौ तत् पृष्ठसंगतौ ।
कृत्वा स्त्रीलम्वितगलो रमते गलबन्धनम् ॥ १२८ ॥

यत्रोपविष्टामालिङ्ग्य पाणिनैकेन सुन्दरीम् ।
योनावन्येन पुंलिङ्गक्षेपणादेकहस्तकम् ॥ १२९ ॥

धैनवं गार्द्धभं चैव तथैणं करकज्वलम् ।
चत्वारि करणन्याहुरधोमुख्याः समागमे ॥ १३० ॥

उत्थिताधोमुखी नारी धेनुवत् संस्थिता यदि ।
उर्ध्वस्थितोऽभिरमते नरस्तद्धैनवं मतम् ॥ १३१ ॥

जानुविन्यस्तहस्तायाः कटिमुत्तोल्य योषितः ।
स्कन्धमालम्व्य रमते पुमान् तद्‌गार्द्धभं मतम् ॥ १३२ ॥

अधोमुख्यामुखं यत्नाद्विधायात्ममुखोन्मुखम् ।
यन्नरो रमते पश्चात्तदैणकरणं मतम् ॥ १३३ ॥

नितम्बं दूरमुत्थाप्य करार्पितमुखौ नरः ।
स्तनावादाय हस्ताभ्यां रमते करकज्जलम् ॥ १३४ ॥

लम्बितं व्यायतं चैव द्वितलं जानुसंग्रहः।
इत्युर्ध्वकरणानीह प्राहुश्चत्वारि सूरयः॥ १३५॥

उर्ध्वस्थः स भवेत्पुंसः कामिनी कण्ठलम्बिनी।
उरुभ्यां कटिमावेष्टय रमते लम्बितं मतम्॥ १३६॥

कृत्वैवं पुंस्कटावेकं परं पादं क्षितौ यदि।
प्रियकण्ठे समाश्लिष्य रमते व्यायतं मतम्॥ १३७॥

उर्ध्वगस्य यदा पुंसो हस्तन्यस्तपदद्वया।
तत्कण्ठलम्बिनी नारी रमते द्वितल तु तत्॥ १३८॥

उर्ध्वस्थितस्य हस्ताभ्यां धृतजानुद्वया यदि।
तत्कण्ठलम्बिनी नारी रमते जानुसंग्रहः॥ १३९॥

बन्धाश्चतुषष्टिमताः सन्ति शास्त्रेषु यद्यपि।
सारमाकृष्य कथितं किञ्चिद्यत् पुंस्त्रिविस्तरः॥ १४०॥

कुष्ठलोध्रतिलैरातिद्वयसिद्धार्थसंयुतैः।
लिप्ताङ्गं क्षालयित्वा च कान्तिसौभाग्यमाप्नुयात्॥ १४१॥

गुड़त्वग्जातिपत्रैलानखस्वर्णीकृतावती।
ताम्बूलगर्भाचेद्भुक्ता सुवासं कुरुते मुखम्॥ १४२॥

चूर्णं विदार्या स्वरसैर्भावितं सूर्य्यरश्मिभिः।
मध्वाज्य मिश्रं चेद्भुक्ते रमते रमणीशतम्॥ १४३॥

शतावरी नागबला बला गोरक्षगोक्षुराः।
चूर्णान्यमीषां पयसा पीत्वा याति शतं स्त्रियः॥ १४४॥

निहितः पारदः श्वेतशरपुंखाजटान्वितः।
मध्य एक करञ्जस्य मुखस्थो वीजधारणम्॥ १४५॥

अङ्गुल्या दृतमापीड्य वृषणाधोगतां शिराम्।
जयति च्युतिमन्यत्र शक्त्या वा कुम्भकेन वा॥ १४६॥

वृषदं सस्य कृष्णस्य अस्थि दक्षिणपार्श्वगम् ।
बद्धं कटितटे पुंसं वीजच्युतिनिवारणम् ॥ १४७ ॥

रक्तापामार्गमूलं तु सोमवारेऽभिमन्त्रितम् ।
भौमे प्रातः समुद्धृत्य कटीबद्धं तु वीर्यधृक् ॥ १४८ ॥

माहिषं गोघृतं चैव शैवालेन विमिश्रितम् ।
एभिर्विलेपो मासेन स्थूललिङ्गकरो नृणाम् ॥ १४९ ॥

वचा गजकणाकुष्ठाश्वगन्धेभबला बला ।
कुर्य्युर्मुषलवल्लिङ्गं नवनीतेन लेपतः ॥ १५० ॥

शितार्ककुष्ठमञ्जिष्ठा स्वाङ्गरक्तवचाम्वुदैः ।
कृत्वा ललाटे तिलकं त्रिलोकी वशमानयेत् ॥ १५१ ॥

नृकपाले महाष्टम्यां श्मशाने निशिपातितम् ।
कज्वलं कटुतैलेन त्रिलोकीं वशमानयेत् ॥ १५२ ॥

कृष्णोत्पले श्वेतकाकजंघापक्ष्यौ तथालिनः ।
तगरं च भवेद् दासी यस्या शोर्षे पतेद्रजः ॥ १५३ ॥

स्त्रीसव्यपादं यो लिम्पेद्रतान्ते सव्यपाणिना ।
स्वरेतसा सा भवति वद्धा दासीव तस्य तु ॥ १५४ ॥

तिलतैलं दाड़िमस्य वल्यां सिद्धं कुचे यदि ।
दद्यान्त्यलेन तस्या स्यात्पतितस्यापि चोन्नतिः ॥ १५५ ॥

माहिषं त्रिषणं कुष्ठं हयगन्धा च पिप्पली ।
वचा वृद्धिकरोलेपः स्तनयोः कर्ण्णयोरपि ॥ १५६ ॥

ज्योतिष्मतीपत्रजवापुष्पे पिष्ट्वा गृहाम्वुना ।
या पिवेत्सप्तदिवसं पुष्पेत्तस्याः स्मरालयः ॥ १५७ ॥

दूर्वां सतण्डुलां पिष्ट्वा समभागां कृशानुना ।
पक्त्वा यात्ति प्रणष्टं सा पुनः पुष्पं च विन्दति ॥ १५८ ॥

निम्ववल्या कषायेण क्षालितं धूपितं ततः ।
गुग्गुल्यगुरुरात्रिद्विधूपैर्भर्त्तुः सुखं भगम् ॥ १५९ ॥

मधुसिन्दूरचिञ्चाभिर्लिप्तं मदनमन्दिरम् ।
रेतः श्रुतं वितनुते प्रसङ्गात्तरसा रसात् ॥ १६० ॥

उष्णोदकं तथा तालं चूर्णं पालाशभस्म च ।
भगे लिप्तानि तरसा लोमशातकराणि च ॥ १६१ ॥

देवदारुनिशाद्यय्य सरसीरुहकेशरैः ।
समभागैः प्रलेपोऽयं योनिसंकोचमाचरेत् ॥ १६२ ॥

मूलं शिखां[1] लक्ष्मणाया निधाय त्रिदिनं जले ।
पीत्वा क्षीरानुपानेन धत्ते गर्भमृतौ वधूः ॥ १६३ ॥

धुस्तूरमूलकं पुष्पे गृहीत्वा कटिसंस्थितम् ।
गर्भं निवारयत्येव रण्डावेश्यादियोषिताम् ॥ १६४ ॥

धात्र्यञ्जनं यष्टिलोध्रं त्र्यहं सप्ताहमेव वा ।
निपीय पयसा गर्भं स्तम्भाति चलितं वधूः ॥ १६५ ॥

पीत्वा कञ्जिकयागारधूमसूते वलावलात् ।
अथवा लम्वुषामूलं कटीतटगतं यदि ॥ १६६ ॥

गुञ्जामूलयुगं पुष्ये रवावुत्पाट्य मूर्द्धनि ।
कट्यां वा नीलसूत्रेण वध्वा सूते द्रुतं वधूः ॥ १६७ ॥

लोध्रं सगोक्षुरतिलसूनं पिष्ट्वा गवां घृतैः ।
लिप्ताः सप्ताहतः केशा दीर्घाः स्युः प्रचरा अपि ॥ १६८ ॥

गवाज्यपिष्ठभृङ्गर्णैर्नीलीपिप्पलिसैन्धवैः ।
सप्ताहलिप्ताश्चिकुराः कृष्णाः स्युर्विशदा अपि ॥ १६९ ॥

वचाधान्यकलोध्राणां लेपो हन्ति वरण्टकम् ।
यथा गोरोचनायुक्तमरीचेन विलेपनम् ॥ १७० ॥

१। शिखां वा

नवनीतगुढ़क्षौद्रैर्मूली मज्जारसैर्युतः ।
मुखरोगं हरेल्लेपः शर्ण्णं नवं यथा ॥ १७१ ॥

कुष्ठचूर्ण्णं मधुघृतमिश्रं योऽश्नाति च प्रगे ।
स मातङ्गबलो वाग्मी चिरायुर्बुद्धिमान् भवेत् ॥ १७२ ॥

योऽत्ति शुण्ठि यवक्षारमिश्रं प्रातर्घृतान्विताम् ।
न शाम्यति क्षुधा तस्य शुण्ठि वा तप्तवारिणा ॥ १७३ ॥

अविरतपरिरम्भारम्भविश्रम्भशालि-
प्रवलसुरतकेलिव्याकुलानां तनूनाम् ।
अतिशयकृशया वा तामसी प्रान्तशंसी-
ननु तदनु विशेषः प्रादुरासीत्प्रकाशः ॥ १७४ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये
सुरतवर्ण्णनं नाम अष्टादशः सर्गः ।

ऊनविंशः सर्गः

अथ तुहिनकरोगताबलम्बे गगन[१] तलेऽतिभृशं निशां भ्रमित्वा ।
चरमशिखरिणस्तटं पटीयो झटिति चचाल किमु श्रमाभिभूतः ॥ १ ॥

प्रकटतरकलङ्कसङ्कटं तद्वपुरभवन्महिकारुचस्तदानीम् ।
कुसुमशरशरावलीविदूनावयवजुषां सुदृशां भृशं वधाद् वा ॥ २ ॥

सपदि सरसिजोदरान्तराले मधुकरसंहतिराततान चाक्षौ ।
अभिपतितुमना घनप्रमोदात्क्वचिदपि यन्न विपद्ध्रुवापि सम्पत् ॥ ३ ॥

अजनि तदनु तत्क्षणं सदोषा परिवृत उत्कटपाण्डुताततााङ्कः ।
अहह हतधिया मयार्जितं किं किमिति विनाश्य तनूरिवाति भीतः ॥ ४ ॥

सपदि जहुरथो निजाधिनाथं विरलतरा अपि तारकानि कामम् ।
वत किमुतमुदीक्ष्य वारुणाच्छं रतिरसुखा क्षणभङ्गुरानुरागे[२] ॥ ५ ॥

हरिहरचरिताचितं च गीतं तदनु गृहेष्वपि मानवाधिपानाम् ।
सुललिततर बन्धसुन्दरं तत्प्रतिहरितं मुरवैरिलालसानाम् ॥ ६ ॥

अमृत लव इव श्रव प्रपेयः किमु गरलं कुलपालिकाजनानाम् ।
सरभसपरिरम्भसंभृतानां शयनजुषां भृशमाविरास हारि ॥ ७ ॥

जगदपि च तदा ससार मन्दं विकसितपङ्कजकोषगन्धबन्धुः ।
वत पुरुषरतोद्धतोत्तमानां कुचतटसंकटपातजातखेदः[३] ॥ ८ ॥

सरभसमथ दिक्षु दिक्षु रुक्षः कलिमहाकुक्कुटकण्ठ आविरासीत् ।
अतिशयरतिशालिदम्पतीनां किमु तरसा रचितोऽभिचारमन्त्रः ॥ ९ ॥

गलविलगतजीविते तु मृत्युञ्जयमिव सूक्तिमतीव लोकलोके ।
शितमहसि भृशं नियोजिता वा विरहिजनैः किमु घोरमारणार्चा ॥ १० ॥

१। गगक   २। युग्मकम्   ३। त्रिभिः कुलकम्

किमु सरसिजकोषमध्यबद्धभ्रमनिकाय विमुक्तसूक्तमालाः ।
हरिहरिदवलाप्रयुक्तमुच्चाटनमिव मन्त्रपदं खगेऽध्वनीने[1] ॥ ११ ॥

अहह समय एव सर्वगर्वंकष इति पण्डितमण्डली वचो यत् ।
उचितमिदमहो न संशयोऽस्मिन् यदमृतभानुरयं मनोज्ञमूर्त्तिः ॥ १२ ॥

वत गत उपमानतां तु येषां विपुलसुखानि मुखानि तान्यपीह ।
अतिविततनुतप्रभावितानैस्तमपि हसन्ति भृशं निशावसाने ॥ १३ ॥

अनवरतरतप्रतापभाजो मनुरजनि प्रतिमल्लदम्पतीनाम् ।
अपि हृदयगतो निशान्तशंसी पटहरवः शयनासनायनाभ्यत्[2] ॥ १४ ॥

अजनि ननु समन्ततः स कालो वहुविधसाधन एक एव सत्यम् ।
कविरभिनवकाव्यजातचेताः समजनि बुद्धविवृद्धसिद्धिमेत्य ॥ १५ ॥

मुरहरचरणारविन्दमाध्वीरसनिरताः किल वैष्णवद्विरेफाः ।
कुसुमशरशरावलीवलीतागतदयिता वत रोदनं समीयुः ॥ १६ ॥

धरणिसुरगणा विधिप्रणीते हवनविधौ विधिवन्मनांस्यदुस्ते ।
गृहविधिमवकृत्य गन्तुकामान् वत दयितान् प्रमदाः समीक्ष्य तेषु ॥ १७ ॥

तदनु रजनिवल्लभा निजेशं सपदि तथाविधवृत्तिमीयिवांसम् ।
चलिततुहिनलोतकानि कामं किमु तमुदीक्ष्य रुरोद पक्षिरावाम् ॥ १८ ॥

मुरहरचरणप्रणीतगीतावलिललितं दधिमन्थनानुनादम् ।
अतिशयवलमानखिन्ना झटिति निशम्य भृशावशा तु काचित् ॥ १९ ॥

सपदि विपरिवृत्य खिन्नखिन्ना कथमपि मारशरावलीवलीता ।
निधुवनविधिमाधुरीधुरीणातिरभसं परिसस्वजे तदानीम् ॥ २० ॥

चरमगिरिदरीं निशाधिनाथः सरभसमेष चोलशीर्णशोभः ।
रजनिवनितयारतान्ततान्तः किमु शयितुं सदने मनोविनोदे ॥ २१ ॥

तमसि वत गते तता प्रदीपावलिरपि सातिमलीमसा वभूब ।
स्फुरति यद्युगमयन्नितान्तं तदुपगमे ननु तस्य भा कुतः स्यात् ॥ २२ ॥

---

१ । युग्मकम्   २ । त्रिभिः कुलकम्

सपदि कुमुदिनी मलीमसं स्वं मुखमसुखं समलोचयत्तदानीम् ।
निजदयिततमं सुधानिधानं किमु तमुदीक्ष्य गलद्वसुप्रसूतिम् ॥ २३ ॥

दिशिदिशि तरसा नगानुगानामुदचरदारव आततः खगानि ।
क्व वत दयित आहतः व्युत्पन्नः खगा इति मार्गयतामिवातिवेलम् ॥ २४ ॥

ननु रजनिरसौ गता वतास्तं निजदयिताऽखिल तारकाश्च ताराः ।
इति किमु तरसा निशाधिनाथश्चरमसरित्पतिमध्यमाससाद ॥ २५ ॥

तदनु च भूवनानि तानि रक्ताश्वगनगपर्वतसिन्धुबन्धुराणि ।
किमरुणकरवाणभिन्नघोरान्धतमसराक्षसरक्तरञ्जितानि ॥ २६ ॥

ननु तदनु सुचारु वासवाणामुखतुलं सविकासमाविरास ।
प्रियतममसहद्युतिं प्रवासादुपगतमेत्य गतं स्मितं किमस्य ॥ २७ ॥

अरुणमरुणविग्रहं समीक्ष्य क्षणमपि सोमगणः स्थितिं न लेभे ।
सरुषमथ रिपुं समीक्ष्य साक्षात्कथय जना कथमासतेऽसहायः ॥ २८ ॥

विधिवदुपहृतं हुतं तदानीं प्रयतधरासुरसंचयैश्चचाम ।
सरभसमधिकृत्य सामिधेनीं प्रतिशरणं करुणाकरः कृशानुः[1] ॥ २९ ॥

अथ सरभसमाविरास भास्वान् किमु हरिणहेषहूतिविस्किराणाम् ।
प्रचलदसुजुषां भृणं सचिन्तामणिरिव शोकविमोकहेतुभूतः ॥ ३० ॥

करतलकलितप्रसारिरक्षोहणपयसां तरसा धरासुराणाम् ।
वृजिनवनविनाशहेतुभूतः परिवितततः किमु मूर्त्ति आश्रयासः ॥ ३१ ॥

सततकुमुदबान्धवप्रसर्गातप्रवलकरप्रकरप्रतापभाजः ।
गलदलिकुलकैतववादिवाम्भोरुहविपिनस्य विशल्यकारितापुः ॥ ३२ ॥

किमु हरि हरिदङ्गनाविलोलप्रवलललाटतटस्थरक्तभक्तिः ।
उदयशिखरिणः समग्रचूडामणिरिव तारतरः शिरप्रदेशे ॥ ३३ ॥

विपुलतमतमः समुच्चयारिप्रकरनिरन्तरसंतिरोहितानाम् ।
किमु सकलदृशां विपत्तिमुग्धं प्रविततमूलघनं मनाविनोदि[2] ॥ ३४ ॥

---

१ । पञ्चभिः कुलकम् २ । खण्डिता पञ्चकम्

अयि दयित मनोमुदे जनानां भवसि विभूषणलेशदूषितोऽपि ।
मदनकदनदश्रियानवास्या कथय कथं तव नाथ भूषितः सन् ॥ ३५ ॥

तरुणमरुणवेशहासिदासः सुघटकटोतटलम्पटिस्त्वयीदम् ।
खरतरनखरक्षतोरुलक्ष्मीदशनपदानि च हन्ति कान्तिवन्ति ॥ ३६ ॥

उरसि सरसरागयावकोत्थपदतललक्ष्म च सूक्ष्मरेखमेतत् ।
मसृणभुसृणपङ्कसंक्रमोऽयं निखिलजनस्य मनोविनोदभूमिः ॥ ३७ ॥

अहितयुवतिसंप्रणीतमेतद्वत समुदीक्ष्य धवे निगद्य चेति ।
विषविषममनोऽतिमानशल्यं गलितविलोचनलोतकां निकामम् ॥ ३८ ॥

गुरुतरपरितापखिन्नखिन्नां श्वसनचलदशनच्छदां तदानीम् ।
सरभसमवशां प्रयातुकामां हसनथ कश्चन काञ्चनालिलिङ्ग[1] ॥ ३९ ॥

अतिशयशशितापखिन्नखिन्नं करनिकरैः खरदीधितिर्नलिन्याः ।
दयित दयित आततैस्तदानीं मुखमसुखं सममार्जयत्प्रकामम् ॥ ४० ॥

अथ गगनमलंचकार तारं खरतरदिधितिरेष मन्दमन्दम् ।
किमु रजनीकरोदरप्रणीतं जगदिदमिक्षितुमस्ति वा नवेति ॥ ४१ ॥

ज्वलति किरणमानिनी प्रकामं मुदमुदगान्नच कौशिकः परं तु ।
स्फुरति सुकृतभाजने जनेऽशोहा कथं ननु पापिनां प्रवृत्तिः ॥ ४२ ॥

अथ खरतर भानोर्भानुभीरक्तसानो
ननु समुदयमेत्यात्यन्तसंभ्रान्तचित्तः ।
जननिकर उदारोऽन्योऽन्यमाहूय धन्यः
कृतगुरुतरपुण्य प्रादुरासीदगण्यः ॥ ४३ ॥

सपदि निरघयात्रावीक्षणोद्भ्रान्तनेत्रा
दयितदयितपुत्रानाशुयुक्त्वा स्वकार्ये ।
झटिति निजनियोज्यैः सन्नियुक्ताः सुनेत्रा
अथ सदनविधाने दत्तचित्ता बभूवुः[2] ॥ ४४ ॥

---

१ । काञ्चनालिलिङ्गम्

२ । चतुर्भिः कुलकम्

कलय किल कलापं लोलनेत्रे विचित्रं
व्युपहर तरसा मे काशनीकाशवासः ।
उदयशिखरिशृङ्गाभ्यर्णतः स्वर्णवर्णे
सरसपिशुनभासो भानवो भाति भानोः ॥ ४५ ॥

तनयनयनिकामं वामताऽद्यापि विद्वन्
कलय दधति तापं भानेवो भानवीयाः ।
दयितदयितयाते नास्ति विन्नस्तचेता
अभवमहमिदानीं किं विधेयं विधेहि ॥ ४६ ॥

सरत सरत वासादित्थमासीद् विशेषो
ननु सकलजनानां तन्वि कोलाहलोऽयम् ।
सरति सरति बन्धुर्नित्यकर्मात्तचित्तः
सहचरि परितप्ता त्वं च किम्वा विधेयम् ॥ ४७ ॥

इति विविधविवादाः प्रादुरासन्विशेषा
अनुगृहमनुमार्गं मानवानां तदानीम् ।
सुरुचिरपुरवैरिप्रोल्लसत्पादपाथो-
रुहयुगलविशेषप्रेक्षणानन्दहेतोः ॥ ४८ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये प्रभातवर्णनं नाम
ऊनविंशः सर्गः ।

त्रिंश: सर्ग:

पूर्वपर्वतमूर्द्धानमारोहति दिवाकरे।
नवेक्षणेक्षणमना जनताजनिसर्वत: ॥ १ ॥

एकाक्षरा यथा ॥ छन्द उक्था ॥ १ ॥

खेऽभूद्भाश्री: ॥ २ ॥

द्व्यक्षरा यथा ॥ छन्दोऽत्युक्था ॥ २ ॥

वेशेऽभूषा: ॥ स्त्रीलोकानाम् ॥ ३ ॥

त्र्यक्षरा यथा ॥ छन्दो मध्या ॥ ३ ॥

नारीणां या शोभा। आसीत्क्ष्माहृत्कलोभा ॥ ४ ॥
ता मृगीलोचना:। प्राद्रवन् द्राक्सदा ॥ ५ ॥

चतुरक्षरा यथा ॥ छन्द: प्रतिष्ठा ॥ ४ ॥

लोलच्चेला राजत्ताला। कन्या धन्या अप्यासस्त्रु: ॥ ६ ॥
अपि सतीजनतति:। अतिरसाद् बहिरभूत् ॥ ७ ॥

पञ्चाक्षरा यथा ॥ छन्द: सुप्रतिष्ठा ॥ ५ ॥

भूसुरपङ्क्तित: प्रोज्झितकर्मा। आशु चचाल स्मेरमुखश्री: ॥ ८ ॥
रुचिरा: प्रियावदनश्रिया। तरसा रसादभितो ययु: ॥ ९ ॥

षड़क्षरा यथा। छन्दोगायत्री ॥ ६ ॥

का चित्तनु मध्या यत्नाहितनेत्रा। पुत्रानपि पत्यौ दत्त्वाभिययौ द्राक् ॥ १० ॥
रतिसदनानां शशिवदनानाम्। नवमह आसीन्मतिरतिनम्रा ॥ ११ ॥
तनूनां तदानीं मृगानीह रेजु:। गता भूतलं वा तता सोमराजी ॥ १२ ॥

सप्ताक्षरा यथा ।छन्द उष्णिक् ॥ ७ ॥

अहमवहितहृत्कुवलयनयने। विगलितवलयं कलय मधुमति ॥ १३ ॥

तदङ्कमट तूर्णं कुमारललितासाम् ।
मुरारिचरणाब्जे परीतहृदयाऽहम् ॥ १४ ॥

प्राणेश त्वर गन्तुं संप्राप्ता मदनलेखा ।
कर्णाभ्यां समुदीर्णाः प्रोत्कीर्णा घननादाः ॥ १५ ॥

अष्टाक्षरा यथा ॥ छन्दोऽनुष्टुप् ॥ ८ ॥

जगादसादरं परां परोमया दयानिधे ।
प्रमाणिकाचलाऽवले जनो घनोऽधुनाजनि ॥ १६ ॥

माणवकाः केलिपराश्चारुतराः कदुकराः ।
आशुययुश्चक्रधरे न्यस्त्यक्तभिय ॥ १७ ॥

वल्गच्चेला राजत्ताला तूर्णं तत्रामन्यानन्दाः ।
कुन्दस्मेराः सस्त्रुर्वाला विद्युन्मालाः किम्वा लोलाः ॥ १८ ॥

लोक एष सन्निवेश शून्य एति याति पश्य ।
हंसमानि कामया हि केशवाय याहि तन्वि ॥ १९ ॥

केशव नाम सभूद्यन्मङ्गलघोषपरीताः ।
रेजुरथो जनतायाश्चित्रपदास्तुतिवादाः ॥ २० ॥

नवाक्षरा यथा ॥ छन्दो वृहती ॥ ९ ॥

अवकरभरयुक्ता साभुजङ्गशिशु सृता क्षोणी ।
तदिह मम समीपं[1] सहचरि तरसा याहि ॥ २१ ॥

आहर कान्ते सारतरं तं मणिमध्यं सारतरम् ।
भूरिविभूषा चातिघने सुन्दरियुक्ता नेहजने ॥ २२ ॥

अपरा कुरङ्गलचना तरसा भुजङ्गसङ्गता ।
क्षणं दत्तहृत्क न वर्त्तितुं न च गन्तुमिच्छति क्षणम् ॥ २३ ॥

दशाक्षरा यथा ॥ पङ्क्तिछन्दः ॥ १० ॥

रूपवती काचिद्गतमित्रा तत्क्षणसंत्यक्तप्रियपुत्रा ।
त्रस्तकुरङ्गव्याकुलनेत्रा चिरादथो हृन्याहतयात्रा ॥ २४ ॥

१। ममसीगंत्वम्

काचित्कालागुरुवरभाला कामोन्मत्ता: सुरुचिरचेला ।
लक्ष्मीकान्तागमशुभवेलां तस्थौ कृत्वा निजहृदि बाला ॥ २५ ॥

त्वरितगतिर्जनविततिः प्रचलमतिः परमततिः ।
अतिरभसं व्यजनि भृशं जननिनदे स्फुरति मुदे ॥ २६ ॥

सपदि कामिनी मनोरमा मदनतापनाशनक्षमा ।
नव नवक्षणे क्षणोद्यमी परिचचाल काचना समा[1] ॥ २७ ॥

एकादशाक्षरायथा ॥ त्रिष्टुप् छन्दः ॥ ११ ॥

द्रागिन्द्रवज्राहतिवेगवृष्टौ विस्फूर्जितायां व्रजनाशनाय ।
यो गोपगोपीनिकरं शसातं चक्रे करान्तेधरमारचय्य ॥ २८ ॥

परिक्वणत्किङ्किणिजालरम्यं विचित्रवस्त्रावलिशालिमौलिम् ।
उपेन्द्रवज्रादिमणिप्रणीतप्रभाच्छटावित्स्फूरितान्तरालम्[2] ॥ २९ ॥

नृपायने जात्युपजातियुक्तो वादित्रवित्रस्तसमस्तसत्वे ।
स्मेराननो भूतलपावनोऽथो स लोकनाथो रथमाससाद ॥ ३० ॥

तत्र मित्रशतपत्रजगोत्रदिग्गुणामरविलोचनपीता ।
कस्य पण्यरुचिरा ननु मूर्त्तिः स्वागता वितनुते न च हर्षम् ॥ ३१ ॥

सा तनुर्ननु घनाघनप्रभाकोटिमन्मथनिभा रथोद्धता ।
लोचनानि जगतां कृतार्थतां द्राङ्निनाय च तदा शिवप्रदा ॥ ३२ ॥

घोरतराघावलितृणराशि प्रोत्कटकीला प्रतिपदलोला ।
सात्वनुकूला तनुरनुरुपा कस्य न चासीत्कथय यथार्थम् ॥ ३३ ॥

लक्ष्मीभर्त्तुः सखि मुखकमले राजद्यन्तच्छदने ललिते ।
लोलं नेत्रं भ्रमरविलसितं पश्यात्यन्तं सहचरि तनु ते ॥ ३४ ॥

दोधकदाधुक् झंझणझंझामित्थमनेकघनादिनिनादः ।
कर्णपथे ननु शंसति शङ्खात्पङ्कजनेत्र उपागत एषः ॥ ३५ ॥

मध्ये किमु सुन्दरि मन्दहासो[3] देवः समुदेति स चक्रधरः ।
यः केलिलवेन च मोटनकं[4] चक्रेऽसूरकेशि महास्थिरसः ॥ ३६ ॥

१। त्रिभिः कुलकम्
२। वित्सुरितान्तरालम्
३। मन्दहसो
४। मोटकनम्

*

वातोर्मिप्रोच्चलद्राजत्पताकः कोऽयं बाले रथ आभाति शाधि ।
हारोदारः सखिकोऽत्रास्ति वीरो मन्दाराभो भुजगेन्द्रोत्तमाङ्गः ॥ ३७ ॥

भास्वत्कन्यातीरवानीरराजभ्राम्यद्भृङ्गीकुञ्जपुञ्जोदरेषु ।
चक्रे रासं कुन्दहासा सुवेशा सेयं गोपीशालीनी शाधिमूर्त्तिः ॥ ३८ ॥

विगतकलङ्कशशाङ्कहसा तरुणसरोजदृशा सुमुखी ।
इयमतिशोकविमोककरी सहचरि का समुदेति वद ॥ ३९ ॥

द्वादशाक्षरा यथा ॥ जगती छन्दः ॥ १२ ॥

प्रताड्यमाने पटहे महामहे विलासवंशस्थविले प्रपूरिते[१] ।
मधूरिका शङ्खिरवे महाधने घने जनानां सुखदे प्रसर्पति ॥ ४० ॥

विप्रेन्द्रवंशाविरतं प्रभाते निर्दोषमाङ्गल्यपदे समुद्गते ।
पौढ़प्रतीहारगणैर्जय प्रभो हे देवशब्दे मणिमेत्युदीरिते ॥ ४१ ॥

क्षोणीपतिर्हार्युपजातिवृत्तिर्न्यत्सङ्ग-वाग्भङ्ग पदे सदेरिते ।
वैतालिकैस्तैस्तरसा रसास्पदे समाविरासीन्नवरद्वरादथ ॥ ४२ ॥

चन्द्रवर्त्मवदभूत्कुटिल जनध्वान्ततापरहितं सपदि तदा ।
स्वीय मौलिगणतारकनिचितं राजवर्त्मरुचिरं बुधकविभिः ॥ ४३ ॥

जयेति जनतामुखोद्गतनृभिः सुकण्ठीरवराजहंसभणितिः ।
प्रभूततरनिर्जरोद्धतगति कलिन्दतनयेव साऽजनि सृतिः ॥ ४४ ॥

समुपैति धरापतिरेष सतां गतिरीशविलोकनजातरतिः[२] ।
तदलं वरमौलकुलाकलितः पुरतोऽट कथं विरतोऽसि गतौ ॥ ४५ ॥

इति तदा प्रतिहारवचोत्तरे जयति भूमिपतिर्विलसद्द्युतिः ।
द्रुत विलम्बितचारुगतिः कृती परिययौ तरसाऽतिरसा वशः ॥ ४६ ॥

अथो तस्य विश्वैकबन्धोरुदारं वरं भूमिसारं रथं प्राग्वीरः ।
भुजङ्गप्रयातं यदीयोत्तमाङ्गे स्फुरच्छत्रहेतोः स्फुरत्येव नित्यम् ॥ ४७ ॥

१। त्रिभिः कुलकम्   २। युग्मकम्

अथ पञ्चवक्त्र इव चञ्चदयस्तरसा वशीकृतदृशां प्रचयः ।
रथमारुरोह विगलत् शिचयः प्रमिताक्षरामृतवचो निचयः ॥ ४८ ॥

भूपतिर्भक्तिभारानमन्मस्तकोऽसौ तदा प्रस्तुत स्वाभिलाषाप्तये ।
वीक्ष्य सांकर्षिणीं तां तनुं स्रग्विणी स्पष्टमष्टाङ्गमासाद्यनामं च सः ॥ ४९ ॥

हे देवेन्द्रेन्द्राद्यति कारुण्यसिन्धो लोकेशैर्वन्द्यांघ्रेऽति दीनैकबन्धो ।
एषा शेषा भोगोत्तमाङ्गा पवित्रा भूयाभूत्यैमेते तनुर्वैश्वदेवी ॥ ५० ॥

अखिलगुरो सुसमानिवास हे हलधर गोकुल वासलालसस्य ।
प्रविकसविन्दुमुकुलमालतीरुचिरतनो कुशलानि मे तनुः ॥ ५१ ॥

गुणगणसिन्धो कुसुमविचित्रा त्रिभुवनबन्धो विततपवित्रा ।
तव तनुरेषा शुचि शुचिमित्रामृतकरनेत्रा भवतु मुदे मे ॥ ५२ ॥

लोकाधिप फुल्लत्कुन्दस्मितवन्दे नदाङ्गणभूमिभागाहितनृत्य ।
देवासुरमौलि[1] प्रोद्यन्मणिमाला रोचिश्चयदीप्ताङ्घ्रे पालय भृत्यम् ॥ ५३ ॥

गलदमलाम्वर आनतमौलि प्रविकसदाननतामरसोऽथ ।
करतलशालितगोधि निरारादवकरभारनिकारमकार्षीत् ॥ ५४ ॥

तदनु मदनसुन्दरो भूपतिः स्मितरुचिरचिरसुखैः सम्भूतः ।
करतलकृतस्येन्दुमन्दाकिनी विमलजलमसौ शिषेचानतः ॥ ५५ ॥

तस्याभ्यर्णं तदनु समन्दं मन्दं पूर्णानन्दः सपदि समयाद्भूपः ।
यत्र स्फीता जलधरमाला रम्याराजत्युर्जा तनुरतिभव्या नव्या ॥ ५६ ॥

त्रयोदशाक्षरा यथा ॥ अतिजगती छन्दः ॥ १३ ॥

वातोदञ्चन्मत्तमयूरज्वलकण्ठ
क्षौमप्रोद्यत्केतुमनन्ता समकीर्त्तिः ।
लक्ष्मीभर्त्तुं भूमिसुपर्वाहृतमूर्त्तिः
कामोदामश्रीरथ वीरो रथ आप ॥ ५७ ॥

---

१ । मौनि

धराधिपो मुरहरपादपङ्कजे
कृतानतिः स्फुरदति सुन्दराकृतिः ।
तु तौ मनस्तदनु ततान लोचनं
स्खलज्जलो भृणविवशोरसार्द्रधीः ॥ ५८ ॥

अमलकमलदललोचनविष्णो
गुणगणनिपुणसुरासुरजिष्णो ।
अरदरकरसकलेश्वरचण्डी-
धवविभवनिवह पालय भृत्यम् ॥ ५९ ॥

आर्त्तार्त्तिप्रशमकभृत्यवर्गबन्धो
भूभारावतरण हे कृपैकसिन्धो ।
लोकानां त्रिपुरवरप्रहर्षिणीयं
भूयाद्भो भवविभवायते तनुश्रीः ॥ ६० ॥

शरदममृतकरप्रोज्वलच्चन्द्रिका -
वलिसुललिता-वृन्दावनी-नायक ।
कुसुमशरशरानून्नगोपाङ्गना-
जननिधुवनलीलाकृति पालय ॥ ६१ ॥

सुरवारतारणकृते धृतदेह
जगदीश केशव रमाधिप देव ।
वरसिंहनादपरितजितदैत्य
क्षितिं कुरुतरां गतभीतिम् ॥ ६२ ।

परिपीयते पदसरोजमाधुरीं
विबुधेश केशव भृशं प्रवोधिताः ।
विचरन्ति वीतभवभीतयोऽमला
कलयात्र नारदमुखा सुखाकुलाः ॥ ६३ ॥

पिवत तव पादयुगार्त्तमानसानां
ननु तनुसद्मजुषां विपत्तयोऽपि ।
सपदि सुरेश विनाशमाशु यान्ति
क्षुधितमृगेन्द्रसुखं मृगा यथेह ॥ ६४ ॥

इति सन्निवेद्य चरणे मुरद्विष-
स्तदनन्तरं परिसमाप्य चासकृत् ।
विहिता नतिः सपदि जिष्णु वल्लभा-
मभितो जगाम पिकमञ्जुभाषिणीम् ॥ ६५ ॥

चतुर्दशाक्षरा यथा ॥ शर्करी वृत्तम् ॥ १४ ॥

प्रोत्फुल्लचारुतरपङ्कजपत्रनेत्रः
कुन्देन्दुहास उदिताखिलगोत्रमित्रः ।
भूलम्बिताम्बर उदार उदस्तमोहः
सिंहोद्धता गतिरथो रथमारुरोह ॥ ६६ ॥

वीरो नीरजनेत्रो लोलापाङ्गतरङ्ग
सारामर्जुनकारां भद्रामेत्य सुभद्राम् ।
स्पष्टतामथ नत्वा साष्टाङ्गं च सुनेत्रां
तुष्टावातिनताङ्गोरिङ्गद्देहरुहालिः ॥ ६७ ॥

मुरहरचरमे रमे जगतां स्थिति-
प्रतिहृतिसृजिकारणं त्वमसि स्फुटम् ।
विपुलविमलसव्यशाचिधनं सदा
सरसिजनयने त्वमस्य पराजिता ॥ ६८ ॥

तव चरणयुगप्रणिहितमनसां
शरततिरमला व्यथयति सकलम् ।
सुरवर रचितापि च न च किमहो
नरशरकुसुमप्रहरणकलिका ॥ ६९ ॥

देवि प्रोद्यद्घोरतरविपक्षव्रातानां
भीरैर्भिल्लैराहतमपि च स्निग्धस्निग्धम् ।
वासन्तीपुष्पप्रकरे रविशोभिस्रग्भिः
वक्षः साक्षात्ते कलयतु भो भूमेर्भूतिम् ॥ ७० ॥

सतत हत दुराचार वारे सुरेशे
सकलगुणगणे हारमन्दारहासे ।
भगवति शुभदे देवि नान्दीमुखी ते
तनु दिवसं भो मुदं मे तनोतु ॥ ७१ ॥

पञ्चदशाक्षरा यथा ॥ अतिशर्करी वृत्तम् ॥ १५ ॥

लोकावासे सुरेशेव्यभ्राष्टमी चन्द्रलेखा
भ्राजद्भाले सुकेशि प्रोत्फुल्लमन्दारहासे ।
दासेत्वच्चारु पादाम्भोजद्वये सम्भूताशे
नित्ये नित्यं प्रसादं सत्वेत्यमयि त्वं विधेहि ॥ ७२ ॥

इन्दु कुन्दमन्दहाससुन्दरास्यपङ्कजे
घोरभूरिभूमिभारतारणैककारणम् ।
तारहारवारचारुकण्ठि भृत्यजीवने
पूरयाशु नित्यमेव देवि विश्वतूणकम् ॥ ७३ ॥

मदनरुचिरतनुरथ शशिकला
किल इति विरचितविततरनुतिः ।
क्षितिपतिरवकरनिकरनिरसनं
सततविनतमतिरकृतसरभसम् ॥ ७४ ॥

अथ रथवरमध्याध्यानलग्नः सुमध्यां
रुचिरदमनकाली मानिनीं तां प्रणम्य ।
विजयि हृदयहारां लोकसारामुदारां
सरभसमपयासीत्कुन्दमन्दारहासः ॥ ७५ ॥

लीलाखेलो वक्षोदेशे राजन्मालो धीरोऽथो
पाथोजाक्षो क्षोणीनाथो घर्माम्भोराजद् वक्त्रः ।
लोलैर्मौलैरुर्वीगिर्वाणैरप्युद् युक्तो वीरो-
धीरं धीरं चारुविहारोऽसौ पश्चादायासीत् ॥ ७६ ॥

तदनु मदनप्रभतनुर्धरानन्दनो
रुचिरशिरसाऽतितरसारसा भूसुरैः ।
रथवरविनोदमकरोत्तरां सानुजो
विपिनतिलकोरुदमनालिमालोज्वलः ॥ ७७ ॥

चित्रं वादित्रं रेजे तत्रातवेलं विशालं
वाचो लोकानां चापि प्रौढ़ा विसस्रुर्जयेति ।
अभ्यर्णं कर्णानन्दप्रोद्गारि भूदैवतानां
वारं वारं चाप्युच्चैः स्तोत्रं पवित्रम् ॥ ७८ ॥

षोड़षाक्षरा यथा ॥ अष्टि वृत्तम् ॥ १६ ॥

अचलदचलधृतिरतिसरभसगति
सकलजननयनवनमनुसफलय च ।
सुरुचिरसजलजलदतनुरनुदिन-
मनु मम निखिलविपुलसुखनिधिरिह[1] ॥ ७९ ॥

इन्दुकुलकासहारिमन्दहासदेवदास
कोटि कोटि कामकान्तदेहशान्तमारतान्त ।
केलिपुच्छचित्रकेश गोपवेश केशवेश
गोपिकालिकेलिलोललोलमालभूमिपाल ॥ ८० ॥

अये महेश केशव क्षमाम्वुधे दयानिधे
जनार्दनेति सादरं वचश्चयं भजन्मुहुः ।
जनावली परिस्फुरत्करप्रपञ्चचामरः
स्फुरत्समीरवीजितो गतो गतिः सतां द्रुतम् ॥ ८१ ॥

तदनु मदनकोटिरमणीयगात्रश्रिय-
स्त्रिभुवन शाणितुश्चलतिचक्र कक्रे क्रमात् ।
अतिसरभसं मुहुः समुदयाय तार-
स्फुरद् गरुड़रुतं नवोत्सवविधौ प्रमोदोज्ज्वलम् ॥ ८२ ॥

दुःसह विसरत्कर्णभूर्णात्यन्त धृतदरं
स्यन्दनवरसम्भृतं द्रागाकल्परचभरम् ।
उत्सववरक्तानां लोकानां च कलकलं
स्वभ्रतलकृतावासा सर्पालो वत चकित ॥ ८३ ॥

राजपथेऽनिवारनरनिकरपरिचिते
स्यन्दनचक्र चक्रवर रवभरभरिते ।
गच्छ सर्प तूर्णमिति कलकलकलितो
सम्प्रति भीममास वृषभगजविलसितम् ॥ ८४ ॥

प्रसकलशारदामृतमयूखकोटिभासं
मुरहरवक्त्रविम्वमथ वीक्ष्य वीक्ष्य साक्षात् ।
विपुल सुखाम्वुधौ निरवधौ तदानिमग्नैः
परिननृते मनाक् सपदि वाणिनीसमूहैः[2] ॥ ८५ ॥

---

१ । युग्मकम् २ । नर्त्तकीसमूहैः वाणिनी नर्त्तकीसभा विदग्धवनितासु च ।

नमस्कारकक्षद्वितय विलसन्मूल राज-
स्तनोऽकस्माद्भासः सरभसमकाण्डेऽपि गीतिः ।
कटाक्ष प्रक्षेप चटुलं चटुलं चाभिकान्तं
तदैवासीदित्थं प्रवरललितं तारं सुरुचिरम् ॥ ८६ ॥

साक्षाद् वीक्ष्येक्षणमधुकरसारं मुरभिदः
हेलालोला दयितमभिताः कान्ताः सुरुचिरा ।
× × ×
हारोदारा मदन ललिताः रेजुर्मृगदृशः ॥ ८७ ॥

सप्तदशाक्षरा यथा ॥ अत्यष्टि छन्दः ॥ १७ ॥

क्वणत्कनककिङ्किणीनिकरहारिरावाकुलं
महोदय सुदुःसह प्रधिविदीर्णपृथ्वीतलम्[१] ।
कलङ्करहितज्वलद्विपुलशारदप्रस्तुता-
मृतांशुनिभदर्पणावलिमयूखराजद्दिवम् ॥ ८८ ॥

मन्दाक्रान्ताखिलगुणभरं कालपृष्ठैर्वलिष्ठैः
प्रेष्ठैः पार्श्वगत जनवपूल्लुण्टनप्राप्तचित्तैः ।
आकाश स्पृग्घनतरघनारावविवत्रस्तहस्त-
स्वादि प्रेमप्रवणजनतोदीरितस्तोत्रजातम् ॥ ८९ ॥

यथा लोले नीले सखि शिखरिणीन्द्रादिसुमनः
सम्मूहैः सानन्दैरनुदिनसमुद्जातविभवे ।
गुणावासे पश्य प्रसरति रथोऽयमुरभिद-
स्तथा मन्दं मन्दं सफलय दृशौ सुन्दरि भृशम् ॥ ९० ॥

मानववंशपतत्रपतितं सहचरिरुचिरं
स्यन्दनचक्रचक्रमणतो ननु गगनपथम् ।
एत्य रजः कदम्बमवले कलय विलसति
प्रस्तुतवालसुरकरकरसन्निभमिह तरसा ॥ ९१ ॥

कंसारातेः कथय ललिते चेत्थं विशालेक्षणं
भ्राजद्भृङ्गावदनकमलश्रीर्दन्तवासछदा ।
शोभाधारा सकलजनता स्वान्ताऽतिशर्मदा
केषामेषा समजनितरां नो वा मनोहारिणी ॥ ९२ ॥

---

१ । त्रिभिः कुलकम्

आक्रान्तस्य त्रिभुवनजनोदरेण मुरारिणा
हस्तन्यस्त स्फुरद तिदरेण तेन रथस्य सा।
भाराक्रान्तापि च सरभसं तद्भाति जहर्ष भू-
र्दृष्ट्वा प्रेष्ठं ननु नवनवोत्सवाहतचेतसम् ॥ ९३ ॥

सुतमपि तदा प्रेष्ठ श्रेष्ठं गृहं च महोदयं
निज परिजनं चाथो नाथं हितं दयितं च तम्।
झटितिविजहुर्वाला लोला भृशं हरिणोदृशो
भविक सदनं हृष्टात्दृष्टवा मुरारिमुखाम्बुजम् ॥ ९४ ॥

सतत घने जने सरभसं समुपेत्य तदा
कमपि कफोणिभिः कमपि बाहुभरैः प्रणुदन्।
रुचिरखरैश्च सूक्ष्मनखरैरुरुनर्दटकः
कमपि च सर्वतोऽर्वति गर्वभृतो नितराम् ॥ ९५ ॥

अष्टादशाक्षरा यथा ॥ धृतिछन्दः ॥ १८ ॥

द्रष्टुं विस्पष्टं वदनकमलं लोलनेत्रालि शालि-
पद्माया भर्त्तुर्भविकसदनं दन्तवासछदालि।
प्राणैश्चञ्चद्भिः कुसुमित लतावेल्लिते वाथ काचित्-
व्यूहे लोकानामपि घनतरे भृङ्गकेशी विवेश ॥ ९६ ॥

निखिलजनातिघोरवृजिनापनुत्तये श्रीपता-
वरिदरसुन्दरे सरभसं स्वगुण्डिचामण्डपम्।
चलति धराबरादिनरवारवेष्टिते सर्वतः
त्रिभुवननन्दनं ननु दिनं सदा तदासीत्तराम् ॥ ९७ ॥

अयमयमसमाशु गदाहृदेहोनुवृन्दावने
सहचरि तरसा व्रजस्त्री जनानां मुरारिः पुरा।
अनुदिवसममित्र लोकातिशोकप्रदो हृत्सिदं
कथय समगृजल्लसनेत्र नाराचमीशो भृशम् ॥ ९८ ॥

मन्दस्मेरं सुमुखि हलधरं पश्य विश्वैकवासं
रम्भे सम्भावयतु सरभसं कुन्दमन्दारहासम्।
एनं मेनेऽहमपिच तरसा लोकयाशेषबन्धुं
हा धिक्कवास्ते सहचरि भणहे चित्ररेखा सखी मे ॥ ९९ ॥

गोविन्दस्य सुरासुरावलिशिरो रत्नोज्वलपदं
कुन्देन्दुस्मितदीप्ति सुन्दरतरं सानन्दमनिशम् ।
आस्येन्दुं तव लोकयाङ्गधरणीशार्दूललितं
नेत्रं स्वं च पवित्रयाशु किमतः शर्मास्ति कथय ॥ १०० ॥

ऊनविंशत्यक्षरा यथा ॥ अतिधृतिछन्दः ॥ १६ ॥

विरावोऽयं भीमः सहचर दास्य न ग्रामणीनां
हृषीकेशेणाङ्ग प्रतिपद महोभृभृताधिष्ठितानाम् ।
समन्तात्कल्पान्ते सरभसलसन्मेघविस्फुर्जितातिप्रगल्भव्यापारः प्रसरति सखे खे समाकर्ण्याशु ॥ १०१ ॥

स्वहस्ताभिर्न्यस्तोज्ज्वलमुषलसंभिन्नस्फुर द्वैरिणो-
लसन्मन्दारेन्दुद्युतिनिभ तनोश्छत्रीकृता हि प्रभोः ।
सदा हाला लोलारुणतर दृशो लोकत्रयी शासितुः
सखे पश्यच्छायां सुरुचिरतरां नीलाम्बरस्याग्रतः ॥ १०२ ॥

कुत्रापि स्खलति क्वचिच्चलति च क्वापि क्षणं तिष्ठति
क्वापि क्वापि च मन्दमन्दमटति क्वापि द्रुतं गच्छति ।
लोकानेक विनिर्मितस्थितहृतिप्राज्ञस्य पश्याऽस्य भो
विश्वेशस्य सदा सतो वत धरा शार्दूलविक्रीड़ितम् ॥ १०३ ॥

पद्माथा बन्धोः सहचरि गदानन्दकन्दस्य विष्णो-
जिष्णोर्लोकानां सदरिदरभृतो दैवतानां विधातुः ।
वक्षं श्रीवत्साङ्कि तमतिरुचिरं बन्धुरं फुल्लदाम
प्रोद्भिन्नाभोगं परिकलयतरां कौस्तुभो भ्राजिमध्यम् ॥ १०४ ॥

विद्या सिन्धुर्भूर्बन्धुः स हरि जगदानन्दसदनं
कालाभ्राली रम्याऽति रभसमसौ नेत्रपदवीम् ।
आयात किं नोपेतो ननु मदनतनुः प्राणदयितो
याता सा पूर्वं लोला त्वमपि च तरसा याहि सुरसे ॥ १०५ ॥

विंशत्यक्षरा यथा ॥ कृतिछन्दः ॥ २० ॥

केयं वाला कलायद्युतिरुचिरतराश्री सुवदना
हारा नीहारहासा त्रिभुवनजनतापातैकसदनम् ।
कामोद्दानोभिरामः सहचरिपरितो व्याधूतवसना
पद्माक्षी मन्दं मन्दं प्रसरति तरसा हे शाधि सुरेसे ॥ १०६ ॥

अथ गीतिकास्तर सा तदा सरसारसान्मुरवैरिणो
जगतीशितुः कमलापतेरवला मनोजकलाकुलाः ।
वदनं समीक्ष्य दरस्मिताकुल गण्डमण्डलमुज्ज्वलं
तरला जगुः कमलायतेक्षणमञ्जुलाः कुटिलालकाः ॥ १०७ ॥

इन्दुकुन्दकासहासदेवदासरासकेलिसक्तभक्त
रक्तहारिहारभारचारुवत्सदेशकेशवेश ।
गोपवेश गण्डदेश मण्डितोरुहारिकुण्डलाऽङ्ग-
सङ्गी पीतवास पूरयाङ्गचित्तवृत्तमाशु नित्य पाहि पाहि ॥ १०८ ॥

विभो पद्माबन्धो सदरिदरगदाम्भोरुहाश्लिष्टपाणे
सपाथः पाथोदावलि ललिततनोर्गोपिकानन्दनाद्य ।
अयं शोभाभोगस्तव सकलमनोवृत्ति लोभः प्रकामं
न केषामानन्दं कय कलयतेहारि सर्वाङ्गसङ्गो ॥ १०९ ॥

एकविंशत्यक्षरा यथा ॥ प्रकृतिछन्दः ॥ २१ ॥

लोलावालाम्वुजन्मोज्ज्वलरुचिरदृशा कुन्दमन्दारहासा
लोकश्रेणीनिवासावत कलय लते लोचनामोदवेशा ।
पादान्तालम्विभृङ्गावलिनिभतुलश्रीस्रग्धरा पीतवासा
केशामेषा न धत्ते ननु मनसि मुदं दारवी मूर्त्तिवृत्तिः ॥ ११० ॥

रुचिरताननाम्वुजमनोज्ञरुचौ सुरुचिरं परिस्फुरद्-
विपुलविलोलनेत्रशफरे चिकुरावलिशैवलाकुले ।
न तु जनतामलोऽथ सविनोद मुरारिविग्रहो
ज्वलत्सरसी सरसे परिमज्ज तदाऽतमुदासदा नघे ॥ १११ ॥

द्वाविंशत्यक्षरा यथा ॥ आकृतिछन्दः ॥ २२ ॥

दृष्टवा दृष्टवा तां तां यात्रामविरतसुखितविततब्रम्हनेत्रा
भूमीसारा पद्माबन्धोः सरभसमथविपुलकरुणसिन्धोः ।
विभ्रस्यत्शोकास्ते लोकां ननु विविदुरनु दिनमपि नृसिंह
क्षोणीभर्त्तुः कीर्त्तिहंसीं सकलभुवनतलसुविततपक्षाम् ॥ ११२ ॥

*

केचन तस्य पदाम्वुजसन्ततभक्तिमहामदिराविवशा
आत्तरसास्तरसातितरारुरुदुश्च तदातिमुदा ननृतुः ।
हे करुणावरुणालयमाधवकेशवशेषसुरेशपते
सज्जनशासक दुर्जननाशक पालय चेति निगद्य मुहुः ॥ ११३ ॥

त्रयोविंशाक्षरा यथा ॥ विकृतिछन्दः ॥ २३ ॥

अयमवले घनाघन मनोज्ञसंहननकः पविलितः धरो
वरशातपत्रनेत्रसुसमो रमापतिरतिसिद्धविभवः ।
वलितकुन्देन्दुसुन्दररुचिः परस्त्रिपुरशासनस्तदितरा
ललितकलाय चारुतरभा शुभा कलय शोभनेऽद्रितनया[1] ॥ ११४ ॥

काचिद् दृष्ट्वा दृष्ट्वा हृष्टाः सजलजलधररुधिरतरवपुषं
वलगच्चेलं क्रीड़ालोलं सकलदलकमलसुविमलनयनम् ।
लक्ष्मीकान्तं शोभातान्तं बहिरभिवदति विपुलतरविवशा
मत्ताक्रीड़ं त्यक्त्वा यत्रासते परिहृतविनतसुतदयिता ॥ ११५ ॥

चतुर्विंशत्यक्षरा यथा ॥ संस्कृतिछन्दः ॥ २४ ॥

काचन तन्वी सुललितवदना मारसंज्वरभरपरिदूना
गोकुलनाथे विनिहितनयना घोरतरश्रमभरपरिखिन्ना ।
प्राणसमांशेऽङ्कृतकरकमला सेन्दुकचन्दनसुललितभाला
मन्दमुपेयात्सरभसमवला सुन्दरबन्धुरकुचचलमाला ॥ ११६ ॥

पञ्चविंशत्यक्षरा यथा ॥ अतिकृतिछन्दः ॥ २५ ॥

भावुकसिन्धो किङ्करबन्धो करसिजवरसदरिदरहरे
पुष्करजम्वुक्रौञ्चपदादिक्षितिवलयचलितजनकुलमिलिता ।
स्यन्दनचित्रा भो तव यात्रा सुगीतविततर ससरभससकलाक्ष्मा-
तलनेत्रा हन्त पवित्रा समजनि भव भव भयभरण मम ॥ ११७ ॥

षड्विंशत्यक्षर यथा ॥ उत्कृतिछन्दः ॥ २६ ॥

हाहा मातः क्वास्ते तातस्तनय नय सहचरि चराम्वुजाक्षि पुरो हरिं
द्राक्पश्यपश्येत्युत्कण्ठितानां प्रवितत कलकलकलिते नृणां तु नृपायने ।
नागाश्वानां ध्यानाभोगैरतितत सतत परिगते मुखाम्वुजलोकने
लोकैर्न्यस्ताक्षि प्रस्तोमं परिसमजनि वत विततभुजङ्गविजृम्भितम् ॥ ११८ ॥

---

१ । श्लोकसंख्या ११५ इत्युल्लिखितास्ति

सप्तविंशत्यक्षरो दण्डको यथा —

अथ रथमनिशं विलम्बन्तमेत्य प्रकाशं प्रवारो धरानन्दनस्तत्क्षणं
सरभसमसकौभृणाविष्टचेताश्चकारस्तवं लोकबन्धोरिमं शौरिणः ।
जय जय जगदीशविष्णो कृपाम्भोनिधे देवदेव क्षमासागर श्रीपते
सपदवितत्तचण्डदृष्टि प्रपातोच्चलज्ज्ञाविकोयनिधेरयरक्ष प्रभो ॥ ११९ ॥

लक्षणानुसारेण स्वेच्छया दत्ताक्षरा दण्डका यथा —

भीमभूरिभारभीतभीतभूमितारण
प्रकामकारणप्रभो जनार्द्दना-
द्यगुञ्जतानि मञ्जुभृङ्गपुञ्जशाल्यशोण-
पुष्पमञ्जरी प्रणीत कर्ण्णिदेशभूष ।

कोटिकोटिकामराम इन्दुकुन्दवृन्द
हासरहारिमन्दहासलोकवास
आन्त्ररास हे सुरेश केशवेशशेष-
शय्य विश्वनाथनाथ पाहिपाहिँ ॥ १२० ॥

उदधेस्तनया दरहासलसन्मुख-
वारिरुहामृत सन्ततपानविधौ
भ्रमरक्षितिपालनसर्गपरिक्षय-
दक्षधरासुरवारशते सततम् ।

कुशुमस्तवकातिमनोज्ञतरश्रवण-
द्वय केशवशेषसुरेश-
यमाऽनिलाचन्द्रसमीरमुखासरवार
परिस्तुतवाह सरोरुह पाहि विभो ॥ १२१ ॥

पीत चेलातिलोलाङ्गयष्टे सुरेशो-
त्तमाङ्गोल्लसन्मौलिमाणिक्यप्रभा ।
कोटिराजपदाम्भोजयुग्मद्युते द्वेषण-
श्रेणी निर्याताहेतोधराबान्धवः ।

कारुण्यैकसिन्धो नियोज्यैकबन्धो गति-
क्रीड़यामत्तमातङ्गलीलाकर
श्रीनिधेकं सवंशप्रणासप्रकाम
प्रवीणक देव प्रसीद प्रसीद प्रभो ॥ १२२ ॥

वितभाशरीरभूत्या सदा विनिर्जितातति-
कोटयनङ्गशेखरत्विषाविलासि
यान्यपङ्कजामृतान्धसा जनार्दनप्रसन्नदुःखभञ्जन
स्फुरद्घनद्युते सरोजचारुलोचन ।
हरे सुरेश्वर प्रभो स्वभो महेशकेशव
क्षमाम्बुधे दयानिधे रमापते शतां गते
जगत्पते जगत्कृते धृताङ्ककंसरङ्ग-
भभ्रङ्कुस भो प्रसीद भो प्रसीद भो ॥ १२३ ॥

अर्द्धसमं यथा —

अथ रथ उरुवाहमण्डितो द्राक्नुतिविरतौ धरणीपतेः पताका ।
विषधररिपुणातिपुष्पितग्राव निरनिशं प्रचराति विश्वबन्धोः ॥ १२४ ॥

विमले कमलेक्षणे क्षणेन क्षितिनाथेन मुरारिणा पुरा तु ।
अमुनैव शिशु छलाद्व्रजान्ते प्रमदो ग्रासमघानि पूतना सा ॥ १२५ ॥

गजवाजिनरालिलालिते चलति श्रीकमलापतौ पथि ।
पुरुहूत तनुजसुन्दरी रथघोषो विषमस्ततोऽजनि ॥ १२६ ॥

पवमानविधूतपताकाकिङ्किणिजालविशालरवश्रीः ।
सहसाऽथ रथत्रितयी सावेगवती परितो विचचाल ॥ १२७ ॥

तरसासरसाघशोभृशं जगदुराशु परस्परमादरात् ।
हरिणाप्लुतचारुविहारिणो रथवहा बहवो महोदयाः ॥ १२८ ॥

दरविदलितकुन्दसुन्दरे चलितवले मुषलायुधे तदा ।
त्रिजगदपरवक्त्रमासनो मुखविधुमस्य निपीय चक्षुषा ॥ १२९ ॥

प्रवले नवतलनमदीक्षत्साधिष्ठित एष रथोऽथ चचाल ।
विशशेषदरोदरदीप्तो नाधूतविसार्यु पत्नत्रपताकः ॥ १३० ॥

विषमवृत्तानि यथा —

तरसारसाधिगतलोल भुवननयना समुद्गता ।[1]
हाटकघटितहारितरोज्वलकिङ्किणी सुरुचिरा रथत्रयी ॥ १३१ ॥

---

१ । युग्मकम्

ससुरासुरावलिकिरीटतटघटितरत्नशोभया उज्ज्वल-
तरचरणैरमर प्रवरैः समुद्गततला निरेक्षि सा ॥ १३२ ॥

वरवाजिराजिरुचिरोऽभूत् मुरहररथोऽथ पूर्वतः ।
ललिततरलपितनेमिमनोहरचंक्रमणनादिनादितः ॥ १३३ ॥

अयि वारयैनममलाङ्गि मधुकरयुवा तवाधरम् ।[1]
एष कामिनिकले वलते मुखपद्मसौरभकलाकुतूहली ॥ १३४ ॥

तन्मारज्वरजग्धस्य पिपासार्त्तस्य शोभने ।
शङ्केऽस्य सततं पथ्यावक्त्राम्बुजमधुच्युतः ॥ १३५ ॥

कुन्देन्दुकासहासे जगतां वासे चलति हलपाणिना ।
आर्याहृद्यैः पद्यैस्तुष्टुवुरित्थं तदोन्मनसः ॥ १३६ ॥

गिरिधरजगदीश्वरशङ्करदुष्ट भयङ्करमाधवानन्त ।
हरिहरकेशवमहेश्वरविपुलानन्द कुरु मां भो ॥ १३७ ॥

मुरहरकरुणासिन्धो जगतां बन्धो जनार्दनानन्त ।
इति वत केचन गीतिंसत्याबन्धोर्वितेनिरे तरसा ॥ १३८ ॥

गोकुलनायकविष्णो त्रिभुवनजिष्णो मुराराते ।
इत्युपगीतिं नित्यं केचन चक्रुस्तदातिमुदा ॥ १३९ ॥

त्रिभुवनतारणहेतो दानवकेतो सदा नव ।
इत्युद्गीतेः सरसा तरसा नेमुर्मुरद्विषः पुरतः ॥ १४० ॥

करतलपरिधृतमन्दर त्रिभुवनसुन्दर मुकुन्ददेवगोविन्द ।
आर्या गीतं चेत्थं कुतुकात्तदा वितेनिरेऽपरे तरसा ॥ १४१ ॥

ललिते दलितेऽम्बुजेक्षणे कलय कुरु स्वं वैतालीयम् ।
पुरतो मुरवैरिणोऽधुना नृत्यति नानावेशरसिकं तत् ॥ १४२ ॥

---

१ । युग्मकम्

अयमथविजनेति घने वने सहचरि चकार पुरा मुराराति: ।
कथय केलिपरे रुचिरे क्षणे तरुणिगणे महदोपछन्दसंज्ञम् ॥ १४३ ॥

सोऽयं सुन्दरिमन्दरिमन्दरवाटिव्यापज्झटिकाकृतरतिधाटि: ।
कलय कलावति सफलय नयनं पश्यसि शश्वत्किमिति च हयनम् ॥ १४४ ॥

चूर्णकं यथा —

जय घनसुन्दरकेशवमन्दरगिरिवरबन्धुरसुरुचिरकन्दर
विरचितमन्दरतनुलसदिन्दिरद्रुहिणपुरन्दरवरुणदिवाकर
मुखविबुधोत्कर सूरुचिरशेखरमणिगणभास्वरचरणसुरेश्वर
हरिहरशङ्करअजितकृपाङ्कुरसुरवरकिङ्करअसुरभयङ्कर
खरतरगोखुरविदलितगोचरपरिगतचूर्णकसुरुचिर
वर्ण्णकमुरदरपालय मुरहर पालय मुरहर पालय ॥ १४५ ॥

कलिका यथा —

अविरतविततकार्यजातव्यर्थकदर्थितान्त: करणकर्ण्णदु:शासनादि
दुर्जनवर्गप्रतिक्षणपरिपूरितनिजनिशान्तस्य कार्याकार्य्यविचारचतुर
प्रकटतरवीर्योद्रेकद्रावितमित्रगोत्रधूर्यभीष्मद्रोणाचार्य
प्रमुखगुरुवर्य्यवर्जितनिकार्यस्य विततराज्योत्कलिकाप्रायसा-
कुलस्य दुर्योधनस्य दुर्जाताकार्यशतपर्जन्यावर्जितपाण्डव-
सूर्य्यतार्य्यालोकदसाध्यं सर्वस्वविश्वबन्धो करुणासिन्धो
मामनुगृहाण मामनुगृहाण मामनुगृहाण ॥ १४६ ॥

वृत्तगन्धिर्यथा —

जयजयभवबन्धो करुणासिन्धुमुखजितसुन्दरतरशरदिन्दो
निहितनिजसदनसुवृत्तगन्धप्रबन्धभ्रमद्भ्रमरसुन्दरशतपत्रनेत्र
सकलगुणनिवासत्रिभुवनदास स्फुरदिन्दुविनिन्दकसुन्दरहास
प्रवलतरविपक्ष लक्षक्षयपरिदक्ष क्षितितलरक्षणदक्षिणपृथा-
सुतिविततमुखसेतो धरणीकेतो मामनाथं रक्ष रक्ष रक्ष ॥ १४७ ॥

घनतरघनघोषोद्गारिहारि प्रसूना-
वलिललितविसारिप्रोल्लसन्मध्यदेश: ।
अथ रथ उरुवाहव्यूहसंमण्डितोऽभू-
त्तटभुविवलगण्डिमण्डपाखण्डलस्य ॥ १४८ ॥

नरपतिपरिक्लृप्तं हारनीहारहासोऽ-
खिलभुवन निवासे भूरि सम्भारभारम् ।
विधिविहितमुदारं प्राश्य विश्वैकबन्धु-
र्विपुलकरुणासिन्धुस्तत्र तस्थौ मुहूर्त्तम् ॥ १४९ ॥

अथ सकलरथास्तेवाजिराजिप्रदीप्ता
ध्वजतलचलचेलाघर्घरोजालमाला: ।
परतरमुखसाराधिष्ठितास्तोरणान्तं
सरभसमुपजग्मुर्गुण्डिचामण्डपस्य ॥ १५० ॥

अथ सरभसमासीत्कालपृष्ठावलीना-
मतिशयभयदायी प्रौढकोलाहलौघ: ।
श्रवणयुगलभेदो व्यक्तपादोरुसादो
हृदयगुरुविषादो यन्निशम्याशु भूयात् ॥ १५१ ॥

सपदि मदिरनेत्रास्त्यक्तपुत्रात्ममित्रा:
सरभसमुपहारोल्लुण्ठने संप्रवृत्ते ।
क्व परिजन उपेतो हन्त कान्तोऽपि नेतो-
दयितसुत उपेहीत्यत्र वंस्ता भृशार्त्ता: ॥ १५२ ॥

तदनु वसनभूषादानमानावधानै-
रविरतकृतगीता[1] हृष्टपुष्टाविसृष्टा: ।
सपदि दयितसंहा इन्दिराजानि तत्त-
त्पदविजयविधाने दत्तचित्ता बभूवु: ॥ १५३ ॥

अथ नरवरनाथो हारपाथोरुहाक्षा
क्षयितसुरविपक्षात् प्राप्य तस्माद्विदायम् ।
इति निजहृदि कुर्वन् स्वपुरं प्राप्य तूर्णं
ननु जनुरधुनाभून्मे यथार्थं कृतार्थम्[2] ॥ १५४ ॥

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये गुण्डिचामण्डप-
प्रवेशो नाम विंशतितम: सर्ग: ।

---

१ । धाप   २ । श्लोकसंख्या १५५ इत्युल्लेखोऽस्ति

एकविंशः सर्गः

अथा गते पञ्चमवासरे परो वभूव होराभिध उत्सवो नवः ।
भवाक्षि लक्षातिशयक्षणप्रदः प्रतिक्षणं शोकविषापसारकः ॥ १ ॥

समीक्ष्य यत्पुत्रवियोग वैशसं भृशं विचेष्टजननी जहौ महत् ।[१]
परिस्फुरत्कामरसावशीकृताऽङ्गनापि विन्यस्तमना निजे प्रिये ॥ २ ॥

अहो महच्चित्रमिदं यतोनुतान्निरासयोगानपि योगिनां गणः ।
विहाय धूलीगतकेलिलालसं भृशं समेताः शिशवोऽपि विद्रुताः ॥ ३ ॥

बुधोऽप्यधावत्तरसा रसाकुलः प्रसार्य्यपुस्तानि निरस्तवेतनः ।
गलद्दुकूला चलिताऽतिविह्वला विहाय लज्जां कुलपालिकावलिः ॥ ४ ॥

वनानि हित्वा फलपल्लवावली घनानि वैखानससंहतिर्ययौ ।
विहाय दण्डानपि मुण्डिनां गणो वभूव यद्वीक्षणलालसो रसात् ॥ ५ ॥

ततो धृतान्तः कदनाजनार्दनाङ्गदस्फुरन्मानघना महामनाः[२] ।
गलद्दुकूलाचलदोष्ठपल्लवा रुषा भृशा स्निग्धकटाक्षलक्षिता ॥ ६ ॥

निशावसानाम्वरचारिसम्वरप्रसारिशीतांश्वनुकारिवक्त्रभा ।
अमानमानस्वसितप्रतिक्षणाहतिप्रकम्पत्प्रघनस्तनद्वयम् ॥ ७ ॥

विसारि हृद्वारि निरन्तरस्फुरत्प्रतिक्षणात्तापभृशावशा कृशा ।
ससारमाणिक्यमसारहारकप्रवालनीलोत्पलजाललालितम् ॥ ८ ॥

सुवर्णसचारि सुवर्णकिङ्किणी प्रणीतघण्टारवपूरितान्तरम् ।
हिरण्यजस्तम्भकदम्वसम्भूतं महाघनक्षौमसमावृतं नतम् ॥ ९ ॥

समुद्यतद्योतनविम्वभासुरं परं वरानन्दसुवाहवाहितम् ।
परिस्फुरद्दर्पणराजिराजितं विमानमारुह्य जगाम कामदा ॥ १० ॥

ततस्तदीयो वरवारयोषितां गणो रणत्काञ्चनकाञ्चिकाञ्चितम् ।
समन्ततश्चञ्चलपवंतं नभोऽङ्गणं वितन्य त्वरसा रसाम्वुधिः ॥ ११ ॥

१। चतुर्भिः कुलकम्

२। पञ्चभिः कुलकम्

गतागतेषु प्रभवं लता नता विनोदयन् पुष्पफलैरलङ्कृताः ।
विलोलनीलोत्पलजालमालया दिशो वयस्याः सहसा समर्चयन् ॥ १२ ॥

निरङ्कसम्पूर्णशशाङ्कमण्डलान् परस्परालापरतान् विलासयन् ।
अधोमुखैश्चापितिरोहयन् धरां सरोरुहैश्चारुचचारि सर्वतः ॥ १३ ॥

अथो रथोत्तंसमवाप्य तत्क्षणं गणा जनन्या जगतां समन्ततः ।
मनोऽस्यभङ्गे दधिरे मुहुर्मुहुर्बहुस्तवन्यस्तनिरन्तरा क्षमाः ॥ १४ ॥

निशम्य तत्तच्चरितं रमाकृतं नृसिंहभूपालपुरःसरा नराः ।
दरारिभाजोऽनुचरा निरन्तरा वरा हृदि न्यस्तजराः समाद्रवन् ॥ १५ ॥

तथाविधं प्रेक्ष्य रथं पुरःसरां परां च देवीं दयितां जगत्पतेः ।
गतद्विषस्ते सहसा भवन् भृशं दिनावसाने किमु भानुभानवः ॥ १६ ॥

परिस्फुरत्क्रोधरसाभृशावशां त्रिलोकनाथा सुसमां रमां पुरः ।
समीक्ष्य तां भूमिपतिकृतानतिस्त्वरातुर स्तोतुमनास्तदाऽजनि ॥ १७ ॥

नमोनमः केशिनिसूदनाररप्रसारिवक्षःस्थलहारिभूषणे ।
परिस्फुरत्कुन्दकदम्बसुन्दरस्मिते जगद्धात्रि नमो नमोनमः ॥ १८ ॥

नमोनमः पद्मपलाशलोचने नमोनम. पद्मवनैकवासिनि ।
नमोनमः पद्मलसत्करोदरे नमोनमः पद्मिनि ते नमोनमः ॥ १९ ॥

त्वया दयाबन्धुरनेत्रयोक्षितोऽधमोऽपि भूमितिलको धरातले ।
जड़ोऽपि दोष क्व इति प्रतिश्रुतः कुलैर्विहीनोऽपि भवेन्महाकुलः ॥ २० ॥

त्वयेक्षितो देवि दयाविहीनया सुपण्डितोऽपि क्षितिमण्डलेऽधमः ।
कुलप्रसूतोऽपि जनैस्तिरस्कृतो नुतोऽपि निन्दाभवनं भवेन्नरः ॥ २१ ॥

इति स्तुवन्नेव जनाधिपोऽमनाक् सहानुजः सानुचरः सबान्धवः ।
तिरस्कृतक्षीरसमुद्रसम्भवागणैरगण्यैं सहसाहसान् भृशम् ॥ २२ ॥

अथातिवेलं वलयोरलं द्वयोः प्रवर्त्तमाने कलहे परस्परम् ।
वभूव सर्वं किल विस्मयाकुलं यतो दुरन्तामहतां विरोधिता ॥ २३ ॥

निशम्य तद्भूभव जन्तुसन्ततेः प्रतिक्षणं प्राणनिरासकारणम् ।
दुरन्त चिन्ता कुलमानसे भृशं यमेश्वरोऽभ्यद्रवदोशिताक्षितेः ॥ २४ ॥

ततः परं क्षेत्रगतिः सतां गतिर्विदन्निति प्राद्रवदाशुविश्वभुक् ।
अहो महानेष पराभवो भुवो यदङ्गमातापितरौ गतत्रपौ ॥ २५ ॥

जगाम कामप्रद ईश्वरोऽम्बिकापतिः कृतार्थीकृतनेत्रसंहतिः ।
जगत्प्रसूतिस्थितिविच्युतिप्रभुः सलोकनाथस्तरसा भृशावशः ॥ २६ ॥

प्रविश्यते विश्वजनैकबन्धवो बलावकाशं करुणैकसिन्धवः ।
महात्मनां सर्वमहोमहद्ध्रुवं ब्रुवन्त इत्थं जहसुर्मुहुर्विदु ॥ २७ ॥

अथातिकोपाकुललोललोचनस्त्रिलोचनः क्षेत्रपतिर्जगद्गतिः ।
उवाच वाचस्पतिरेतदङ्गने जलोभवाया उचितं तव स्फुटम् ॥ २८ ॥

न सन्ति कान्ते कति वा गृहे गृहे मनोजनुर्जैत्रशरावरास्त्रियः ।
त्रपाविमोकं त्वमिव प्रतिक्षणं न कामि नूनं तनुते तनूदरि ॥ २९ ॥

सलोकनाथोऽथ जगत्प्रशासिता जगादकुन्देन्दुरुचिः शुचिस्मितः ।
अये दयावारिधिशाधि शोभते न साधुवृत्तेः किमियं कृतिस्तव ॥ ३० ॥

पितामहाद्या ननु ते सुरोत्करा दुरायति त्वच्चरितं जुगुप्सितम् ।
निशम्य निस्पीड्य करेकरं परस्परं हसिष्यन्त भृशं कृशोदरि ॥ ३१ ॥

इयं महत्यर्णव पुत्रिकारणा विडौजसः केशवपूर्वजन्मनः ।
निशम्य कृत्यं तव लज्जितो दृशां शतेन कस्यास्यमसौ तु पश्यत ॥ ३२ ॥

ततो यमेशोऽपि रमां समागतामिति प्ररूढप्रणयो जगाद ताम् ।
किमेतदम्भोरुहलोचनेऽङ्गने जनार्दने दुश्चरितं चरस्य हो ॥ ३३ ॥

कुलावलानां किल वालसम्बरेक्षणे क्षमा प्राणसमेवतोचिता ।
जगत्प्रसूतिस्थितिविच्युतिक्षमारमास्यहो प्राणसमा जगत्पतेः ॥ ३४ ॥

तदेहि यामः स्फुटकुन्दसुन्दरस्मिते जगद्धात्रि निजं गृहोदरम् ।
तिथौ दशम्यां ननु तन्वि जीवनं तवान्तिकं यास्यति लग्नका वयम् ॥ ३५ ॥

इतीरितामानघना नताननना दुरन्तचिन्तागलदम्बुलोचना ।
त्रपावती सा प्रतिपत्तिकातरा निरासवासं प्रतिवर्त्तिने मनः ॥ ३६ ॥

निजां सखीमाह च साचिलोचना यदार्यपादैर्गदितं जगद्धितम् ।
तदस्तु यामि स्वगृहं महानयं पराभवो मेऽभिनवोऽथ कथ्यताम् ॥ ३७ ॥

इति प्रतिश्रुत्य गतानताननना त्रपाक्रपाक्रोधभयाकुलाऽबला ।
निशावसानौषधिनाथमण्डलाननप्रभाहर्म्यतलं महोज्ज्वलम् ॥ ३८ ॥

सपदि भुवन नाथो लोकनाथादयस्ते
सरभसमपदोषं स्वस्ववासं विसस्रुः ।
वलकलहमशेषं नाशयित्वा समन्ता-
च्चरमगिरिसमीपं याति भानौ विभानौ ॥ ३९ ॥

अथो नरपतिसिंहश्रीनृसिंहोऽतिसारा-
न्निजपरिजपरिकरवारान् दक्षिणास्ये रथानाम् ।
सरभसमतिफुल्लत्कुन्दमन्दारमन्द-
स्मितसुभगकपोलः प्राददद्विश्वबन्धुः ॥ ४० ॥

तदनु मदनमूर्त्तिः सर्वतो गीतकीर्त्तिः
सुखितसकलनेत्रां तत्र यात्रां समाप्य ।
अतिशयसुखसिन्धावन्वितो बन्धुवर्गैः
सहमुरहरपादद्वन्द्वमूलं जगाम ॥ ४१ ॥

अतिशयसुखपूर्णस्तूर्णमर्णोधिपुत्र्या
गुरुतरपरितापव्यूहनिःस्निग्धगात्र्याः ।
अखिलविलसितं तत्सावधानं मुरारे-
श्चरणकमलमूले ज्ञापयामास शश्वत् ॥ ४२ ॥

तदनु भुवनभर्त्तुर्मन्दमन्दस्मितश्री
स्नपितमुखसरोजात्प्राप्य वीरो विदायम् ।
परिविलसदमन्दानन्दसन्दोहपूर्णो
निजनवरमुदारं तारहारो विवेश ॥ ४३ ॥

इति श्रीवसन्तोत्सवे महाकाव्ये होरावर्णनं नाम एकविंशतितमः सर्गः ।

द्वाविंशः सर्गः

ततः पञ्चदिने भूते यात्रा नेत्रावलिप्रिया ।
निवर्त्तनाख्या प्रख्याता लक्ष्मीप्रीत्यै विभोरभूत् ॥ १ ॥

क्षत्रसूत्रामभित्रादि देवेशं दक्षिणाननम् ।
यान्तं समोक्ष्य स्वर्गोऽपि प्रत्यूह इति मेनिरे ॥ २ ॥

अथो रथं समासाद्य पाथोजदललोचनः ।[1]
जयेति जगतां वादं कलयन् हलपाणिना ॥ ३ ॥

दलयन् पापनिवहं लालयन्नीक्षणोत्सवम् ।
चचाल ललनां द्रष्टुं दिशः प्रोज्ज्वलयन् त्विषा ॥ ४ ॥

ततः सुरासुरनरप्रमुखाः सत्वसञ्चयाः ।
महोदया महात्मानो महोत्सवहृताशयाः ॥ ५ ॥

पुत्रमित्रकलत्रैः स्वैः स्वैर्भृत्यैर्भृतकैरपि ।
समुत्सुकाः समागम्य मुदा सहपरिच्छदाः ॥ ६ ॥

ददृशुः पद्मपत्राक्षं साक्षाल्लक्ष्मीनिकेतनम् ।
कुन्दमन्दस्मितं कोटिकोटिमन्मथमन्मथम् ॥ ७ ॥

कर्त्तृगुप्तं यथा —

पश्यैनं भवभारोघाभिभवाय प्रयात्यसौ ।
रथे रमापरिवृतवलेनवलशालिना[2] ॥ ८ ॥

कर्मगुप्तं यथा —

करोदरलसच्चक्रशंखस्यामुग्ध सर्वतः ।[3]
तनुकुन्देन्दुमन्दारसन्दोहसुभगस्मितम् ॥ ९ ॥

क्रियागुप्तं यथा —

अस्य विश्वस्य विश्वेश विश्वानि दुरितान्यपि ।
सुरासुरशिरोदेशे परिपारस्फुरत्पद ॥ १० ॥

---

१ । युग्मकम् २ । त्रिभिः कुलकम् ३ । चतुर्भिः कुलकम्

कर्त्तृकर्मक्रियागुप्तं यथा —

सनातनादि-दुर्ज्ञेय-चरणाम्भोज-माधुरी ।
त्वय्युल्लसन्ति प्रत्यङ्गसर्वदेऽवत्वमत्सरे ॥ ११ ॥

इति कोपि स्तुतिं चक्रे चक्रपाणेरनुक्षणम् ।
मुकुन्दस्य च कुन्देन्दुमन्दारस्मितशालिनम् ॥ १२ ॥

अन्वयगूढं यथा —

शयनं यस्य मामारो जायाऽर्णसितनूजनुः ।
पुराराति दितिसुता पातु रत्नकरः समा ॥ १३ ॥

पदगूढं यथा —

समीथपाथक्लेदाक्षपात्वास्य विसरप्रभो ।
शुष्मसख्य पुरोद्वाहदक्ष रक्षेति कश्चन ॥ १४ ॥

अर्द्धाक्षरच्युतकं यथा —

जयदेवजगन्नाथजनतातिभयापह[१] ।
नमस्तेऽस्तु क्षमासिन्धो जगद्बन्धो जनार्दन ॥ १५ ॥

विन्दुच्युतं मात्राच्युतं यथा —

वलकुन्देन्दुधवले हंसाग्नीन्दु दृशि त्वयि ।
मनो ममास्तु सततं देवदेव नमोऽस्तुते ॥ १६ ॥

च्युताक्षरा, दत्ताक्षरा च्युतदत्ताक्षरा च यथा —

जयदेव गोकुलानन्द परमापरत्मात्मक ।
सुस्निग्धनीलकुटीलकेशवेश नमोनमः ॥ १७ ॥

इति स्तुतिं प्रतिपदं जगत्पतिपतीक्षणः ।
कश्चित् विपश्चित्तरसा रसाकुलमति जगौ ॥ १८ ॥

निरोष्ठ्यं यथा —

राधाकेलिकलाशालिहृदयानन्दकन्दहे[२] ।
हारनीहारनीकासहासरासरसालसा ॥ १९ ॥

---

१ । चतुर्भिः कुलकम् २ । युग्मकम्

असंयुक्ताक्षरं यथा —

लोललीलालककुललालितराननवारिजम् ।
नीलनीरदनीकासतनो तनुमनो मुदम् ॥ २० ॥

अपुनरुक्ताक्षरं यथा —

ईशघोष-झटोपात्ताभीरीहठकथोच्चय ।
उदुताखिलनागाधिफण लास्यावमाततम् ॥ २१ ॥

गतप्रत्यागतार्द्धं यथा —

रक्षनाथमतिज्ञेयज्ञविभो तनुमानघ[1] ।
घनमानुत भो विज्ञ यज्ञेति मथनाक्षरा ॥ २२ ॥

गतप्रत्यागतपादं यथा —

सहसारवदायाद दयादाव रसाहस ।
रक्षमारतनुश्रीकविश्री नुतरमाक्षर ॥ २३ ॥

इत्थं भवाधिपपुरः स्तवं नवनव मुहुः ।
कश्चित्त्यर्णं सुखार्णोधिमध्यावद्धोऽकरोन्नरः ॥ २४ ॥

पट्टीशबन्धो यथा —

महार्घममतारामममवयाममरोत्तम ।
महत्तममपि श्याम मनोरम महोद्यम ॥ २५ ॥

चतुर्दलपद्मबन्धो यथा —

सहसार रमादास सदामाररसालस ।
सरसार मादाससरामाभरसाहस ॥ २६ ॥

अष्टदलपद्मबन्धो यथा —

सहसास्य रमादास सदामावरसालस
सरसाम्वुधराकाश सकारावरसाहस ॥ २७ ॥

षोडशदलपद्मबन्धो यथा —

श्रीमन् भीमक्रमश्यामकामरामशमश्रम ।
नमस्ते महिमस्तोम धाम नाम समक्षम ॥ २८ ॥

---

१ । त्रिभिः कुलकम्

लिङ्गबन्धो यथा —

सदा मुदा सर्वगर्वसदनं दरदक्षयम् ।
स्वयं स्वयम्भुवं देव भवं भव्यभवं भज ॥ २९ ॥

इति कोऽपि परे पुंसि कुन्देन्दुधवले बले ।
न्यस्तदृग्व्याजहारोच्चैरूर्ध्वबाहुर्मुहुर्मुहुः ॥ ३० ॥

चक्रबन्धो यथा —

जगन्नाथ जगज्जिष्णो जगदाद्य जगद्धर ।
रमानाथ विधो विभो हृतचैद्य भवादर ॥ ३१ ॥

गोमूत्रिकाबन्धो यथा —

रामरामरमाबन्धो जय लोकवराजर ।
कामधामन् क्षमासिन्धो भयशोकहराक्षर ॥ ३२ ॥

पाहि पाहि महाबाहो भव भूरि भयोदयात् ।
इत्याह कोऽपि पद्माक्षं वीक्ष्य लक्ष्मीनिकेतनम् ॥ ३३ ॥

कङ्कणबन्धो यथा —

भो भो मासाकासाम्भसा रामासाराऽपारागोर्या ।
को वै शम्भुः श्रीराहाहा कावासागोर्या नो धीरा ॥ ३४ ॥

शाधि प्रेयान्निःसन्देहं लक्ष्मीभर्त्तुः का वा यात्रा ।
ताभ्यां हीना काचित्कान्तं प्राहेत्थं द्राग्जातोत्कण्ठा ॥ ३५ ॥

तर्कैरतर्क्यं पुरुषं पश्य पश्यन्ति तार्किकाः ।[1]
इतस्तमपि वेदान्तविदो यान्ति समीक्षितुम् ॥ ३६ ॥

एकाक्षरम् यथा —

ततोऽतीतं ततं तं तु तातो ताऽति ततं ततम् ।
तताततेतोऽततीतत्तत्तोत्तातिततातीतिः ॥ ३७ ॥

१। चतुर्भिः कुलकम्

द्व्यक्षरं यथा —

पतत्पतिपतिः पातापतत्पापातितापपः ।
पोतः पतितपूतोऽति ततोऽति पततीतिपः ॥ ३८ ॥

तस्माद्यामो रमाकान्तो हन्त नेत्रपथं गतः ।
इत्युत्कण्ठाकुलः कोऽपि पितरं[1] प्राह सत्वरम् ॥ ३९ ॥

ततः सुरा मुरहरचरणाम्बुजवीक्षणे ।
जग्मुः क्षोणीं क्षणादेव शतक्रतु पुरःसराः ॥ ४० ॥

दर्शं दर्शं हृषीकेशं हर्षगद्गदवाग्युषः ।
यथानुतर्षतरसा चक्रुर्नवनव स्तवम् ॥ ४१ ॥

एकपादयमकं यथा —

गोत्रोद्धारादित्यव्याधे गोत्रोद्धारादित्यव्याधे ।[2]
गोत्रोद्धारादित्यव्याधे गोत्रोद्धारादित्यव्याधे ॥ ४२ ॥

पदान्तयमकं यथा —

धराधरेक्षणरुचाजितपद्मोज्ज्वलादर ।
इति कोऽपि स्तुतिं चक्रे जितपद्मोज्ज्वलादरा ॥ ४३ ॥

एकाक्षरपाद यथा —

ममिमं माममममाततातातोऽति ततोऽतति ।
कुं ककाः कककेकाकाविविवाविववावबुः ॥ ४४ ॥

द्विपादान्तयमकं यथा —

सारसारसविस्पष्टपदपादविवर्द्धना ।[3]
सारसारसविस्पष्टपदपादविवर्द्धना ॥ ४५ ॥

का मूर्त्तिः कथयो दारासहसा महसां निधे ।
उत्कण्ठितास्मि सततं तां द्रष्टुं सृष्टिपुष्टिदाम् ॥ ४६ ॥

---

१ । पितमिति पाठः २ । युग्मकम् ३ । युग्मकम्

सर्वतो भद्रबन्धो यथा —

रसा सार रसामार माधवात तवाधमा ।
सावासवा वासवासा रतवाध धवातर ॥ ४७ ॥

क्वास्ते ब्रूहि महोदर चरिता दर्शय प्रभो ।
तामीक्षितुं सहप्राक्षसोत्कं चेतोऽधुनाऽजनि ॥ ४८ ॥

अथ रथनिवहास्ते वाजिराजि प्रदीप्ताः
परमपुरुषभाराक्रान्तताम्ता नितान्तम् ।
कलकलकलिताया तोरणान्तः क्षमाया-
मतिशय सुषमायामाविरासुः समन्तात् ॥ ४९ ॥

तदनु मदन कोटिकोटि मूर्त्तिर्निजनवरं तरसा रसाधिनाथः ।
विततविविधमङ्गलं समन्तादतिशयमङ्गलो विवेश ॥ ५० ॥

गुरुतरवलमानमानखिन्नां निजदयितां परिरभ्य हन्त दोर्भ्याम् ।
चलदधरदलां रुषा कृशाङ्गीमतिनयनान्तरालज्जलां (?) जगाद ॥ ५१ ॥

जहि जहि जहि मानं मानिनि प्राणबन्धो
विपुल करुणासिन्धो शङ्करे किङ्करेऽस्मिन् ।
निजपरिजनदोषं हा गुणज्ञारसज्ञे
तृणलवमिव विज्ञे संततं संत्यजन्ति ॥ ५२ ॥

इति विविधवचोभिस्तारहारादिदानै-
रपि चरणनिपातैर्मानभङ्गे प्रवृत्ते ।
सरभसपरिरम्भारम्भविश्रम्भभाजो-
र्यदि जनि ननु सत्यं तद्वयं तत्तु वेत्ति ॥ ५३ ॥

माता यस्य पवित्र कीर्त्तिरमला पद्मावती यत्पिता
सारासारविचारविद्दिनकरो नीरो भवाक्षः क्षमी ।
जातः शम्भुकरे कुलेऽतिविमले सोऽहं पुरारातये
काव्यं भव्यमदं मुदा हलधरो धीरो ददे तन्मुदे ॥ ५४ ॥

कवि काव्यनामचक्रं यथा —

सद्भावप्रियहव्यकव्यनिवहसारस्फुरत्सत्वद
पन्नासप्रवलप्रतापनिरतक्ष्माकृत्य देवाधिप ।
सत्ससन्तोषबुधप्रियाशनि समं शान्त दुराख्यं प्रभो ।
भो दुःखं सहसा प्रसारि सकलं प्रीति भो ······ ॥ ५५ ॥

वत्सश्रीकपिलेश्वराखिलगुणग्रामालय श्रूयतां
काव्यं भव्यमिदं कृतं तदुभयोरैक्यं समुत्पादितम् ।
आत्मासौगमतः कृतान्यपदवीं स्फीतं यशोरक्षितं
क्षोण्यां नित्यमतः परं यदपि तद्वाक् सावधानः शृणु ।। ५६ ।।

सन्तः सन्तः निरन्तरां गत मलाधर्मे च भूमीभुजः
सारासारविचारकृत्य चतुरा रक्षन्तु साक्षात्क्षितिम् ।
मेघौघा अपि वृष्टिसृष्टिनिरता नित्यं प्रजापुष्टिदा
गीर्वाणापि च सर्वदा मखभुजो निर्वाणमायान्तु च ।। ५७ ।।

इति श्रीहलधरमिश्रकृते वसन्तोत्सवे महाकाव्ये परिवर्त्तनगुण्डिचावर्ण्णनं
नाम द्वाविंशतितमः सर्गः ।



पट्टिशबन्धः

महार्घममतारामममवयाममरोत्तम ।
महत्तममपि श्याम मनोरम महोद्यम ॥ २५ ॥



चतुर्दलपद्मबन्धः

सहसार रमादास सदामार रसालस ।
सरसार रमादास सदामाररसाहस ॥ २६ ॥



अष्टदलपद्मबन्धः

सहसास्य रमादास सदामावरसालस ।
सरसाम्वुधराकास सकारावरसाहस ॥ २७ ॥



षोड़शदलपद्मबन्धः

श्रीमद् भीमक्रमश्याम कामरामशमश्रम ।
नमस्ते महिमस्तोम धाम नाम समक्षम ॥ २८ ॥



लिङ्गबन्धः

सदामुदासर्व गर्व सदनं दरदक्षयम्

स्वयं स्वयम्भुवं देवं भवं भव्यभवं भज ॥ २९ ॥

चक्रबन्धः

जगन्नाथ जगज्जिष्णो जगदाद्य जगद्धर ।

रमानाथ विधो विभो हृतचैद्य भवादर ॥ ३१ ॥



गोमूत्रिकाबन्धः

राम राम रमाबन्धो जय लोकवराजर।
कामधामन् क्षमासिन्धो भयशोक हराक्षर ॥ ३२ ॥



कङ्कणबन्धः

भो भो मासाकासांभसा रामा साराऽपारागोर्या ।
को वै शम्भुः श्रीराहाहाकावासागोर्या नो धीरा ॥ ३४ ॥

कङ्कणबन्धः

शाधि प्रेयान्निःसन्देहं लक्ष्मी भर्त्तुः का वा यात्रा ।
ताभ्यां हीना काचित्कान्तं प्राहेत्थं द्राग्जातोत्कण्ठा ॥ ३५ ॥

र	सा	सा	र	र	सा	मा	र
मा	ध	वा	त	त	वा	ध	मा
सा	वा	स	वा	वा	स	वा	सा
र	त	वा	ध	ध	वा	त	र

सर्वतोभद्रबन्धः

रसा सार रसामार माधवात तवाधमा ।
सावासवा वासवासारतवाध धवातर ॥ ४७ ॥

छन्दसामनुक्रमणिका

छन्दसां नामानि	सर्गाः	अङ्काः	छन्दसां नामानि	सर्गाः	अङ्काः
अचलधिति:	२०	७९		२०	२८
अत्युक्था	२०	३	उक्था	२०	२
अद्रितनया	२०	११४	उद्गता	२०	१३१,१३२
अनङ्गशेखर	२०	१२३	उद्गीतिः	२०	१४०
अनुकूला	२०	३३	उपगीतिः	२०	१३९
अनुष्टुप्	३	१-६००	उपचित्रम्	२०	१३०
	५	१-४२	उपजातिः	१	११
	६	३५-८४		१८	२४
	८	१-५६		२०	३०,४२
	१८	१-७,१२	उपेन्द्रवज्रा	१	१२-४५
		१८-२१		१३	१-७०
		२५-४५		१८	४६,५२
		४७-५०		२०	२९
		५३-१७३	औपच्छन्दसिकम्	२०	१४३
	२०	१,१३५	कलिका	२०	१४६
	२२	१-४८	कुमारललिता	२०	१४
अपरवक्त्रम्	२०	१२९	कुसुमविचित्रा	२०	५२
अपराजिता	२०	६८	कुसुमस्तवकः	२०	१२१
अशोकपुष्पमञ्जरी	२०	११९	कुसुमितलतावेल्लिता	२०	९६
आर्य्या	१०	१-१२२	क्रौञ्चपदा	२०	११७
	२०	१३६,१३७,	गरुड़रुतम्	२०	८२
		१४१	गीतिः	२०	१३८
इन्द्रवंशा	२०	४१	गीतिका	२०	१०७
इन्द्रवज्रा	१२	१-३६	चकिता	२०	८३

छन्दसां नामानि	सर्गाः	अङ्काः
चण्डी	२०	५९
चन्द्रदृष्टिप्रपातः	२०	१२०
चन्द्रलेखा	२०	७२
चन्द्रवर्त्म	२०	४३
चन्द्रिका	२०	६१
चित्रम्	२०	८०
चित्रपदा	२०	२०
चित्ररेखा	२०	९९
चित्रा	२०	७८
चूर्णक	२०	१४५
छाया	२०	१०२
जलधरमाला	२०	५६
जलोद्धतगतिः	२०	४४
तनुमध्या	२०	१०
तन्वी	२०	११६
तामरसम्	२०	५४
तूणकम्	२०	७३
तोटकम्	२०	४५
त्वरिता	२०	२६
दोधकम्	२०	३५
द्रुतविलम्बितम्	२०	४६
नन्दनम्	२०	९७
नर्दटकम्	२०	९५
नान्दीमुखी	२०	७१
नाराच	२०	९८
पज्झटिका	२०	१४४
पञ्चचामरम्	२०	८१

छन्दसां नामानि	सर्गाः	अङ्काः
पुष्पिताग्रा	१९	१-४२
	२०	१२४
	२२	५०,५१
पृथ्वी	१	१-४
	२०	८८
प्रतिष्ठा (कन्या)	२०	६
